गंस्यात् ऽनानर्थक्यनदंगन्यायसहकृतप्रकरणेनज्योतिष्टोमीयपश्वंगमेषदतिसामान्यसंबंधसंभवात्॰ मनोतायै
हविषोवदीयमानत्वस्यानुध्रूहीतिप्रैषेपमुद्देवतावाचित्वेननिर्णीतिस्यमनोतापदस्येहासंभवत्वेनसोमयागां
गत्वासंभवात् नचयघण्यन्यदेवत्यः पशुराग्नेयीवमनोतावाकार्येतिक्रनिषाप्रोत्कर्षबाधनस्तिशंक्यंत्वतीयादिवि
क्षेरिहासंभवात् वाक्यस्यपल्लिंगबाधत्वात् वावयेषशा हविर्निषेधार्थत्वेनानर्थक्यायोगात्॰ ऽन्यथाग्नेयीति
तस्यार्थस्याग्नेय्येवेव कारस्यानर्थक्यात् नचैवमहहविनिषेधवशेनयोदकप्राप्ताग्नेयमंत्रस्थानेनाग्नेयमंत्रप्रसक्तिरपि
स्योहस्यनिषेधेनतस्यार्थवत्वं तस्मादुत्कर्षएवमनोतामंत्रस्यप्रकृतावेत् न कार्येवेतिप्रवहिताग्नेयेसत्येवकारस्यकर्ता
वोत्कर्षनिषेधात् त्वतीयाक्रमनिर्दिष्टप्रकृतयागविनियोगस्तुत्वेनोत्कर्षनिषेधंकुर्यात्॰ इयंतूत्कर्षनिषेधस्तुरवेन

लिंग ५

संभज
मि २

न१

प्रकृते विनियोगं करोतीति फलतो विशेषः युक्तं तस्य मंत्रत्वं आलम्भनयोर्व्यवहितन्तु प्रधानविध्य
न्वयादेवकारमात्रस्य स्ववाक्येऽप्यवहितान्वयः नन्वेवं वायव्यपशौ कथमनूहो मनोतामंत्रस्य
उक्तं श्यामनोतायां तु वचनादविकार इति दाशमिकाधिकरणे न चान्यायनिगदत्वान्न चोहुवच
नानतपाशपदवदूहसिद्धिरिति न्यायसुधोक्तं साधु देवतात्वाधिष्ठानस्याग्नेः पाशवदुत्तवदसम्भ
वत्वाभावात् न च पाशनिति पाशशब्दावयवसंख्यायाश्चाग्निपदेन देवतायास्तत्क्षयेव प्राकृत
याप्रकाशनेऽप्यादिकृतादिन्ताकृतं एवमविहितप्रयोगमूत्ताद्वैशकृतिवदेवतात्वाधिष्ठानमग्निस्त
त्रप्राकृताधिष्ठानलक्षणासंभवात्स्थितं स्थितेऽनूहेनैवारनं उक्तेषिवधान्यमसीत्यस्य वायवे न तु
रसमयेऽप्यवनतथेतिचेत् न आग्नेयः पशुर्नेज्योऽतिष्टोम इति कृत्वा सिनाग्नादाशमिकविचार
स्य उक्तं च तथा तत्रैव मिश्रैः संभवति च तथा सत्येव प्रकर्षनिषेधासंभवेनोक्त एव सोऽनूहपरतो

नो१

मितिदिक्षु भक्षानुवाके पठितानां भक्षे हानि न च वक्तव्यमिति हि न्वमस्तूपक्रमकाणां सधारा
मित्यवस्थेशे मितिमामेवाङ्गाभिमतिगाद्वत्पंगानां वाक्यान्तं समभ्यास्याश्रुम् भक्षणांगत्वं लिंगा
वगतैर्ग्रहणावेक्षणसमभ्युज्जरणांगत्वैर्ग्ध्यात नचाविहितग्रहणादेरननुष्ठेयत्वान्मंत्रप्रका
श्यत्वासंभवः भक्षणविध्याक्षिप्तत्वेन तथानुष्ठेयत्वात् तत्प्रकाशनसमर्थमंत्रकल्पितविधिना
वा नियमेन तद्विधानात् न चैवं मंत्रादेस्तत्प्राप्तिः संतस्य लिंगात्तृप्त्यंगत्वं स्यात्तु भक्षणांगत्वमिति
शंक्यं ग्रहणादिवत्तृप्तेर्भक्षणफलान्ययत्वोपपत्तेः तृप्तिलाभाचेन पृथक्प्रकाशनानपेक्षत्वात्
तस्माद्युक्तोऽस्य क्रवाकस्य दर्शपूर्णमासयोरिव भक्षानुवाकस्य ग्रहणादिषु लिंगाद्विभज्य वि
नियोगः ॥ एवं काम्यपाज्यापाकांडे आग्निवारुणी इत्याज्यानुवाक्यानंतरं सोमारौद्रीष्टियाज्यानु

नुवाक्या ५

107

वाक्यातः पूर्वं पठितानां पञ्चदशानामृचां क्रमावगतसौम्यारोक्षंगत्वानां समाख्याप्राप्तयाज्यात्वादिलैङ्गि
केन सामिधेनीत्वेन बाध्यते आग्नेय्यो हि ताः शङ्कुवती सामिधेनी कार्यं कर्तुं अपेक्षन्ते च विहृ
सामिधेनीकामिरिष्टिभिरलंकारित्वयेति न सामिधेन्युत्तरमाग्याज्याभागितिवेशो विशंक्यः नच
तत्र निवेशेपि समाख्योपपत्तिः तस्याः काम्यपदाभिधेयप्रधानसंबंधबोधकत्वादित्यास्तांता
वत् साध्यत्वादीति स्वप्रकृत्यर्थनिरूपितशेषत्वबोधिकानां विभ नां शेषिपदोत्तरत्वेन स त्वी
प्रकृत्यर्थगतशेषत्वबोधिकानां शेषपदोत्तरत्वेनाभावे सतीत्यर्थः तेन प्रयाजशेषाभि
धारणसत्वादिविनियोजकवाक्यसंग्रहः बोधेति तत्वाग्निनोः शाब्दयोरेकान्वयबोधापपा
गिसंनिधिविशेषेणोच्चारणमित्यर्थः तेन तत्प्रकरणविषयेति प्रसंगः नचैवं देवस्य त्वादिष १०७

प्र२

दविनियोजकमंत्रगतवाक्यस्यासंग्रहात् पन्निस्तेषांशेषवाक्यित्वाभावादितिशंक्यं नदर्थीना
मपिमंत्रकार्यभूतविशिष्टनिर्वापप्रकाशनद्वारेणनिर्वापशेषत्वाभ्युपगमात्. इयांस्तु विधि
वाक्यान्मंत्रवाक्येभेदः पूर्वविधिवाक्ये श्रुतिमात्रं कल्प्यं मंत्रवाक्ये तु संस्कृतिकं वाक्यान्तरं मंत्रे
स्त्वाग्निपिद्दितीयादेर्विधिहरतायाविनियोजकत्वाभावात्. अतएवमंत्रगतवाक्यत्वलक्षणो ५
भावान्तरस्यनप्रवेशः अग्रहत्विरिति नतोयन्त्रयमंगीकृत्यावादकेनवोदकभिन्नमानेनयत्र
कतुप्रवेशद्वारस्याकुक्कादेः प्रवृत्तिः त्राखिरितियोज्यं तेनसोमेपर्णताप्रसक्तिः भवतिवर्तहेम
धीये तत्रकल्पसूत्रकारैरुपदेशात् अधीनानामिमंत्रन्तरं समभिव्याहृतोद्देश्यवशेनक
ल्पकतुसंबंधानामितिविशेषः तेनयदाहवनीयेजुहोतीष्यस्यत्रेशोयज्ञो न्वापैतदस्यनारम्भ

हू२ न२

108

विहितस्याहवनीयस्याश्रावयेदित्यादेश्च समभिव्याहारमात्रेण कृत्स्नक्रतुसंबंधस्य जुहोति
यजतीत्येवोदनाचोदितसमस्तकर्मस्वप्युपदेशासिद्धेः असंभवात्तत्र कृत्स्नविहाराहवनीयोपदेशा
भावः यथा पवमानेष्टौ निषादेष्टौ उपनयनांगहोमेषु अवकीर्णिपशौ अक्रतुशेषेषु त दां
दंनगतेषु चक्रत्वनुहोत्रहोमेषु भाष्यमतेग्नीषोमीयानपेक्षाज्ञेयान्वार्त्तिकमतेप्रयाजानपेक्षा
न्तस्मात्परमाहुर्वान्तुत्पत्तिवचनकेव आधानाहवनीयासंभवात् अत्रैव वार्त्तिकस्याविघ्नस्याकृत
विवाहस्याधानाभावात् अविप्लुतब्रह्मचर्यो गृहस्थाश्रमं वसेदिति पशोः शाविहासंभवात्

मा ३

एषा वा नाहिताग्नेरिष्टिर्यज्ञो नु होतार इति चनुहोत्रहोमेषु अनाहिताग्निः अधिकारिकत्वा
त् गृहाग्नौ होतास प्रहोतारं जुहोति यः स्वर्गकामस्यात्स च पंचहोतारं पुरा प्रातरनुवाकोदाग्नी

घ्नेज्जुहुयादित्यादिश्रुतेरनदसंभवात् क्वचित्तुसंभवतोप्याहवनीयस्य बाधः यथा पदहोमे एवंम
हापितृयज्ञे श्रास्वधेत्याश्रवणाद्युपदेशादाश्रावयेत्यादेर्बाधो ज्ञेयः प्रकृतेरिति साम्नाय्यस्य हि
सामिधेनीद्वारेण क्रतुसंबंधः कल्प्यः क्रमश्च पांचदश्यस्य प्रकरणेनेति तस्य बलवत्त्वमित्याशयः
यस्य त्वनारभ्याधीतस्यापि क्रतुसंबंधः क्लृप्तः न तस्य प्राकरणिकेन बाधः यथा याथानोग्नि
मग्निष्टोमेनानुयजंतीति विहितानां नैरुत्तरवेधा नचैवंवाक्यविनियुक्तेनाग्निना प्रकरणवि
नियोज्यायास्तस्या एव बाधापत्तिः सत्यपि तस्याः प्रकरणविनियोज्यत्वे अग्निष्टोमपदार्थमहि
म्नाधानोः क्रतुविशेषपरतां निर्णीय विनियुंजतो वाक्यस्य विलंबितत्वप्रवृत्तिकत्वात्
वेदकेऽपि पांचदश्येन बाधः इति विग्रहः वार्त्रघ्नीयायो हि नन्वकृत्यप्रापकत्वात् रनिधोतना

इति द्योतनाय बोधकश्चादेति विशेषणं सामान्येति सामान्यशास्त्रस्य विशेषार्थे तात्पर्यज्ञापन
मित्यर्थः तत्रेति यद्यप्युभयत्र साभिधेनीनामुद्देश्यत्वश्रवणं तुल्यं तथाप्यपूर्वसाधनत्वस्य
णोत्तरमेष विभाग इति तद्ध्येयं यद्यपि विधिवाक्यस्य विनियोजकतां निरूप्य तत्कृतं प्रकरणवा
धोदाहरणं दीर्घसोमे संतृन्द्यादित्ये· तत्प्रथमपक्षे ब्रह्मतात्पर्याच्चापि विभाग इति तत्कृतमुक्तं
न्नाधबोधकं यदि तत्प्रकरणं निष्योति छोमेऽत्र अभिघवफकयोः संतर्दनं विधत्ते इत्यादिनि
रूपितं दैर्घ्यं वतोऽपि सोमान्तरनिरूपितदैर्घ्यस्य तस्य तद्वदभिधायि दीर्घसोमपदेनानभि
धानात् न च दीर्घस्य [illegible]मानस्य सोम इत्यर्थे समासः निषादस्थपतिन्यायेन च कर्मधा
रयस्यैव युक्तत्वात् धन्याय्यार्थवादानुपपत्तेश्च तस्मादुक्थ्यादिसंस्थादिस्त्वहर्गणेषु वर्तते हि विधानं

१०९

नवप्रकृतिवदुक्थ्यादिषु त्रिपर्वदशस्तुष्टिपरिमितसोमग्रहणांतदीर्घसोमत्वमिति शंक्यं प्र
दानप्रवृद्धिशाकृतपरिमाणोमर्योरोपेनदीर्घपर्वग्रहणाएव ग्रहणाश्रयणात्· नवप्रकरणांसं
स्थास्वेवनिवेशसंभवान्नाहर्गणेषुसंततईनविधिः नासांप्रकरणासंभवात् पद्यविषंतुकाम
उक्थ्यंगृह्णीयादतस्मादिवत्वः स्तू क्थ्यादिसंज्ञाविहिताखनुत्सोत्रसंबद्धे परमात्मिकाः संस्थाः
फलेभ्योविहिताः संस्थाभिधायित्वं वनासांतत्संस्थे कृतोतुक्थ्येयमितिश्रयोगादतत्संस्थे
नत्सोत्रनयोगाभ्यासवत्यपिषोडशिसंस्थेनथाऽप्रयोगात्· तथापिकृत्वाश्रितानां नासांफल
साधनत्वांकृत्वनयाधीनप्रवृत्तिपत्निकामपेस्यकृतोरेवशीघ्रंसाधनत्वाश्रितेनेतिस्मिनियागां
गभावसोमधर्मविधिमिश्रितानाऽंगविधयः प्रथमतरंकृतुशेषत्वंगतानात्पुनः संस्थाशेषत्वं प्रति

प्रतिपद्यंते कथंभावोपशमस्य ज्योतिष्टोमादतिदेशेन भवेत् यद्यपि संस्थाज्योतिष्टोमयोर्नैसादृ
श्यं तथापि सारूप्यकार्यैर्या बुद्धिस्थता याऽस्त्यत्र महिम्नैव सिद्धेर्नानुपपत्ति[illegible] तिदेशाकृता
गनैराकांक्षणादसंबद्धमर्वाञ्च न प्रकरणेन संस्थांगसंनर्दनं नैवात्र संस्थासन्निधिरपि येनानुवाद
स्य संनिहितगामित्वात्स्याद्याजैः रूपस्मत्वमिति यत्र प्रयाजपदेन दीर्घसोमपदेन संनिहितनिर्दे
शस्यात् तस्मादस्य गृह्णलेष्वपि संनर्दनं एकादशापि यत्र ज्योतिष्टोमाधिकग्रहविधिस्तत्रै
कादशिकन्यायेन प्राकृतग्रहबाधाद्वत्नु संस्थावद्दीर्घसोमत्वात् ज्योतिष्टोमे तु न निवे
श इति प्रकरणबाधः न प्रथमयज्ञ इत्यस्य प्रकरणबाधकत्वं निषेधप्रस्तावे वक्ष्यामः प्र
षेनिववच्चनं प्रकरणिनिदर्शे पेषणं विधत्ते तत्र पृष्ठ्यभ्यामानत्वा[illegible]कं तु तदेकदेशस्ये च रो दे

110 पा३ प्रयाजे

देवतायाश्चमोक्तत्वेनाग्नेयपदवं भागपदस्यानहेवत्स्यपरत्वात्॰ प्रतिप्रसवेनार्थवत्वेऽवधवाद्य
एवं किमेषज्ञायाऽनिरंशुपाविनवरप्रदानेऽपोऽश्चाहुणाभ्यावगुरेत्तं शत्तेनमानयादित्यस्मिन्स
त्कनदार्शिकत्वि[illegible]त्रस्याश्चाल्लणपदेन निर्देशासंभवात्प्रकरणबाधकत्वं तथाप्येकूदा
हरणेषु विरोधस्यास्पष्ट[illegible]त्वा मंत्रवाक्यस्य प्रकरणबाधकत्वेऽभिहितेऽवकैमुतिकन्या
येन विधिवाक्यस्य तथात्वसिद्धेर्लाघवमनुसृत्य मंत्रवाक्यकृतं बाध[illegible]माह अत एवेति
प्रकरणबाध्ययोर्मानयोर्मध्ये स्थानस्य वाक्येन बाधात्याग्नीषोमीयक्रमेणप्रसक्तत्वम
अंगत्वानिष्कृतिं णावगतपशुपत्वं त्रयांगभावपरिवीतपदैकवाक्यत्वानिक्रीयमाणपरिव्या
णानुवादिमंत्रगतानि श्वस्तुवासस्तुवासाऽनस्यादिपदानुदाहरणं वाक्येनक्रमं बाधित्वा तेषां

सवनीयपरिमाणेपि विनियोगसिद्धेः समाख्याया वाक्येन बाधा यां भक्षानुवाकगतानि लिंगा
वगमनग्रहणाद्यंगभूतैः सघासपदैरेकवाक्यतापन्नानि शेषपदान्युदाहरणं समाख्यायाश्च
भक्षणांगत्वबाधेन तेषां ग्रहणादिष्वेव विनियोगात् उभयेति फलाकांक्षाविशिष्टकथंभावा
कांक्षे त्वर्थः वैशिष्ट्यं च प्रमाणना संनिहितभावनाश्रितत्वसंबंधेन तत्वेक पुरुषावगतत्वा
दिना। तेन न विश्वजिदादेः प्रकरणेन दर्शादिगत्वं नापि दर्शप्रकरणेन प्रयाजादेः प्रकरणित्वं
यथाहि तात्र न वेदेन पदवाच्यत्वमपि न ज्ञानं न तथांगविधिगताफलाकांक्षा प्रकरणपरवा
च्यापि न प्रकरणं तत्र संबंधेन यदीयफलाकांक्षा विधिष्ठानि णानि तद्दर्शगत्वावगतायाः क
थंभावाकांक्षा सा नहि नियोजकं प्रकरणमिति तु निष्कर्षः उभयं हि अत्र संयुक्तं प्रकरणादिति

कर्तव्यतार्थित्वादिति अत्र पंचम्यंतयोः सामानाधिकरण्यात्कथं भावाकांक्षैव प्रकरणमित्य
वसीयते असंयुक्तपदं वा फलाकांक्षोपस्थापकं न तु सन्निपातिनिवारणाद्यर्थमिति वार्त्तिक
टीकायां प्रपंचितमतः फलमिति विवक्षितसंख्यो निर्देशः उपयन्तपत्रेति एतदर्थं वादसंव तीरु
ष्टः यद्यर्थः अर्थवादिकमिति येषु निष्ठा सन्ति न एतावतावरूपेषु रितिः द्विपरिणामेनेत्यर्थः
उच्चार्यमाणेऽपीति यद्यपि शान्त्यामित्युच्चारणकर्मत्वं शक्यमिति तथापि शब्दकर्मभिन्नेऽर्थे तदुप
चर्यते एवमग्रेऽपि सिद्धमनुष्ठेयं अन्यादृशसिद्धत्वस्योपकारेष्वसंभवात् लिंगादिति प्रकरण
सहितादिति शेषः प्रकरणादित्यनंतरमेवेति लिंगादभिधानक्रियार्थत्वे वगते तद्द्वारेण मं
त्राणां प्रकरणेन ग्रहणं संभवतीति नान्यथा प्रकरणगृहीतस्योच्चारणं तायाअप्रसिद्धेरितिन

कर्तव्या१

२ असत्त्वेऽप्रसिद्धेर्लक्षणापत्तिरिति स्यात् २

वत्या

हाशयं उपहोमादिकतिप[illegible]यांगोपदेश विकृतेर्वारणाय समर्पणेति यत्र नेति नच दर्विहोमे
षतिप्रसंगः तेषामंग[illegible] सूत्वेन स्पष्टत्वाद्याधानमन्त्रोपदेशिकत्वात् नचात्रेति अत्र सौर्ये यत्र हृ
ग्निहोत्रादिनामधेयवतो नामत्वेन [illegible] विधेयकर्मान्तरे वैश्वदेवादिपदवत् गुणविधित्वेन
प्रायणीयादिवद्यौगिकत्वे नासंभवदन्यायश्चानेकार्थत्वमिति गोत्वाद्यष्टत्वे विधिसमभिव्या
हारादुपशयेय पपदवत्पुरागाजिनयोः सोमपदवत्स्तु[illegible] वपर्यवस्यत्सामा पिंडपितृयज्ञः सि
द्धः कार्यं नाममिति वदन्निर्देशो पर्यवस्यति तत्र चोदनायां भवति तत्कृतोपस्थितिः श्रौतकृतानां
मन्त्रवादनिर्देशकर्मा मन्त्राय नेयथेषावेका हेतुं विश्रुतिं करोत्यनन्तरं समानमितरच्छ्येनेनेति
अत्र हि यदिमाप्यमनन्त मनुष्यस्येतर पदं पूर्वोक्तेषु सदृशमसंनिहित मपि शेपनवैशेषिकं

112

वचनर२

ता४

कट

तर२

२२

कवितोदंनादि विधत्त इत्युच्यते पद्मावार्यमतानुसारेण तूरपदं पूर्वोक्त विष्णुन्यादेरवशिष्टस्य
प्राकृतांगस्योद्देशपकं समानपदं प्राकृतांगसं द्रव्यस्वरूपेण गत ओहितो भीबादेर्विकारस्य
विधारकमित्याम्नायते सर्वथापि सुलभानत्रनेषामुपस्थितिः प्रत्यक्षं वचः कथं नोपदेश इति
तुल्यमममात्रं अन्यत्रविहितानां धर्माणां न तत्संबंधापरित्यागेनान्यसंबंधप्राप्तिफलकस्योपदेशा
स्यास्यातिदेशत्वात् तद्धि परीतस्योपदेशत्वात्. एवं यत्रैतद्ब्राह्मणान्येव पंचहविंषि एतद्ब्रा
ह्मणएककपाल इत्यादौ सार्थवादकेसांगविधिककांडवाक्यब्राह्मणपदं अपेणादंगशास्त्रा
लोमनिर्देशो बोध्यते तत्र नत्कृतोपस्थितिर्ज्ञेया अत्र तु न संभवति तादृशोपस्थापका
भावादिति शंकितुराशयः तृतीयमतिदेशप्रकारमाह उपमितेति एके नित्यमुभवादितोपस्थ

नमागधेयेनोपधावति तुइनं अग्नेयेध्रियस्व अग्निर्मूर्धेति वाक्यशेषमंत्रवर्णवलेन वेहृनश्रु
तन्तद्भिनयोस्तथात्वेनान्वयादित्याशयः माध्येति यद्यपिकरणत्वाभिमतोयजिर्नक्र
मः देवतासंवंधोप्यापत्याकांक्षातिदेशश्राप्तयजिनैवनिवर्त्तनामितिरोको देति तथापियु
गपदुपस्थितयोर्विभिन्नान्वयासंभवादितिकर्त्तव्यतातिदेशस्यान करणविषयत्वं श्रुतिदे
शवाक्यांतरकल्पनाद्वा आघवेनयजेरध्याहारोनिर्वपतिनानदर्थलक्षणावांगीकर्त्तुमुचिते
त्याशयेनेदं एतेनाश्रुतफलकेविश्वजिदादौफलातिदेशोपिनिरस्तः एकशब्दोपस्थितयो
र्विधेयोद्देश्यत्वानुपपत्तेश्च नचैवमपिवादकथार्थवादेनैवफललाभात्कल्पनानुपपत्तिः
वाचेकर्त्तव्यत्वातिदेशमनंतरेणार्थभावनेतिकर्त्तव्यतायाएवातिदेशाश्रयणात् अनए

113

वयावज्जीवनियस्य स्वर्गकामादेरधिकारिणः प्रधानसाहित्यस्य गुणकार्मनां वाप्रवृत्तिः

स्तुत्यारब्धश्रा लनकार्य पृष्टभावेन यानदनिदेशात् श्रुशाकृतेफलप्रकाशनार्थत्वासंभवः

उपकारेति ३ ऊं हेन ह्माघे· ऽप्राकांक्षायोगपतासंन्निधिवशात्साकृतोपकाराएवविरूत्वा

स्वीक्रियंते ऽप्रामैवदिति एतेना पिवोदनालिंगादेशव्याख्यानाः तेयथा ऽप्राग्नावैष्णव

मारुतप्रभृतिषु श्रौषधद्रव्यकानेकदेवत्ययागेषु ऽग्नीषोमीयेन्द्राग्नयोर्धर्माः तत्रापितद्धि

तपदाक्षरसंख्यासामान्यं व्यवस्थापकमितिवहवोयाज्ञिकाः सोमेंद्रेवयोस्त्वियोरेवधर्माः

देवतात्वाधिष्ठानसा मान्यस्यतत्संख्यासामान्याद्बलीयस्त्वादित्यपि केचित्· पञ्चामिक्षयोःप

त्ये४

स्मृति४ प४ ३।३ ति४

सः ॥ शास्त्रान्तरपशुप्रभवत्वसामान्यात् ॥ आमिक्षायाः पयस्त्वात् । मधूदकयोराज्यस्य वर्णसामान्यात् । द्रव
त्वस्यापि कथंचित्तुल्यत्वात् । ननु प्रजापाम्यशनरूपत्वे चरुपुरोडाशेन विषदत्वेन चोदधर्माति
देशस्यैव नत्रोवितमात । अग्नियेपि पयसि नाग्नेयस्य शब्दद्वारककर्मसमवायिदेवतासा
मान्यात्स्वरूपकर्मसमवायिद्रव्यसामान्यस्य प्राबल्यात् । पर्वं निवारकं कल्प्यार्थान्तरतीयस्थान
गते पिवाहस्यान्ये ॥ अन्याधीनप्रतिपत्तिकस्थानसा म्यात् द्विलक्षणदेवतादिसामान्यप्रा
बल्यात् । पशुयागे अग्नीषोमीयपशोः एकादशिनेषु सवनीयस्य सोमत्वसामान्यात् । सोत्रा
मण्यादिपशुगणेषु तेषां एकाहेषु द्वादशाहेव सोनिष्टोमस्य सामान्यात् साहस्रसाध्यस्काद्
संज्ञायोगिष्वेकगण त्वर्वन्तिशेकाहेषु तु प्रथमस्य धर्मवनन्तरेषु गणेषु द्वादशाहान्तर्वर्त्ति

अव्यक्तत्व २

अतान्यथासिद्धलिंगेभ्यश्च १

दशरात्रस्य गणत्वसामान्यात् [illegible] तत्राप्रियजनितचोदनाचोदितत्वनिमि
त्ताहीनसंज्ञासामान्यादहीनात्मकत्वं तद्धर्मविशेषाहादेश्चिद्राश्नादिषेकादशरात्रान्तेषु यथासंभवम
तिदेशः नवजनकसप्तरात्रे चत्वारि त्रिवृत्सहांस्यष्टोममुक्त्वा नीति विहितेषु हि स्तुत्रिवृत्त्वसा
मान्याहीकाद्यादृत एवं विधान्तानां हानिः शंक्या अग्नेनस्तोऽप्यागतसंख्यासामान्यात्प्रधानगत
गणत्वसामान्यस्य बलीयस्त्वात् आमनोपाधिचोदनाचोदितत्वनिमित्तसत्रसंज्ञासामान्यात्सत्रा
त्मकत्वं तद्धर्मातिदेशश्च रात्रयोर्दशरात्रादिषु गवामयनपर्यन्तेषु तस्मादितरसंवत्सरेषु षट्
त्रिंशद्रात्रे षडहा भवन्ति चत्वारो भवन्तीत्यत्र तु षाडहिकविधानानां हानिर्द्वादशाहिकमपेक्ष्यत
स्य शीघ्रगतीतिः [illegible] नीत्याशतोक्थ्यं भवन्तीत्यत्रोक्थ्यपदवाच्यसंस्थया संख्यायाश्च वि

लि ३

रस्त २

शिष्टेषु ग्रहः स्तु विहितेषु दृश्यत्र विधीयतां नाष्टन्याग्रवन्नेते तथापि प्रवृत्तिदशकमतिदेशप्राप्तयोरभितो
त्रिष्टोमयोरंस्थाने यज्ञस्य विनियोगः स ऽप्योतिष्टोमिकोऽस्य विषय एव तृतीयाद्य दशाहे के
ष्वेव गर्गत्रिरामयनिकस्यास्तु तस्य विनियोगस्तु ज्योतिष्टोमगणानां तदुत्पत्तिमपेक्ष्यैव प्रवृत्तेर्योवित्यादि
त्यूह्यं प्रकरणादिति यद्यपि संनिधिपठितयोः शेषशेषित्वाभिमतयोरुभयाकांक्षा प्रकरणमिति
नआकृतानां प्रकरणाविनियोऽप्रत्यर्शकोदयः तथापि पाठसंपाद्यसंनिधेरिहानिर्दिष्टनैव सि
त्य३ द्धिरित्यभिमानेनेयमुक्तिः स्थानात्पादे त्रिमात्रवक्तृ भोपकारत्वस्यापि वल्लीयस्त्वप्रयोजक
त्वेवीजमाह विकृतेश्चेति उपकारार्थं परार्थानाकांक्षन्तीविकृतिर्हि येषामुपकारकस्ति
स्तानताहृत्यैनान्येषामुपकारकल्पनायासेन सह तदस्याशयः स्वरूपेणोडुंवरतायाः प्रकरण

८३

याग्यत्वेपि वोदकश्रावणनियोजनविशेषणत्वेन तद्ग्राह्यत्वसंभवइत्याशयेनाह सत्यमित्यादि
ना यद्यथाहवनीयवधूयः केवलाहृष्टार्थमास्यात् तथापि यदाहवनीये जुहोतीत्याहवनीय
विनियोगविधावेवन्यायसुधायां घृहृते पाल्लाशेव ध्वानीतियूपाविनियोगविधावदृष्टु वाक्यविश
ष्टभावेनाहृष्टविशिष्टस्य कल्पपूर्वसंबंधालाभात् प्राकृतरसाद्विरोजनादिविधिष्विवैकृतोमु
वरनादिविधिषु कल्पपूर्वसंबंधाकांक्षावत्कुंशमकाने वस्कारगतित्वनुरुध्याहृष्ट्यस्येति नन्वद
वनेनिरस्तत्रेष्मान्नादिक्रियाणामाहवनीयाधर्मानांवधातनिवृत्तिभावे यो न्यायो ऽप्यधायि
सम्भवनापूपे संचार्यते देवनामंत्रयोर्दृष्टार्थयोरपि सुरव्यस्मृत्स्मृत्योस्तत्तस्तद्ग्रहासंभवइ
त्यादित्यायां नरेणडतिनिधिनिराकरणान् न वेह नत्सामंदृष्टोते· साक्षाद्दृष्टार्थत्वात्· दार्ह्यो

६१

ज्निकेपरिच्छेदारब्धपरच्छेद्वारेणानदर्थत्वादनन्याह तस्मादिति यूपशब्दवाच्यत्वेनाभिमतमह
छ्वतिरवैदिरजनादिद्वारत्वेनाभिमतानां दृष्टादृष्टानामेव तक्षाद्यत्वसंभवे नाधिकादृष्टक
ल्पनमुचितं तेषांतु वाच्यत्वं प्रत्येकं स्यात्. यस्त्विष्टानेस स्वरूपोपस्तिष्पते स यूप इति प्रत्येकंव
चनमुक्त्याश्रयणात् कतिपयसंस्कारहीनायामपि खलेवाल्यां मंत्रागतयूपशब्दप्रयोगोपपत्तेः
वाच्यसंस्काराने कत्वेपितदाश्रयकाष्ठैकत्वेन गुणवचनानामाश्रयतो लिंगवचनानीतिमंत्राग
तयूपैकत्वनिर्देशोपपत्तेः यद्वा समुदायाभिधानात् स्यात्. लाघवेन सर्ववाच्यपर्यालोचनात्तेय
च्छिद्यते यस्तस्य पतेस यूप इत्येवमेकवचनस्यापि स्वीकरणात्. खलेवाल्यां च कतिपयसंस्का
रप्रकाशकशब्दानामभावेनागत्या यूपशब्दप्रयोगाश्रयणात्. अक्षशब्दवन्नानार्थस्य यू

पराहतस्यसकृत्प्रयोगेयावदर्थप्रकाशकत्वाभावापत्तेरित्यन्यादेनदित्याशयः पञ्चितिसूपष्ट
शभावेनेत्येतावतैवाल्लंकर्त्तव्येनियोजनयह्लंमूलशंकापरिहारार्थं पत्याम्नानादिति॰ आम्ना
नस्यप्राप्तिरूप्यंनत्कार्यकार्यर्थान्तरविधायकत्वेनादृष्टार्थान्तरापेक्षकत्वंवानेनसप्तदशशरा
वस्त्वतुर्भगतित्वसमात्वभेनेत्याहेमुष्टिनिर्वापाज्ञाल्वेमादिप्रत्याम्नानत्वसंग्रहः अर्थलो
पादितिसाध्यसाधनयोरन्यतरासंभवादित्यर्थः नेनपवमानेष्टिषु आवनीयाग्निहोत्रह
हवण्योर्बाधस्यार्थलोपनिमित्तत्वसंग्रहः प्रतिषेधादिति निषिद्धेतात्पर्यकाशास्त्रानुइ
त्यर्थः नेनैनैरुदाहृतनपर्युतमत्वस्यनहोतारंवृणीतइति अस्योडांतानित्यासंतिष्ठतेइ
त्येवं [illegible] हृत्वानस्त्रातरसंस्यप्रतिषेधत्वसंग्रहः नहीति नचैवंप्राकृतवाधस्यप्राप्तवा

मैव१ चे१

भाट्ट०
११७

117

त१ पि२

बाधकत्वादित्वं कापि न स्याद्बाधकवैकृतस्य सर्वत्र नातिदेशमानविनियुक्तत्वादिति शंक्यं पत्रैकत्रिकादौ
प्राकृतेनैव क्रमादिना पाठशास्त्रेणापि प्रकृतिशाखस्य त्रिकं दत्वादेः प्राकृतस्य बाधो दशमे निरूपिते
तत्रैव प्राकृतबाधस्य शास्त्रबाधत्वेन वक्तुमौचित्यात् न हि तत्र बाध्यबाधकयोस्तातीयसमानेऽविकृ न२
तो विनियोगः विकृतेनातिदेशमानासंभवात् प्राकृतमानानामंगाविकृतावविनियोजकत्वात्
विनियोजकत्वेनात्रिकं दत्तेनैव क्रमबाधापत्तेः एतेन शास्त्रबाध एवेत्यवधारणस्य नानर्थक्य
मिति बोध्यम् ननु शरस्तुक्तविकृतावतिदेशस्याकुशेन रविषयत्वमिवैकत्रिके तिदेशस्य त्रिकं देन
रविषयत्वं वाच्यं अन्यथा शास्त्रबाधस्य बाधायोगात् ततश्च शास्त्रबाधो रा करस्थ तयानिविष
यत्वं स्यादत आह वस्तुतस्त्विति अनन्यथासिद्धान्तीति ननु प्रतिपक्षशास्त्रदर्शने सत्यपि वैधाप्राप्तिः नाघः

ति१

अनुभवविरोधात् न हि शरशास्त्रं पश्यतः कुशकर्तृत्वमुन्नतो बोधो ऽतिदेशादुदेति न द्वितीयः अतिमपश्यतो लिङ्गाद
पि भ्रान्तिसंभवेनाकृत्वा लिङ्गबाधस्यापि ज्ञानमूलबाधत्वापत्तेरिति चेत् न प्रतिपक्षं पश्यतोऽपि पुरुषस्य सर्वोऽन्यसाधारणा तिदेशा
न हृत्कार्यमिति बोधस्य कुशकर्तृत्वमुन्नतोऽभ्युत्थापकस्य जन्ममात्रेण व्याप्तिविभ्रमव्यवहारोपपत्तेः न च अतिं पश्यतो लि
ते४ ङ्गाता दृश्यविज्ञप्तिः शक्यते वक्तुं यदा शरशास्त्रदर्शनेऽपि कुशांशे बाधितस्यापि प्रतिदेशस्यांशान्तरप्रामाण्यार्थमभ्य
भ्युपगम्यते नाभ्युपगम्यते वा विरोधि अतिदर्शनेऽपि लौकिके अतिसत्त्वमिति बाध्यत्वाभिमतशास्त्रप्रामाण्य
नित्यां बाधवैचित्र्यं एवं च यो वा पर्यवस्ये पूर्वदौर्बल्यं प्रकृतिवदिति न्यायविषये प्राप्तबाधव्यवहारोपपत्तिः आह
भवदेवः प्राप्ताप्राप्तशङ्का प्रशस्त्रगोचर एव न बाध्यविषयगोचरत्वबुधातत्वमिति नन्वेवं सदा न्यस्यानु
याजापूर्वार्थित्वे यत्र तत्रस्थेनाप्यनुयाजापूर्वेण तत्प्रयुक्तेन यथैव लोके निर्ज्ञातप्रकारमवधार्यते प्राप्तसंभव
त्व२ स्येषस्यो लूखलप्रोक्षणादिः कृत्वपूर्वसंबन्धः कृत्स्नः तथा प्रकृतो निर्ज्ञातप्रकारमनुयाजापूर्वादि प्राप्तसं
भवेदेष पाः १ श्रुता याः अपि अन्यथाहवनीयादिश्यावाहनस्य समागादिरपि कनु सर्वेधानस्थिर्यदृते आह भवदेवीति
ते ता

×न्तेयु (नायदस्याविशि[...] पर तमे गर्कं नस्यादितिशंकायामाक्षानन्तवोधितेधर्मा[...]दतस्येति ननूत्पत्त्यवाकेहृतामादि विधियत्नाः×२
×इमांतत्तसंसर्गस्यप्रकृतानांगत्वेनावगतस्येह दधिसंसर्गेणबाधात्रु(थं भेदे) वस्तामायत्तामाह×२

याः

यदिहीति न तु तत्र खादिरतायाः औदुम्बरतायेव द्रव्यान्तरासंसर्गस्य दधिसंसर्गेण बाधः संभवति द-
ध्यन्यद्रव्यासंसर्गस्यावर्जनीयत्वात्पानादिरूपाशयः निर्गुणत्वं विहित[...] द्रव्यान्तरसंसर्गसाहि-
त्यं ननु प्रकृतेऽपि तान्नपेक्षानुयाजजन्य नयावगतस्यापि कार्यस्य प्रयोगे तत्सापेक्षतज्जन्यत्वांगीकर-
णात् प्राकृतकार्यसाधनतयानूयाजाम्नायप्रतीतिर्हि देशस्यस्ववोध्यसाधनतानिर्वाहकत्वेषतान्तु
पात्वागपर्यवसानान्न तदनूयाजोक्तप्रधानविधेनैराकांक्ष्यं संभवतीत्यत आह इत्यलमिति एवं
हि सर्वेषामपि प्राकृतानामंगानां वैकृतोपहोमादिनिरूपितक्रमसाहित्यादिसापेक्षतया प्राकृतोपकार
साधनत्वादुक्तरीत्योपहोमादीनामपि प्रकरणाविशेषत्वं स्यादित्याशयः तथापियन्नेति एतेन वैकृ-
न प्रधानविधिप्राकृतांगधर्मविध्योरंतत्वे विहितस्यापि प्रकरणाविनियोगो दर्शितः अनेका

118 प२

थे[illegible]तार्थेष्ववान्तरतात्पर्यवता[illegible]मनेकवाक्यानामेकवाक्यत्वकृद्यन्महातात्पर्यमपि प्रकरणपदेनोच्य

ते यद्विषयं तथा परे ब्रह्मणि प्रकरणित्वव्यवहार औपनिषदानामेतदेवाधिकृत्य इत्यप्युच्यते तथा कर्त

व्यताकांक्षाभ्यामस्य प्रयोकांक्षिस्वाश्रययोः संबंधकारिण्यौ प्रकरणपदेनोच्येते यन्मन्त्राग्रहणेन

वतानां सोमयागसंबंधसिद्धिः मूलेत्वनयोः प्रकरणयोरुक्तरूपत्वेऽपि विनियोजकत्वाद्विनियो

गप्रस्तावेन हि नियोपेक्षणमिति बोध्यं संनिधिस्तु स्थानत्वेनैनेह प्रकरणत्वोक्तिः तैरेवेत्यनंत

रमंगेष्वाप्य इति योऽयं ननु अवांतरप्रकरणं एवकारो भिन्नक्रमः अंग एवेति ततश्च सन्नपि सा

मिधेन्यंगसंदेशमध्यपतितेनेनागानि विन्मंत्रैर्यबहिर्नोपवीतस्य न सामिधेन्यंगत्वमिति सूचितं भ

ति अथ प्रकरणस्येति कर्त्तव्यताकांक्षात्मकत्वादितिकर्त्तव्यतामन्तरा यथाजादिभावनायाः इति

फलेतिर
द्वि

निरूपणीय
तया

४ क्वचिन्नव्यवहारस्तु भाक्तः

२१९

119

क्वचिदिति १ साकांक्ष १

कर्त्तव्यत्वांतसापेक्षत्वेऽनवस्थितेतिकर्त्तव्यतालाभासंभवेनांततः कर्त्तव्यतासाकांक्षेनयाऽग्रामा
र्णस्यादिति निर्वर्तनं प्रत्याह नचेत्यादिना विशेषेति अग्निहोत्रअंवकनारिष्टानां धर्मवत्त्वाविशेषादि
ति भावः नेनैव स्वरूपमभिधाय नेनैव तदभावः आकांक्षाऽभावः विहृदिति निरूपितमेतदध
स्तादस्माभिः राजसूयपदस्यापि योगेन सोमयागमात्रविषयत्वात्माख्यानपारतंत्र्येण सर्व
यागवाचित्वमनत्र्याह नचेति क्रियात्मन्यभिषवे यागनिरूपिधेयत्वस्यानुपपत्त्यासंभवात् त
त्प्रयोगमध्येनुष्ठीयमानत्वेन तदाधेयत्वं वाच्यं पश्वसोमयागमध्येनुष्ठीयते क्रीयत एवासावि
ति पशुसोमयागप्रयोगमध्येपीति योगसाधारण्यसंभवेन केषांचित्प्राधान्यत्यागत्वचितइति संभव
नमपि परिहारं स्पष्टत्वादुपेक्ष्य प्रौढ्यापरिहारांतरमाह नहीति धात्विति कातिदेशे स्यात् अधा

ता

२१९

पूर्वकथंभावोपशमेपि परिहारं स्पष्टत्वादनुपेक्ष्य फलापूर्वापरपर्यायराजसूयापूर्वकथंभावोपशमात्संभव
ति तदात्मनाप्रकरणेन विदेवनादिग्रहः इति वदंतं भवदेवं प्रत्याह नचेति भावनाहीति कर्तव्यतामपेक्ष्य
तेनापूर्वेन वर्तध्यानभावनाभ्यो राजसूयभावनाऽभ्यासित यतश्चाकांक्षाभेदः स्यादिति भवत्स्वित्रिविध्यवगता
नामेव भावनानां प्रधानविधिना फलसंबंधबोधनादित्याशंक्य नन्वेकस्मात्प्रकृतपदयत्नभावनायाः इति
कर्तकर्तव्यतात्वेन तत्तज्जद्यसूत्रोक्तधर्माणां नत्तज्वाख्याध्ययनांगभूतोपनयक्रिनुयावस्थेति न्यायस्तु
धायामप्यधायि तत्रश्चैकाविभावनास्तु करणतावच्छेदकतत्तज्जद्यसूत्रोक्तस्वरूपभेदेनानेककथं
भावाकांक्षावनीत्युपेयं अन्यथाव्यवस्थयाऽनेकेति कर्तव्यतास्वीकारानुपपत्तेः तद्धस्वरूपेपि
तत्तद्यागत्वराजसूयत्वाख्यकरणतावच्छेदकरूपभेदेनाकांक्षाभेदः स्यादत आह कंपेति धातिहि
करूपैः अन्येकसमाप्ता कालमित्यनेनतरं वा न्योतिशेषः वएवार्थेसिवराजसूयत्वावच्छिन्नाफलवाक्य

त

नाप्य यत्नप

120
नगा४

प्रतीयते ननु प्रातिस्विकरूपावच्छिन्ना नत्वेतावता प्रातिस्विकरूपावच्छिन्नाकांक्षातोराजसूयत्वावच्छिन्नान्यास्ती
त्यर्थः दृष्टान्तादैषम्यं द्योतयन्व्यतिरेकमुखेनोक्तमर्थमुपपादयति यदीति एकापि ह्युत्पन्नभावना
तत्तद्रूप्यविधिभिर्विधीयमानानन्तरस्वाध्ययनरूपाणि विभिन्नभाव्यानि स्वीकृत्यं विभिन्नभाव्यनिरूपि
ताविभिन्नाः करणतानुयंतो आक्षिपति विभिन्नकरणतानिर्वाहाय च विभिन्नकथंभावाकांक्षाभियुज्य
तइत्ति युक्तं न चैवं प्रकृते सामान्यविशेषरूपावच्छिन्नकरणताभेदसाधकस्तन्निरूपकफलभेदोवग
म्यते सन्नप्यपूर्वभेदः शास्त्रावगतफलकरणतानिर्वाहकव्यापारकोटिप्रविष्टपरस्परसापेक्षितानाश्रितन्त्र
न करणताभेदं कल्पयितुमलं अतश्चैवं याएवोत्पत्तिवेलायां अनेकगामिनः करणतास्ता एव संग्रहश्रा
वं तेराजसूयेनेति याएव तत्र सर्वप्रक्ता विभिन्नाकांक्षास्ता एव फलसंबंधोत्तरं सकृदुच्चरितेनैकयासमि

इति

१०९
१२०

उक्तं चाहर्गणेऽकस्विंद हृत्सुहृत्त्रपच्छेदे नाहर्गणाच्च त्रिरिति सिद्धांतसिद्धेः षष्ठे ऽद्दशे विषये साधनानां फले
समुच्चयेन समुच्चितानां साधनत्वमिति उक्तं चापूर्वाधिकरणे तेमिश्रैः भिन्नापूर्वश्रुत्यान्यपि संनिपाति
न दिनराणि त्रिंगात्मकेनैव कथंभावेन गृह्यंत इति अतो न राजसूयत्वेनांकांक्षातरमवलंब्य विदेवना
दि विनियोजकत्वप्रकरणसमर्थनं संभवतीत्याशयः विनियोजकं प्रकरणेन्नायकं इति संदंशइत्यस्यादिः
निवृत्तत्वात् वगतो विहितराजसूयकथंभावः पूर्वोत्तरवाचनिकांगैरेवोन्नीयते पौरोडाशिकसमाख्या
न श्राह्मणाम्नातानां च प्रयाजादीनां समाख्याप्राप्तमपि केवलौषधयागांगत्वं हरीक प्रकरणेन स
त्राप्यो पांशुयाजार्थत्वसिद्धिः देशेति प्रधान विप्रकृष्टत्वे विशिष्टदेश इत्यत्वमिति यावत् तेन सामा
न्यशब्देन प्राथम्यादि साद्दश्यविवक्षायामभिन्नदेशत्वात् संग्रहः अभेदविवक्षायां संदंशदेशत्वात् संग्रहः

प्रक

प्रकरणसमाख्याविरोधे हेतुः

रतिपरास्तं क्रतित्वं च पठितत्वानुष्ठेयत्वान्यतररूपेण विवक्षणीयमित्याशयेनाह नचेति पंचमपंतस्याद्विधै
वेत्यनेनान्वयः नात्रविधेयलक्षणद्वैविध्यं प्रति पंचमप्रमेयमुद्दिश्यमिति योनयितुं क्रमं विशिनष्टि
विनियोगस्येति आचार्यैः क्रमलक्षणत्वेनोक्तस्य कथमवगतास्थानलक्षणत्वमवधानआह स्थानमि
ति प्रधानविपरिवृत्तिविशिष्टपाठदेशस्य हेधोपपादयति पाठेति सइति नचयाज्यानुवाक्यासमाख्या
सहितलिंगादेवास्यविनियोगस्यसिद्धेः क्रमस्याकिंचित्करत्वात्स्वप्रकाश्यदेवतायोगिन्यक्रमपठिते
यागांतरेपिमंत्राणां क्रमं विनानाम्नामंगत्वप्रसंगात् समाख्यानः पूर्वप्रवृत्तक्रमवशेनतु निर्ज्ञात
सामान्यसंबंधोपजीवनेभवतिलिंगादुक्तविनियोगसिद्धिः नचैवंयाज्येतिसमाख्यायाश्चाकिंचित्करत्वं
आग्नेयक्रमेपठितस्याग्नेयमत्रद्वयस्यलिंगादुक्तविधसामिधेनीत्वेप्रधानयाज्यात्वेवप्रसक्तेन

स्थानमि ४६

121

याया ज्ञात्वा नियमात् अन्यदेवत्यप्रयोगक्रमे पठितानां आग्नेयमन्त्राणां तु समाख्याबाधेन लिंगक्रमाभ्यां
सामिधेनीकार्य एव विनियोग इति बोध्यं शाकुने तु तत्कार्ये न विहितानीत्यर्थः न्यायसुधाकृन्मते तु
यथाश्रुतमेव साधु मन्दं रोचति शाकुनाङ्गसंबद्धाङ्गविधौ समाहृतशं गप्रधानविधौ वा मिथ्येन पठितानामि
त्यर्थः नन्वत्र यमज्ञमग्निषोममालभेत तेनोपि व समर्थ्य अहानिसवनीयो यतः पाठसादेश्यात्तदङ्गभूता
धर्माः किमिति न स्युरत आह नचेति न त्यश्वपूर्वार्थत्वं सुत्याः पठिते नानु विधेयम् न कालसंबन्धे वादेय
नाश्विनं ग्रहं गृहीत्वेति वचनेनोत्पन्नं सवनीयागमनूद्यानेन वचनेन वपयाश्चातः सवने वरंती
त्याद्येकवाक्यतापन्नेनोपादेयपुरोडाशस्य प्रकर्षोक्ति गुणविधानान्नात्रोत्पत्तिः सवनीयस्येत्याशयः ५३
अग्नीषोमीयपशुस्त्वेवं न तर्हि पाठसादेश्यात्तदङ्गत्वं स्यादत आह अग्नीषोमीयेति यद् सोमयागः
प्रकरणेन पशुधर्मा गृहीतुं न शक्नोति तर्हि नर्थक्यात् तदंगन्यायेन तदीयसकलपशुयागाङ्गत्वं

तथो स्यादित्याशंक्याह अत इति स्थानाख्यमानानुरोधेनन्यायबाध एवोचित इत्याशयः उभयोः प्रकृतिवि
विकृत्योराह विषोः किमेकस्मिन्कर्मणि विधिप्रयत्सोर्विधानं द्वयातिरेशंख्र वीषिनेत्याह तत्रेति इत्य
वाचकत्वेनेति विशेष्यत्वाभिमतमत्र द्व्यशब्दार्थः एवमुदाहरिष्यमाणवार्तिकेपि स्वतोप्यवहारायो ग्य
मपि सामान्यं विशेषाक्षेपेण तद्योग्यत्वात् प्रयोजनवद्भवेन्नत्राह सर्वैति गोमान् गोत्वं गव्यामित्यादी
नामित्यर्थः तदंतरेण संबंधाभिधानमंतरेण विशेषस्याभावात् अप्रतीतेः गोमानित्यत्रैव हि म
तुपा पुरुषाभिधानेभवति स्वामित्वधीः देशाभिधानेत्वधिकरणत्वधीः उभयानभिधाने तु न को
पि संबंधविशेषः प्रतीयेतेत्याशयः नन्वौपगवाग्नेय गव्य गोत्वादिशब्दानां तावन्मत्रतीत्यनुषासन
वशेन प्रकृत्यर्थनिरूपितापत्यत्वदेवतात्वविकारत्ववृत्तित्वाख्यसंबंधविशेषवाचित्वमसत्युपि

संवंधांतराभिधानेशक्यत एववक्तुं गोमानित्यत्र तु विशेष्यविशेषेनान्वयग्राहकत्वेन पराभिमतं
यष्ठ्यैत्रादिपदांतरसहकृतेनमतुपाशक्यत एव संवंधविशेषाभिधानमत आह नहीति यथैवस्कृषा
दिशब्देमात्रान्वयप्रतिपत्तिमनपेक्ष्य पुत्राद्यप्रतिपत्तेर्न तन्मात्रवाचित्वं तथा यौगिकशब्देभ्योपि
संवंधिप्रतिपत्तिमनपेक्ष्य संवंधाप्रतिपत्तेर्न संवंधवाचित्वमित्याशयः नहि तद्देववविशि
ष्टवाचित्वं नेत्याह अनइत्यादिना एवं सर्वसमास्यासु दौर्वल्यहेतुमभिधाय लौकिकसमा
ख्यायाश्चातिदौर्वल्यं दर्शयितुं वैदिकसमाख्यादौर्वल्यं स्पष्टयति होत्रित्यादिना तु शब्दो वक्ष्यमाण ८
माख्यावैलक्षण्यार्थः नहीति परमतमवलंब्येदं वैश्वदेवीपदवत्तद्धित वहुव्रीह्यादेर्विशेष
वाचित्वे तु पदांतरसापेक्षार्थबोधकत्वेन दौर्वल्यं समाख्यायां बोध्यं अस्तिकेत्यादिषु समजाती

123

येष्वपि बलाबलत्वं यथाज्यावेक्षणादिषु सामान्यसमाख्याप्राप्तमध्वर्युकर्तृकत्वं विशेषसमाख्याप्राप्तेन
यजमानकर्तृकत्वेन बाध्यते ॥ अस्ति चानर्थक्यप्रतिहतत्वे विपरीतमपि बलाबलं यद्दशेनुमन्त्रेपु
भृधर्माणामग्नीषोमीयार्थत्वमुक्तं द्विविधबलाबलाश्रितोपि च प्राप्तबाधः शक्यः प्रतिपत्तुमाणेवं
संति चान्येपि प्राप्तबाधाः यथा नित्यं पात्रदश्यं साप्तदश्येन वैश्यत्वनिमित्तकेन नित्यश्चमसः का
म्यगोदोहनेन पूर्वनैमित्तिकं नित्यनैमित्तिकेनेत्यादयः विस्तरभयादाकरप्रसिद्धत्वाच्च परं नै
तन्निरूपणमत्र नंन्यायतंत्र्याह इति संक्षेपः इति एवंरूपेणेतिनचांगसत्वयोगविधिर्गृहीती
तिश्चाति स्विक विधीनामेव विनियोजकत्वमुक्तं ननु देकवाक्यतापन्नप्रधानविधेरितिवाच्यं
तादृशवाक्यादंगत्वेनावधारितं प्रयोगविधिरनुष्ठापयतीति तदसिद्धायातम् ॥ अन्यथा वाक्या

सुत्वरनै
मित्तिकेन

कल्पनयाङ्गकरणविनियोजकत्वस्योच्छेदप्रसंगात् तान्यंगानीति कृत्वंगानीत्यर्थः संख्यादीनीत्या
दिनालिंगसाहित्यक्रमसंग्रहः यद्यपिसाहित्यक्रमयोर्नकारकत्वं क्रियायांऽन्यादिवत् तथापि
कारकीभूतपदार्थावच्छेदकतयास्त्येवांगत्वं तानीयमानवोध्यं पांचमिकमानानि तु क्रमोपाकृता
नुपपत्तुज्यं तेन विनियोगाऽनि वोध्यं तानि वेति कृत्वंगभूतानि जातादीत्यर्थः तेन खदिरत्वगोदोहन
पंचवर्षत्वप्रभृतेरदृष्टार्थत्वेपि न दोषः एतान्येवेति उक्तैर्विधानादिति कृत्वंगानीति यावत् तेन
गुणकर्मलोपाधोस्यप्रधानकर्मलोपदर्शदर्वस्यमाणव्यवहाराभावेपि न क्षतिः कर्मांगेति द्रव्या
दिगतंकर्मापूर्वसाधनत्वं यत्राहेश्येनावच्छेदकमित्यर्थः तेन वपनादिवज्ज्योतिष्टोमादेः पुरुषा
देशेन सत्यपि विधाने निराससिद्धिः प्रतिपत्तीनामुपलक्षणं सूक्तवाकादिकृतदेवताप्रकाशनादेः

उपयुक्तेति अर्थांतपदद्वयंभावप्रधानं कर्मेति प्रथमांतंचषष्ठ्यंतत्वेनबोध्यं तच्चेतिकारकांतपदद्वय
मपिभावप्रधानं अवघातादीनितत्तत्संन्निपत्योपकारकमित्यर्थः तस्यावघातस्यसंन्निपत्योपकार
कस्यसतइतिशेषः प्रोक्षणेति प्रोक्षणादेःसन्निपत्योपकारकत्वमित्यर्थः उभयोःपक्षयोः तत्रादृ
ष्टार्थत्वेतुल्येपिद्वितीयेशेतत्संन्निपत्योपकारकत्वसिद्धिः तस्यावत्त्वजातिस्वैक्यकात्कुर्वित्यादिप्रयो
गवशेनसाधनत्वावित्वात् अतस्त्यपि [illegible] तस्मिन्नीह्नितानीभिनसाधारणेनस्वप्रकृत्यर्थप्रा
धान्यानियामकत्वात्· संन्निपत्योपकारकत्वे वंशयंभाविप्रकृतिगता पूर्वसाधनलक्षणानोऽसं
ज्ञातविरोधित्वन्यायेनश्रेयसीतिभक्तिगतसाधनलक्षणांस्वीकृत्याराद्उपकारकत्वस्यवक्कु
मोवित्यात् यत्तच्चेति पूर्वदलेनविपरिवर्त्तमान[illegible]यागानुतरदलस्थयपाजिनात्रघसमुच्चिता

124 याः

त्वे

म्यंत

निष्ठजापूर्तिवद्विकल्पितसमर्थ[illegible]द्वयं तत्कल्पितपर्वसामान्यं चात्र विधीयते न वेष्टिषु तिदेशेनैव तत्प्रा
प्ताद्विधि वैयर्थ्यं । आग्नेयविकृतौ विकल्पस्य दर्शपूर्णमासविकृत्योः क्रमेण पूर्णमास्यमावास्ययोः
सर्वविकृतिषु सर्वस्य कालस्य प्राप्तावैतद्विधिमन्तरेणोऽप्राप्तेः क्रमः इति भेदः उपकार्योपकारकभाव
नियामको धात्वर्थनावच्छेदकीभूतफलाश्रयत्वादिः संबंधो द्वितीयार्थः स्यादित्थं [illegible] हारादुपस्थि समभि
तत्त्वपूर्थः कल्पन इति नयोर्हि तादृशः संबंधः एकादिकरण्यादिः न समशब्दादुपस्थितत्वे तिभावः
वाक्यमेवेति विना विद्वितीयया स्थान्वोक्ति न तस्मात् प्रोक्षणस्य संस्कारत्वसिद्धिः प्रकृतोदाहरणेन
सामर्थ्ये किं विकल्पत्वमभिप्रेत्येदं तदर्थमित्यनंतरमेव निशेषः कत्वर्थमित्यनंतरमविमवनीति
एवमन्त्रेपि बलवता विहितप्रधानांगत्वेन विरोधांगांगत्वं बाधितं तु सुविनि[illegible]गविरोधि न च द्वारेदमर्थ्ये

मन्त्रवैदिकमर्थेन विरुध्यत इत्याशयः इष्टादीति स्वनिर्वर्त्तककारकमित्यर्थः केवलं फलासंयुक्तं तु इष्ट
निसंन्निपात्यमिप्रायमेतत् आरादुपकारित्वं तु प्रथमं प्रधानभावनान्वितानां यद्यपि तद्वाक्यान्वया
पूर्वकृतत्वकरणान्वयः तथापि न फलार्थत्वं क्षणिककर्मणः कालान्तरभाविफलार्थत्वस्य निर्वाहा
यापूर्वो कल्पितेऽपूर्वे तु व्यापारसाध्यं तदानुषंगिकं तु फलजन्मेत्याधिगमनवन्तरस्थेतन्सितादर्थ्येनैव कथ
मितानि कर्त्तव्यताकांक्षोत्थानात् अंगेष्वपूर्वप्रयुक्तत्वनिरूपणस्य फलमाह अत एवेति फलप्रयु
क्तत्वस्य मुदाहरणायैव क्रमः तो हि हेनोन्याथ्यानरस्य अपक्षते हि मंत्रो हि प्रयोगान्तरालिति तथा हि अ
भिदेशकालस्य कार्यनिमित्तोऽन्यथाभावकः स चतुर्विधः संस्कारोद्दृः सामोऽदृः प्रयोगो हि मंत्रो
हृष्वेति तत्राद्यो ब्रीह्यादौ दृष्टो क्षालनादेर्वैकृतिनीवादावनुष्ठानं द्वितीयोऽपि च तस्य पुनर

यंतरंसामकवत्पादावनिर्दिष्टस्यानुदीयसंधक्षराद्यनुरोधेन प्रदेशांतरस्थायीभावादिवैशिष्ट्यं तृतीयो
द्वादशाहिके द्वितीयाह्नो विकृतो द्विरात्रद्वितीयपत्नीसंयाजांतत्वन्यायेन रूक्षानुष्ठानं द्वादशाहे
हि चतुर्थमेवाहः सुभाद्यहः साहित्यायकविन्यदार्थेऽवस्थाने आद्ये पत्नीसंयाजानान्यहानि संतिष्ठं
तइति पत्नीसंज्ञांऽनुष्ठानान्नियम्यते ॥ चतुर्थमवकृतिकमपि द्विरात्रद्वितीयं स्वयमुत्तममिति पत्नी
संयाजान्तत्वं लभते चतुर्थस्त्वष्टविधः प्रकृतिमात्रोऽहः यथास्तर्पायजुष्टमिति यथावाद्विपशुके
गणे द्विपंचाशदनयोर्वैकृतयइति यथावाषट्त्रिंशत्संवत्सरेनरसमभुराडाश पल्लार्थविधिर्वा
पमंत्रस्यधान्यमसीत्यस्याज्ञामसमसीति यद्यपि प्रकृतो प्रकृतिर्वा विनाधान्यशब्देन लक्षणयाविका
रप्रकाशनमकारि तथापि विकृतौ मृगोसीति साक्षात् कप्रयोगेन कार्यः प्रकृतौ लक्षणायाः प्राप्ति

कत्वात् इह च स्वाध्यायेन शब्दप्रयोगेन स्यात् अन्याय्यत्वात् स्यादेतत् नरसमयाः पुरोडाशास्तत्र सवनीयदेशे
न तरसत्वं विधेयं पुरोडाशपदं तु धानादिषु लिंगसमवायेन तु कं न तत्र यांते अस्तं भवत्तरसमये तु
धानादिसाहचर्यात् न पुरोडाशेन रसं प्रकृति फलविधिः पुरोडाशकार्यत्वे धानादिः पुनः पुरोडाश
निरूपेण्यत्वाविव पेषणनिरूपणो नाधिनाधिगापो न तरां मंत्रं इति चेत् अत्राहुः नरसमये पुरोडाशा
पारत्वात् सर्वासृद्धिमाध्याद् इति न्यासहुधाकृ न तु दाहून छांदोग्य वदसिसवनीयपुरोडाशपदाश्र
वणात् पुरोडाशमात्र प्रकृतित्वेन मामं विधायतेशक्यत्वान्न मिश्रणेन न स्यात् प्रकृतित्वं संपादयितुं उक्ते
वक्ष्यं दीनस्तु तेन रसस्य पुरोडाशंवान्न शरोधादिति संभवति तु तथा विधौ न पुरोडाशबाधः संप्रवृत्तिः
न दसाधवीत्सौ मंत्रस्य घटनए व हो क्ति रिति अत्र मे तु मांसे पेषणस्यैवासंभवात् कृत्वा विंनयै षोति

क्रियेत्याद्यूहः लिंगमात्रोहः यथा वस्व्यसि रुद्रासीति मंत्रस्य मंत्रस्य साऽऽद्येक्रयार्थं च विहिते वसुरसि रु
द्रासीति वचनमात्रोहः यथा छागस्य वपाया मेदसऽनुब्रूहीत्यस्य प्राजापत्येषु छागानामिति नवैवं प
त्नीसंनह्येत्यस्य द्विपत्नीकविकृतिप्रयोगे ऊहः स्यादिति शंक्यं प्रकृतिद्विपत्नीकप्रयोगे सम्भवे
नार्थकत्वात् न च व्रीहीणां मेदेत्यस्य यवप्रयोगेऽवद्विपत्नीकप्रयोगे तस्य मंत्रस्याप्रवृत्तेर्नासमवेता
र्थत्वापत्तिः गुणभूतद्रव्यानुवचनानुरोधेन प्रधानप्रकृतेः प्रवृत्त्यसंभवात् न चैवमदितिः पाशान्मि
त्यस्य द्विपशुके नोहापत्तिः वक्तृवचनस्य द्वयोरसाधकत्वात् प्रकृतिलिंगयोरूहः यथाग्नये जुष्ट
मित्यस्यादित्यै जुष्टमिति प्रकृतिवचनयोरूहः यथानस्यैव विश्वेभ्यो देवेभ्य इति लिंगवचनयोरू
हः यथाग्राम्याग्निमित्यस्य स्त्रीपशुगणे ग्राम्य इति क्वचित्त्रयाणामूहः यथापो देवीरग्र इति

127

प्रोक्षणमिति मंत्रेण मंत्रस्य घृतं प्रोक्षणं भवतीति विधियुक्तविकृतौ घृतदेवताग्रहणे क्वचित्तु सकलप
दार्थप्रयासः यथा पशुगणे एकधात्वस्य वमितिर्मंत्रस्यैकधाकरणे एकधेति सर्वोप्ययं मंत्रोहः बहुत्वं न्याय
मपेक्षते मंत्रार्थप्रकाशनार्थानोच्चारणेनादृष्टार्थ इत्येकः मुख्यार्थ एव नेष्यावि नियोगेन गौण इति
द्वितीयः अपूर्वसाधनत्वप्रयुक्तानत्वन्यादिस्वरूपप्रयुक्ता इति तृतीयः प्रकृतौ समवेतार्थान
नुसंधित्वादिष्वदवदसमवेतार्था इति चतुर्थः तथा स्वार्थपरानन्तु येयज्ञपतिवध्वादि नितादाभिगद
स्थयज्ञपतिवद्वत्परार्था इति पंचमः पंचविधमानान्तरमानेन वैकृतदेवतादेः प्राकृतदेवता
दिकार्यापत्तिर्निर्णय इति षष्ठः नान्विताकृतैः ऊहाः प्रत्यक्षविधिनातिदेशविधिनैव विकारितः स्वशब्द
चिनिषेधानुवादात्तत्कार्यकारितेति तत्रनैवारश्वरूपेषोहः समस्त इत्यत्र नीवाराणां व्रीहिकार्याप

त्तिः प्रत्यक्षमहिम्नाद्विधेरवगम्यते दृश्यते हि नीवारेभ्यो हविर्निष्पत्तिः ननु श्रूयते नैवारमिति तद्धि
तस्य संबंधमात्राभिधायित्वात् सत्त्रायागूर्य विश्वजिता यजेतेत्यत्र विश्वजितः सत्त्रकार्यापत्तिरभा
वविधानात् अस्य हि विश्वजितो यागस्य शेषाणां सर्वेभ्यो देशपात्रात्मानमानुरूतेयः सत्त्रायाद्गूर्ण
नद्गत्यादेः सत्त्रप्रवृत्तस्य केनचिद्धेतुनान्तरसंभवेनः कार्यविधानं प्रतीयते न तथैवेहोनुमितनि
षेधानुमितिनिशङ्कात्कार्यापत्तिरितिष्ठ व्यवहारः नखावधूतानां चरुरित्यत्र नखानामनुक्तेरवस्तु मुसल
योः कार्यविवक्षेत्तिरस्तीति परिधौ पशुं नियुञ्जीतेत्यत्र परिधेर्यूपकार्यापत्तिः प्रत्यक्षात्कार्यवाचिनो
नियुंजीतेति शब्दात् ऐरंकृत्वोद्गेयमित्यत्रेरापदस्य गिरापदकार्यापत्तिर्न गिरा गिरेति ब्रूयादिति नि
षेधानुवादकत्वेनाध्यक्षादिति यागस्वरूपदृष्टि संनिपातविधानं दृष्टबाधकं श्रौतत्वादप

दंयागस्वरूपघटितशक्यसंबंधेनापूर्वलक्षणायेत्यवरत्वंसंनिकर्षाद्युत्पन्नापूर्वमेवलक्ष्यतानीत्याशय
कमेतत् तेनोत्पत्तिसंनिपातिनां तत्रानुपयोगेपि न क्षतिः स्वरूपग्रहणेन एकैकयागस्वरूपोपयोगि
न एवोत्पत्त्यपूर्वार्थत्वं न समुदायसंस्कारार्थस्य पार्वणहोमादेरपि तस्य तु समुदायापूर्वार्थत्वमेव
युक्तमिति निधोत्यते अथ युक्तत्वधर्माणामिति नैकं विनष्टस्य व्यापारेणैव फलं तत्र भावि फल
रंभकत्वात् ह्रस्वने हि वातपानादेर्धातुसाम्यव्यापारेणैव स्वास्थ्यजनकत्वं न च ध्वंसेनैवान्यथा
सिद्धिरस्तु सम्यपि न स्यवैजात्ये करवैजात्यादेव फलवैजात्योपपत्तिरिति शंक्यं ध्वंसनस्य प्रतियोगितोरेक
त्राजनकत्वनियमात् धर्मः क्षरति कीर्तनादिति शास्त्रानुपपत्तेश्च न हि नष्टक्रियाया नाशस्य वा
शक्यते कीर्तनेन नाशयितुं वक्तुं शक्यते तेनापूर्वस्य एतेनापूर्वस्थाने रूढं न याग एवास्ते वाभिधिमानामिति

निरस्तं न च धर्मपदाभिधेयक्रियायाः कीर्त्तननाश्यत्वेऽसंभवेन धर्मपदेऽपूर्वलक्षणापत्तिः न क्षरं जव
न्येक्षरनिधानोऽप्रतिबंधलक्षणमेवास्त्वित्यकीर्त्तनस्य फलप्रतिबंधकत्वाश्रयणमिति निर्शक्यं
प्रतिबंधस्याविद्याव्यापारमन्तरेण कीर्त्तनेनानुदयात् यंसस्यप्रतिबंधकत्वेऽभाविद्यागादपि फलानुप
पत्तेः तस्य कीर्त्तनेन तदीयफलप्रतिबंधः शास्त्रार्थश्रवणेन तदीयफलाप्रसिद्धेः कीर्त्तनेन धर्मो
निष्फलो भवतीति शास्त्रेणोक्ते प्रतिबंधनिर्वाहकापूर्वान्तरकल्पनागौरवपरिजिहीर्षया पर्यायधर्मा
पूर्वनाशकत्वाश्रयणाच्च न धर्मपदे लक्षणापत्तिः असति चापूर्वे पुण्यपदान शास्त्रानुपपत्तिः न हि वि
नष्टक्रियायाश्चानुत्पन्नफलस्य वादानसंभवः धर्मापूर्वतुल्यन्यायत्वेनाधर्मापूर्वानंगीकारे च प्रायश्चि
त्तैरपेक्ष्यनदृश्यादिशास्त्रानुपपत्तेश्च पापफलप्रतिबंधकत्वाश्रयणे वा पैनीतिपदे लक्षणापत्तिः न

129

स्यनाशकत्वाभावात् कीर्तनस्य धर्मफलप्रतिबंधकत्वेन निर्दिष्टदोषस्य बहुप्रसंगः तथापि देवतानि
ग्रहनिग्रहाभ्यामेव स्वर्गनरकादिसिद्धेर्नापूर्वकल्पनौचितीति चेत् न नरवत्स्नोमादिदेवत्यक
र्मणि तदसंभवात् सशरीरत्वदर्शनात् कर्म्मनाशद्रष्टृतापूर्वकल्पनायाएवौचित्यात् ई
श्वरीयानुग्रहादेरेव सर्वविहितनिषिद्धव्यापारत्वमिति चेत् नप्रतिबंधेनानुपस्थितत्वसमवे
तव्यापारकल्पने प्रतिगौरवात् नन्वेवमपि परमापूर्वेणैव फलोत्पत्तेः पूर्वमंतरेणाविनि
हात् उत्तरांगसहितयागजन्यत्वेनावगतस्य परमापूर्वस्योत्पत्तिः पूर्वं विनायागाद्युत्पत्तेरसंभ
वाच्च कुतः पुनः समुदायापूर्वसिद्धिः पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममा

पायजेतेतिवचनयोरुक्तनीत्याभिहितस्यसमुदायांतरानिरपेक्षस्यागत्रयगतकरणत्वस्याश्र
तियोगिसापेक्षत्वात् वस्तुहेतिपार्वणवैमृधादिजन्यानुग्रहस्यप्रागत्रयसमुदायगोचरस
समुदायकार्यएवोपयोगौचित्याच्च पूर्णमास्यनुष्ठितानांयागानांसमुदायापूर्वनिष्पादनेऽम
पवर्गेऽमावास्यायांपुनरंगानुष्ठानोपपत्तेश्च वहूनांयागानांविभिन्नसमुदायभावापत्ते
फकार्यकारित्वं विभिन्नसमुदायकार्यद्वारैवावितं वहूनांवर्णानांतत्तत्पदभावापन्नानां
पदार्थज्ञानद्वारेणवाक्यार्थवोधजनकत्वदर्शनादित्यभिवदेत्. उत्पन्नपूर्ववत्वेनेह शब्दांतरा
दिसहकृतेनविधिनाऽभिनवयागोत्पत्तिंकुर्वताख्यातेन भावनाभाव्यत्वेनज्ञापितमपूर्वं विवक्षि
तं किंत्वग्न्यपूर्वलक्षणादर्शनाद्यायत्र यत्संनिकृष्टमपूर्वं तदेवेति वोध्यं तेनपयः श्रवणा

130

देमैत्रावरुणाद्यभ्यासापूर्वार्थत्वेपिप्रोक्षणत्वेपुत्पवनादेःप्रोक्षणापूर्वार्थत्वेपिनक्षतिः नन्वेवंप्रो
क्षणाद्यवघातादेर्व्रीहिनियमादृष्टार्थत्वेपिस्यान्नानस्यनियमजन्यत्वेनव्रीह्यजन्यस्यव्री
हिपदेनलक्षणाऽयागोन व्रीहि जन्यत्वेपि अनुद्देशकार्यार्थत्वादुद्देश्यकार्यार्थत्वंयुक्तमिति
=प्राग्नेय्यापूर्वलक्षणोविरोधात् यत्रतूद्देश्यकार्यार्थत्वेश्रुतिविरोधस्तत्रासंभवद्धर्माणांनिय
मापूर्वार्थत्वे इहेद्धर्मतरसाध्येकदृष्टमेनहि इहेत्थंतद्यथोर्ध्वस्ययाविहितानांसमुद्धान
निमीलनप्रभृतीनांधर्माणांनान्तरेणसामान्नियमादृष्टशवत्वंश्रुतव्यवस्थापपत्तिः किंचि
तुरर्थंतस्यापूर्वविशिष्टापूर्वमिवेदलक्ष्यतेजिः प्रथमामन्त्राहेत्यत्र प्रथमस्यानविशिष्टा
पूर्वलक्षणावघेदग्नयेचेत्यत्र मद्दमनेसापक्वालपूर्वलक्षणोवदिन्याकुस्त्रिखिन्न न

न्नेवं प्रयाजेष्वप्याज्ये कृष्णलं जुहोतीति विहितकृष्णलहोमस्य प्रयाजापूर्वसाधनप्रयुक्तत्वाद्दार्शिक
प्रयाजेष्वपि कृष्णलहोमापत्तिः प्रधानानुयाजस्य संनिहितगामित्वात्सोमप्रयाजेष्वेव निवेशः न हि
ज्योतिष्टोमप्रकरणे विहितानामाग्रहणधर्माणां प्राकरणिकग्रहेष्वेवाभिनिवेशः स्यान्नारभ्यविहि
तयोरप्यवदानप्रसक्तौ अथ तयोरपि नैमित्तिकत्वाद्यशस्तवत्प्रकरणे विनियोगानामप्रकरणिकत्वेन
थापि च यथ न प्रकरणे विहितानामखण्डकृष्णलादीनां धर्माणां प्रकरणगतानामेवाभिनिवेशः
स्यात् नानारभ्यविहितानां सुविस्तृतत्वादिषु अथैकापूर्वसाधनेषु सर्वेषूपदेशेनैव धर्मप्राप्तिः
न हि दार्शिकप्रयाजेष्वपि कृष्णलहोमापत्तिः फलचमसस्योपदेशेन सोमचमसधर्मप्राप्ति
र्न स्यात्तमेवं प्रयाजस्वरूपेणैव न तदपूर्वेणापि प्रकृतो निर्ज्ञातप्रकारत्वेन कृष्णलहोमस्य

131

शित्वं स्वरूपेणानुभवितुमशक्यत्वेनासौ पूर्वकाधनत्वोपहितेनैव नत्वीकरणान्नावनाच
त्वाशिकप्रयाजापूर्वस्याहृतिसिद्धेः न चैवमभ्यासाभ्यावित्सिण्यादिष्वावर्त्तकं गृहे हकालस्या
रवं संभवति विशेषणं सत्यपि सोमफलवमसयोरेकापूर्वप्रयुक्तत्वे नैमित्तिकविधेर्निमित्तविपयुत्र
रप्यरत्नित्वान्नित्यसोमविधिशेषत्वेन पूर्वपवसितानाम्नचूधर्मविधानान्नैमित्तिकविधिशेषत्वेन पुन
र्धिकारायोगात्समानविधानत्वेन चैवं सोमपूतीकयोः समानविधानत्वापत्तिः सोमशास्त्रस्य
वसकलसोमानुयवाभावे पूतीकादृष्टानिमित्तात्त्वविकलसोमावयवानुष्ठापत्वेन पूतीकानां
फलवमसवन्नैमित्तिकविधानराविधेयत्वाभावात् यदि सोमं न विन्देत पूतीकानभिषुणुया
दित्यस्य तु प्रतिनिधिनियममात्रपरत्वात् अवघातादीनामिति अतः पुनस्संविज्ञानोपवर्णी

१३१

हिः परमापूर्वप्रयुक्तोऽपि स्वव्यापारो दृष्टकार्यमहिम्नाऽवगम्यते आज्यावाधावन्त्येऽपि तु नत्रोक्षणपर्यग्नि
करणे अनुयागादिनिषेधस्य प्रयाजयागादृष्टाद्युद्देशेनाविधानादित्यर्थः अपूर्वसाधनलक्षणाम
नपेक्ष्य प्रधानभावनेयन्ति कर्तृमताल्लेनस्वीकृतानानां तस्याः प्रधानापूर्वार्थत्वमेव युक्तमित्याश
यः कुतः पुनः परमापूर्वसिद्धिः यावतोत्पत्त्यपूर्वैस्तद्द्वारादिनसमुदायापूर्वमप्यावाशक्यते फ
लोत्पत्तिर्वक्तुं एकफलोत्पत्तिनिर्वाहायप्रथमतः कल्पितमेकमपूर्वं न पश्चात्कल्पितानापूर्वा
रवशेनापाकर्तुं शक्यमिति निश्चेतव्यम् आदिन एव बहूनां कर्मणां करणत्वनिर्वाहायनादपूर्व
कल्पनोचित्यात् विरुद्धस्य तद्दर्शिनाकल्पितापालिंगकल्पितस्य च नतिरेव कल्पितस्यापि प
रमापूर्वस्य प्रकारान्तरेण कल्पनाम्नानाकांक्षोऽपेतत्वेन बाधसंभवाच्च प्रथमतः ११३ पूर्व

132

कल्पनेनैषां सांगप्रधानजन्यत्वनिर्वाहाय षडपूर्वान्तरकल्पनापत्तिरिति चेन्न मैवं नु न भावनाप्रेक्षा
वद्भिः क्रमविधिप्राप्तागव्यापारत्वेनैकमपूर्वं कल्प्यते यत्तु प्रवृत्तिर्न चाङ्गानामपूर्वैरिदमर्थाप्युत्पादकने
वेति नियमः संभवी परामृष्टमतो वेति पूर्वांगोत्पादितैरुत्तरांगस्थापितैः प्रकृरवापूर्वैः फलोत्पत्तिनि
र्वाहान्नैव स्वर्गतोऽधिककल्पनोपपत्तिः अतः प्रथमादारभ्य प्रकाशकेषु परमापूर्वप्रयुक्तत्वव्यवहार
इति चेत् अत्र भवदेव कुविंदादिकर्तृहृदयस्थपटादिसिद्धिरेकसत्त्वादिकरणसंपाद्यकार्य
व्यवहितपूर्ववृत्तिसंयोगादिव्यापारद्वारेणैव जायमानो दृष्टः अतोऽनेकयागैरपि स्वर्गादिसि
द्धिरेकापूर्वद्वारेणैवोचितेति कश्चित्तु दर्शपूर्णमासाभ्यामिति निष्पन्नागनिष्ठसाधनतापन्नीतिः
प्रधानसाधारणशक्तिविनाऽनुपपद्यमानो नादृशशक्तिकल्पनामाक्षिपति नादृशशक्ति

१३२

रेव परमापूर्वमित्याह केचित्तु परमापूर्वाभावे समाप्त्यात्तदुपकारिणां फलोत्पत्त्यानुपयोगो वाच्यः प
थासिद्धं तिमते परमापूर्वोत्पत्तौ उत्पत्त्यपूर्वार्थत्वे वात्र शेषा न स्युरित्यपार्थत्वे लक्षणविशेषाद्विधित्वसि
त्यर्थत्वे मानाभावाद्याचन फलोत्पत्तिन त्वियत्वपार्थत्वं वाच्यं नतनश्च सकृत्सर्गार्थदर्शं कृतवृत्तः प्रक्र
मिद्धितीयादिश्वप्योतेषु विकृतिषु वे हि कफलासु पुनरनुयाजाद्यननुष्ठानापत्तिः पूर्वकृतांगो
पकाराणामुपपत्तेस्त्वेन प्रसंगसिद्धेः नतेष्वपृषदाज्येनानूयाजान्यजतेत्येकादशानूयाजान्यजतीति
वचनानुपपत्तिरिति परमापूर्वसिद्धिमाहुः असति च परमापूर्वे समस्तांगापूर्वसंहितेषद्विर पूर्वैः
फलोत्पत्तावुपगमे प्रयोगसमाप्तेरपि यस्य कस्यचिद्दंगस्य प्रधानस्य वा कीर्तनेन नमात्रेण नाशे वेना
शात्फलानुदयापत्तिः नचैवं तु कर्मसंभवति फलोदयापपादने एनेन नित्येष्वपि परमापूर्वोत्पत्ति
र्ज्ञेया पश्चादिह प्रोक्तेन पापक्षयस्य प्रयोगानंतरमाविर्भावनियमासंभवात् न त्वियत्ताविनि पश्चात्

समाप्तो ऽङ्के हि प्रतिपत्तिस्तु एवैमृधाधिकरणे च मिश्रैः तन्त्रत्वमपि कार्यं तदभावे विप्रघनस्तिक
स्यनश्यति यद्दानस्मिन्नित्यानिर्यस्य परमापूर्वन्तु कृत्ना निशयस्य फलानुकृत्नातिशयस्यतस्मिन्
सीकर्त्तव्यं वा हृष्टसमवायस्य दृष्टान्तरं अन्यथा णर्वलाद्दामेदे वनोद्देशनियमादृष्टस्यानाश्रय
त्वापत्तेः प्राशुभाव पदप्रयोजनं नं स्मरयन्तः क्ष्यमाह सवेति अतः प्रयोगपरिच्छेदकरस्यापि पौ
र्णमास्यां पौर्णमास्या यजेतेत्यादेरलक्ष्यत्वात्तच्चोहृत्यर्थं प्राशुभावपदं प्रधानविधिनैव निर्ज्ञानप्रा
शुभावे प्रयोगभेदसिद्ध्यर्थमदःशास्त्रं न हुत्वर्वस्यैव विधेः प्रवृत्तेनात्मनः प्रशुक्तिपत्नुत्वसंभवात्प्रयो
गविधित्वमितितत्त्वक्षणेनकस्यविदिधेर्व्यावृत्तिः कवितेनमनुत्स्याह एवेति फलविशेषकर्मकभाव
नान्वयित्वेन प्रधानमिवाङ्गानि बोधयता प्रधानविधिनेव साङ्गप्रधानानुष्ठानसिद्धेः प्रधानोत्पत्ति
विध्यायोगविधयो यावानस्वविषयान्प्रयुञ्जन इत्याशयः प्रधानविधिरपि पदर्थपदमनुष्ठापयति

न्तस्य प्रयोजकमन्यद् प्रयोजकमिति कल्प्यमाने न यथा तुल्येष्वामिक्षावाजिनयोर्दध्यानयनजन्यत्वे
ऽप्यामिक्षार्थमेव दध्यानयनमनुष्ठाप्यते नान्यार्थं दध्यानयनं वा कोपसम्पन्नपदार्थमिति तस्य पयसो
नयनं द्वितीयकर्मतया श्राप्यमानस्यानयनं प्रतिप्राधान्याद्वगतेः पयःपरामर्शित्वे नामार्थभेदा
न्वयित्वादामिक्षायाः वाजिनशब्दान्तस्यमानभूतत्वात् तुल्येष्वेकहायनीनयनसाध्यत्वे क्रमय
दकर्मणोः क्रयार्थत्वमेव तदनुष्ठाप्यते तत्संस्कार्याया एकहायन्याः क्रये विनियुक्तत्वात् तुल्येपि पु
रोडाशतुषोपवापयोः कपालशोधितेपुरोडाशार्थमेव कपालमनुष्ठाप्यते पुरोडाशकपालेन तुषानु
पवतीति विधिवलात् यामेव तुषोपवापस्य परस्परं युक्तसाध्यत्वप्रतीतेः सत्यप्यन्यस्विष्टकृतः पुरोडा
साध्यत्वे स्विष्टकृदर्थतयानुपुरोडाशो नुष्ठाप्यते उत्तरार्द्धात्मकैकदेशसाध्यत्वेन तस्यैतस्यैक
देशाकांक्षायामाग्नेयामाग्नेयादिप्रयुक्तैकदेशग्राहकत्वात् प्रतिपन्नत्वाच्च एतेन पशोःशकृत्स्नो

हितयोर्निरसनं पूर्णमासे शाखायाः प्रहरणं प्रणीतानां निनयनं प्रयाजशेषस्य क्षारणमित्यादेर्भक्षणं
सोमे रूक्षाविशरणीयाः आसनमवभृथे सोमलिप्तानां नयनमप्रयोजकमिति द्रष्टव्यं प्रतिपत्तित्वविध्यु
पयोगिन्यायभेदप्रदर्शनाय पृथगधिकरणभेदः न चैवं मैत्रावरुणाय दण्डं ददातीति विहितदानं द्विती
यादण्डप्रतिपत्त्यर्थत्वाद्दण्डस्यापि प्रयोजकं स्यादिति शंक्यं चतुर्थे क्रीत्वा मैत्रावरुणार्थदानं प्रतिदण्डस्याधारणा
योगात् पत्नी प्रतिपत्तेः प्रतिपाद्यत्वात्प्रतिपत्तिविवक्षारणेरणं प्रत्यप्रयोजकत्वात् प्रयाजशेषधारणाभावे
क्षारणविध्यनुपपत्तिरिति नन्वप्रतिपाद्येन प्रयाज्येनैवास्याधिकरणकप्रक्षेपे पृष्ठे विराधिकरणे क्षा
रणात्मकप्रतिपत्तिमनुष्ठापयतीति शेषभेदेन न तदनुमवितुं स्वधारणानुष्ठापनात् न चैवं प्रातःसवनानु
ष्ठितप्रयाजशेषणमाध्यन्दिनसवने भाविनी प्रतिपत्तिर्विधिप्रयुक्ता इति प्रतेर्धारणमनुष्ठापयतीति शंक्यं
शास्त्रेण संनिहितेन तदधिकरणकक्षारणस्यैव विषयीकरणात् अयं शास्त्रीयप्रतिपत्तेर्धारणानुष्ठापनासंभवात्

संन्निहितेनैकविदनपमेन प्रासस्य क्षारणस्य सन्निहित हविष्प्रतिपन्नं कुर्वतो

विधेः शास्त्रभावबोधकत्वमुपपादयति सहीत्यादिना सर्वेत्यतः प्राकृतेन प्राप्तभावबोधकत्वोप
न्यासेन नैव तन्त्रस्य विनं प्रधानार्थनियागांनि प्रयोक्तुं समर्थोपि विधियस्य प्रधानस्य परप्रकृत्ल पर्द्ध
गजन्ये पकारलाभनयामाजो वपानि नन्दर्शनवो नान्यनुष्ठापयति यथा पशुपुरोडाश इति विधेः
शाज्ञापस्य पुरोडाशार्थनया अग्नीषोमीयपशुवपया वर्याग्नीषोमीयं पुरोडाशमनुनिर्वपती
मात्मा हि सोग्नीषोमीयतं त्रमध्ये पुरोडाशं विदधानः निष्ठपशुकालीनं वैकादश्यत्व गुणहुत
न वैल्लक्ष्ये पशुनैरपि पाशुकः कः नोपकारे प्राकृतेनोपकारे प्राकृतेनोपकारावैजात्यमापशुसमा
स्पनपवर्गवाजो व पन्न पुरोडाशायह पकृश्चान्यपुरू प्रयोगप्राप्तभावभंगापत्तेः यथा वा सत
पितत्रमध्यविधौ व स्तकनैस्तंत्रमध्यपातान्निशी ह्रि विधि निशिगह्य र्थ नपक अपाङ्जोदीन् यत्स्यै

माहा
१३५

पदानंत्रितयानप्रयुज्यते प्रयुक्तं वानं अविरोधेन प्रसङ्गुपकारात्पूर्वेष्वे प्रयुज्यत एव तदुक्तम्
संगिमपांप्रथाऽपमार्गा विज्ञ्यादिव प्रयुक्तिसामर्थ्यसत्वात् अपामर्गमेदस्यातुर्थिकाप्रयोजकं
ज्ञादशिन्दप्रसंगिनि आभुमावबोधकत्वात्तैवैन दर्पितमुविते पदं गसकृदनुष्ठापितमङ्गलं
मात्मविशेषत्वाच्छन्नां प्रधानानामुपकारायप्रभवति न तदसकृदनुष्ठाप्यते यथा पूर्णमा
सप्रयोगे प्रयाजादिप्राभुमावमंगापत्तेः पर्नतु देशकालादिकृतो विशेषोऽस्ति तेन दर्शमासे
प्रधानाय नास्मादिति प्रयुज्यत एव न तु दसकृतेन यथाग्निकमेदेशजादि कालकृतविशेषग्र
ह्णात् वरुणप्रघासेषु वनदिहारभेदेन देशकृतविशेषग्रहणात् वरुणप्रघासेष्वेव पत्नी
संयाजाः कृतकृतविशेषग्रहणात् अध्वर्युणा हि श्रीमहाभारतेऽहानामेवोत्तरवेदिका

१३५

135

णामुपकुर्युः नमारुत्याः ऽग्रसपिकर्तृमिदेदक्षिणामृदग्रपूरूकर्तृत्वभेदात्कविदंगादृत्तिः यथा
राजसूयकानेर्गनाथेष्टिप्रयोग नन्वेवंग्राभुभावाद्वरोधनानियतंक्रमाश्रयणमेवोवितंनेत्याह समवे
ति नियनशनिछेदः यद्यपिपुरुषभेदेन नियमाद्गुभावपिग्राभुभावोपपादकत्वेन संभाव्यते तथा
पिनियमाश्रयणपदार्थस्याकल्पोपपत्रेस्तदाश्रयणमेवोचितमित्याशयेनाह अस्यथेति विशे
षः पदार्थलोपः विषयेणनयेति क्रमसाहित्यादेरकारकत्वाशयेनेदं अमुनैवग्रंथेनाभिनवप्र
गविधिपरिगृहीतानांनक्रमनियमइतिवोत्पने विधांतरस्ययोज्यपदार्थविशेषणत्वेनाविधा
नेरणक्रमविधियोगात् अत एवकाम्यक्रतुषुपाठक्रमेणक्रमनियमः नदादिनामिसंबं
धादित्यायेनाग्निमारुतेनाह ध्वंमनुयाजोत्कर्षेणसूक्तवाकोत्कर्षपिकोराडाशिकपिष्टले प

फलीकरणे होमयोर्नोत्कर्षः निबद्धक्रमत्वमेव हि पदार्थानां तदाद्युत्कर्षेन रणं नापकर्षेव तन्त्रं यथ
पिवोक्त होमयोः प्रकृतावनुयाजादिभिः सह निबद्धक्रमत्वान्न तथा पूर्वमिति नियमो वरत्वं तथा
पिसवनीयपशोः प्राप्तेस्तैः सह पुरोडाशे प्राप्तयोस्तयोर्न निबद्धक्रमत्वमिति नानुयाजोत्कर्षेणं भव-
न चैवं प्रकृवाकप्रैषाद्यन्तर्गतपौरोडाशिकदेवतापदानामप्युत्कर्षापत्तिः यत्तत्पदार्थान्वितत्तयास्य
स्वार्थमभिवोधनीयः तेषां होतापदस्थादित्येवमादीनामप्यूहप्रयुक्ततयोत्कर्षेऽपि तेषामप्युत्कर्षा
वश्यंभावात् विनतीति अशुपरूपस्यनेकपदार्थानुष्ठानात्मक इत्यर्थः अस्मिन्मते अध्वपु
र्गं इत्यत्र दीक्षायित्वेति वाक्ये पाद्यंत दीक्षागोचरस्यैकस्यैव विनाति विशेषस्याविधेयत्वादेक
वाक्यत्वं लभ्यते पूर्वपदार्थनिरूपितानन्तर्यात्मनः क्रमस्योत्तरपदार्थोपस्थितिसंपादनेन

दृष्टार्थत्वसंभवेविविनतन्निविशेषान्मत्वाभ्युपगमेनाह दृष्टार्थेनयाक्त्वाश्रययायावत्पदार्थंगत्वाभ्युपग
मोऽभ्युक्तइत्याशयेनाह पौर्वापर्येति अत्रश्रयदृष्टेत्यादिः क्रमेभ्युपगमात्सांनवोक्तः प्रयोगविधि
रनुग्राहकाणिमानानीत्याह नन्वेति वषट्कर्तुरिति प्राथम्येक्रमश्चवहाराङ्गोगौणत्वंक्रमलक्षणा
नाकांतत्वानि प्रथमभक्षमात्रानुष्ठानाक्रमानुष्ठानंद्वन्द्वमितिव्यवहारासंभवाच्च अश्रीयन
प्रयोगविधिनेविशेषः कथमुक्तविधपाठस्यपदार्थक्रमनियामकत्वमत आह येनेति
आधानानीत्यस्यप्रयोगकालइत्यादिः तस्यप्रधानेति तथाचतत्साहित्येनेतरयोरपित
स्यात्सिद्धिरित्याशयः अतएवनियमपाकरमुत्सक्रमोदाहरणत्वेनाव्चारंभणीयागत
योःसारस्वतौभवतइतिविहितयोःस्त्रीपुंदेवत्ययज्योऽग्नीमाग्निविधिपादपत्रदाहनाः नेयापितेहि

क्रमस्य प्रधानांगयोऽन्यानुवाक्यायुगलप्रवृत्तिक्रमनोपपत्तिहेर्नमुख्यक्रमस्यासंकीर्णनत्राप्रा
माण्यमित्युदाहरणान्तरमेतेस्तत्क्रं नेत्युत्पन्नपदार्थप्रवृत्तिरैवृद्धित्तीयादिषु क्रमनियामिकान
भावपदार्थप्रवृत्तिरितिवक्तुं युक्तं न्यायसाम्यात् न त्रयदीति। पद्यपियाऽन्यानुवाक्यापुगलप्र
वृत्तिक्रमानुरोधेनाग्नेयधर्मप्राथम्यमुचितं तथापि जघन्यप्रवृत्तिकक्रमानुरूप्यप्रवृत्तिक्र
मो वल्लीयानिति गाशयेनेदं। महेति। प्रसंनिपत्तिकानिनां प्रयाजादीनामंगानुष्ठेय संनिपातिना
मन्वाधानादीनां च प्रवृत्तिक्रमागोचरत्वं घानेयितुं संनिपातिनामारन्यौति पदद्वयं। नदीयोपप
कारणे नेनित्सहयोगेन्तनीयागावधानुरत्वस्याधिकंत्याद्ः॥ एवंप्रकारोभिन्नक्रमः। नियोजन
मेति। बहुधातित्यनेन क्रमनियामकक्रमनियामकमुत्पन्नपक्षभावे क्रमानियामो यथा प्रया

जांगमूत्रेषु नानाशास्त्रोपदिष्टेषु तु मंत्रणेष्विति दर्शितं न स्त्रीस्नानं ममर्हतीति रक्षोक्तमां
पिनाविज्ञांपतिपुत्रास्कवाद्दकै ॥ अभावे ज्ञातयस्तेषां न स्नानं अंक विस्त्रियो रतिग्रस्पसंग्र
हायादिशास्त्रः नतु नैनशास्त्रं स्त्रीणां विहितेकर्मणि स्वातंत्र्याधिकारनिषेधाय स्मरंतिहि पूर्व
त्रनादीनांसोस्वतंत्राधिकारं नापिधनस्वामित्वप्रतिषेधाय पत्नीदुहितरश्चत्यादिना तासामपिरि
क्थग्राहित्वस्मरणात् नन्निषेधेन ह्यधिकारस्याप्यसंभवात् ॥ अथ पुत्राणामिव पत्नीनामपि तु
ल्येस्वत्वे विभागकाले शाग्राहित्वं स्यात् ॥ अल्पेवनयदि कुर्यात्समानंशान्पत्न्यः कार्याः समांश
काइति ॥ पृथवद्ध्नामविभक्तानां संसृष्टिनां वाभ्रातॄणामिव तत्पीनामपि तुल्ये स्वत्वे कस्मा
च्छ्रिन्कृतमन्तर्गृका याकथं स्वत्वनिवृत्तिस्तत्रैव तत्र कविक्रयाद्यभावेनन्निवृत्त्योगात् नचना

स्यैवसे निवार्यं यद्विभक्ते धनं किंचिद्दायाद्यादिविधं स्मृतं तज्जाया स्थावरं मुक्त्वा लभते मृतभर्तृ
का। हृत स्थावरं यदुक्तं तेनांशेन स्त्री स्थावरमर्हतीति बृहस्पतिना विभक्तस्य स्थावरमपि न लभत इति वृ
नाविभागाभावेनदपि न लभत इति वचनात् मेकलनिबंधसंमतत्वाच्चेन स्यादिति चेत्। श्री
स्वांसा संन्यासपानि त्वादि वद्धत्रेमरणादेरविवाच्वनिफलत्वनिर्वर्त्तकत्वाभ्युपगमसंभवात्
नवस्था पररस्वत्वनिषेधार्थत्वेन धान्यत्र तत्र वह्स्पतिना विभक्ते मृतभर्तृकायाः स्थावरालाभ
मभ्युपगम्य स्थावरलाभनिषेधः संगच्छते न तत्र स्थावरलाभाप्राप्याभावे कथं कर्माधिकार इति वाच्यं जंगमं
स्थावरं हेम कुप्यं धान्यरसाम्बितं आहत्य यत्पत्नी धर्मं कुर्यान्माषमासिकादिकमिति प्रजापतिना स्था
वरस्वीकरणस्यापि विधानात् न च नयोर्विरोधः नाहरेणारिस्य ग्रहणविधायके पत्नी दुहितरश्चेत्यादौ
त्नीपदश्रवणेन बृहस्पतिवचने जायापदोपात्तस्य पत्नीभिन्नास्त्रुरोदिविवाहितात्वविशेषमधिवस्थापनात्

पकत्वेन निबंधमि

६३
त्र्येरोति
१३२

स्मर्यते हि क्रयक्रीतानु या नारी न सा पत्नी विधीयते न सा दैवे न सा पित्र्ये दासीं तां कवयो विदु
रिति केचित्तु दुहितृराहितपाणीविषयत्वाद्रहस्यनिर्वचनस्याऽजस्रेष्वित्यं – आस्तां वाऽविभ
क्तमृतभर्तृकायाः प्रवृत्तोऽयाधनमात्रऽस्य विभक्तमृतभर्तृकायाः स्यावरेऽपि स्वत्वनिवृत्ति
मत्वानिकोपायात् अतोऽकार्यकरणवारणाधिकृतविज्ञापाहाज्ञानुल्लंघनमेव स्यात् प्रतिषेध
वाक्यार्थोऽतत्राह स्वातंत्र्ये पोऽणेति तत्र हेतुमाह यजमानेति पत्नीति यजमानपत्नीशब्दो
हि स्वामिवचनो येन तत्र स्वार्थे यजमाने परस्मिन्नुत्पन्नः पत्युर्नो यज्ञसंयोगे इति स्मरणाद्व प
त्निश्च प्रयोगे प्रवेशनं विधीयते तत्प्रयोगनिरूपितस्वामित्वमेव तत्र पदार्थः यथा पितृमा
ह्यादित्यत्र पंप्रतिदानविधिस्तन्निरूपितत्वं पितृपदार्थः तथैवानुभवान् तथास्वतन्त्रि

माघ
१३९

139

ग्वत्कथं चिरायान नेनान्यान्तरेणादपूर्वसिद्धिरित्याशयः। निषादं चेति षष्ठीतत्पुरुषे निषादपदस्या
श्रुतषष्ठ्यर्थान्वयवत्त्वकर्मधारयेऽन्तरपदार्थस्याश्रुतविभक्त्यर्थान्वयः कल्प्यः येन तल्लक्षणाप
त्तेन। श्रुतद्वितीयायाः एव पदद्वयार्थान्वयित्वादिति सूत्रयितुं स्तुत्तरभाविन्यायः प्रविविभक्ते इत्य
ज्ञापनपरो वाक्ये निर्देशः। नित्यकर्मणामिति अवश्यकर्तव्यतया विहितानामित्यर्थः नानि
हीति॥ आद्यन्तनीयान्ते निमित्तश्रुतिमात्रोपलक्षणार्था। द्वितीयमवश्यकर्तव्यतया यावज्जी
वमिति प्रतिनिमित्तमित्यर्थः। यथाशक्त्यनुपर्वं धेहि। अवश्यकर्तव्यता वीजं तस्यां च निमित्तश्रुतिः
यत्राप्यकरणदोषश्रुत्यादिमहिम्ना अवश्यकर्तव्यतां स्मरंति। न चाप्यविधाहृशकालेयाहृशका
लेयाहृश्यफलं तु वा विधेय विधिस्तादृपविशेषस्यैव निमित्तत्वं कल्प्यतां तत्र निमित्तश्रुतिर्विनाफ

१३९

विदपि न तत्सिद्धिः। निमित्तं च यथाऽऽकविद्यावज्जीवश्राद्धात् यथा यावज्जीवमग्निहोत्रं जुहुयादि
त्यादौ॥ तथा मंत्रसमस्यादिनापि यथा वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते इत्यादौ॥ इति श्री
मदापदेवसूनानंतदेवकृतायां न्यायप्रकाशटीकायां पूर्वार्द्धे समाप्तं॥ दधापूरितमानमनूर्द्धिं कलशं
धृत्वा व्रतं तीव्रज्ञेकां विज्ञपकुमारिकां कवुगतिर्युक्तेनि संस्तुवतो। हृष्टाः श्रीगुरजीधरेस्मिनद्य
नभूयुस्मभंगापायपानसोमृविनवानातिंसमूवितां पायामयामेममतिं॥ किं तन्मंत्रविषयं नियम
विधित्वं यन्मंत्रैरवेत्येवकारेणाष्टकटीक्रियतेऽनग्राह॥ साधनेति द्वयशाह्लेनेकमान्नपरः। ध्या
नोपदृष्टमंत्रादीति पसंप्राप्तावनियावत्त्यन्यतरस्य मंत्रस्यात्यर्थः। नियमेन्यस्य मंत्रेत्यादिः। ने
नयद्य विंक विन्साध्यानियमविधिः संभाव्यतेन तथापि न तदथ्यामिकृतो दोषः। नियमविधित्वस्यण

२नी

माहा
॥१४०॥

१४० ४ अ

ख १

स्येहानुपन्यासात्। अनंतरोपन्यस्तनियमविधिरुपवर्णनमात्रपरत्वादस्य ग्रंथस्य। ननु सत्यामपि तदुपादा
ष्टसाधनत्वेन मंत्रपाक्षिकत्वाप्राप्तौ वैकल्पिकबीजपादिनियमत्वेन नियमविधिः। तस्मादिष्टसाधनताविधा
यकत्वात्। साधनतायाश्च नियमघटितत्वात् किमिति मंत्रनियमविधित्वाय यत्नः क्षुप्ताप्तिरपेक्ष
णीयेति चेन्नानयादिशास्त्रस्यैव विधेर्नियमविधित्वापत्तेर्विधित्रैविध्योच्छेदापत्तेः॥ केचित्तु
दृपादेरित्याशयेनाह॥ यथाकुत्रापीति॥ ननु त्वत्पंताप्राप्तिरिति विषयसप्तमी सतिसप्तमी वा॥ आद्ये
न रूपेण विषयाक्रान्तिस्तेन रूपेण तस्याप्तिफलकत्वम् अवश्यं विवक्षणीयं। अन्यथातिप्रसंगात्॥
न च स्वरूपेण त्वत्पंताप्राप्तिविषयत्वं विवक्षितं। प्रकृतोद्देश्यसंबंधित्वेनात्यंताप्राप्तिविषयत्वं वा। र
प्रकृतविवक्षितोद्देश्यतावच्छेदकावच्छिन्नसंबंधित्वेनात्यंता· तं वा॥२॥ प्रकृताप्रकृतान्यतरो

८२

देशसंबंधित्वेनात्यंतासत्वं था ४ नादृशो देशसंबंधित्वेनात्यंताभावात् मिश्रापणीयरूपविशिष्टवि
षयत्वं वा नाद्यः उत्सृष्टत्वेसर्वौषधस्यप्रत्यायित्वाव हति अथैतदुपधानविधावव्याप्तेः नत्व
रूपस्यलोकसिद्धत्वात् नद्वितीयः अघपृक्ता वघातविधौ प्रकृतौ दृष्टसंस्कारकत्वासंबंधेन
प्रकृतौ देशसंबंधिनयाऽन्वेनाप्राप्तिविषयत्वस्यत्वान्याप्तिः तथापिद्वादशाहिकपार्थि
कार्हद्व्यविषयेप्रतीकोनगतात्र नाविधौ गौमप्रनिकाग्रहद्व्यविषये प्रतीकावहिर्भूता
प्रतावधिधौ वाध्यातेः तथाहि उत्क्रपार्थिहुतौ क्रमेणरथंतरवृहत्सामकेस्तः प्रकृतौ चयदि
रथंतरसामासोमस्यादैंद्रवायवाग्रान्ग्रहान्गृह्णीयाद्यदि वृहत्सामा शुक्राग्रानिति आम्नातं द्वादशा
हे चैंद्रवायवाग्रो प्रायणीयोदयनीयो दशमं चाहः अथेतरेषां नामहमैंद्रवायवाग्रं प्रथममह

घा४

इत्यवघातः२

का३ वा४ न१

नी।   दी२

१का रयर्गु   मथाग्रयणाग्रमिन्द्रे चैवं अकौ विधिराम्नानः तत्रोक्ताक्तौ विकृतौ गत्रिरात्रादौ रथंतरा
दिनिमित्ताभावेपि तत्तद्युतयोः शास्त्राकृतिरैन संभवस्तप्ताप्तिकयोरर्पणेनयो पुनर्विधिनाऽनित्यत्वमा   म२
पादितेन तथागवामयनस्यैकषष्ठ्यधिकशतं त्रयस्तुत्यात्मनः पूर्वे पक्षस्पर्शान्तु तरशनस्तुत्यात्मे
केऽभ्यनीकाम्नानाऐन्द्रवाग्रं प्रथममहरयर्शुग्रमिन्द्रेवं तत्र नाह धर्मत्वेनाग्र   नाविधेया अथ
शब्दवैयर्थ्यापत्तेः नापि प्रथमपाविशिष्टाहर्धत्वेन वाक्यभेदात् किंतु प्रथमाहि भागधर्मत्वेन
अहः शब्दस्तु तत्संघानुवादः अतो विशिष्टस्तुत्यात्मनि प्रथमभागे चाप्तायामैन्द्रवाग्रवाग्रता
यां तदाधाक्लोऽनस्तदग्रता विधीप्रवर्तते तौ च तद्विकृत्येकाहयोस्तदग्रता श्रो यावित्युक्तमा   स्य
करे एवं चोदाहृतेषयतापुनर्विधिश्रुतत्तदुद्देश्याहः संबंधित्वेनतत्तदग्रतौ मिथ्याप्रमादर्ध्यातिः नततीयः ना१

४पवा

३ति

का५ मर्दि

=आग्नेयवाक्येप्राप्तिस्विष्टकृत्तिस्विष्टकृन्निर्देशेन तन्नत्वनुत्पापूर्वसाधनत्वावच्छिन्नधर्मतयाप्राप्तयोरप्युभयोः त १
परमापूर्वसाधनत्वावच्छिन्नसंबंधित्वेनाप्राप्तेः अनीकृविधोचगावामयनिकतद्धिधुक्तन्यायेनय
मा २ न्नभागधर्मतयाविषयेत्वेनप्राप्तिपरमापूर्वसाधनत्वस्यैवोद्देश्यतावच्छेदकत्वेनविवक्षितत्वात् द्वितीय
विषयेप्युक्तन्यायेनपरमापूर्वसाधनत्वावच्छिन्नसंबंधित्वेनप्राप्तयोरप्युभयोस्तत्त्वनुत्पापूर्वसाधनत्वा त ४
वच्छिन्नसंबंधित्वेनाप्राप्तेः तत्पुनर्विधिप्रोक्तत्वनदपूर्वसाधनत्वस्यैवोद्देश्यतावच्छेदकत्वेनविवक्षि
तत्वात् तथाप्यवघातविधावतिव्याप्तेः विवक्षितोद्देश्यतावच्छेदकीभूतापूर्वसाधनत्वावच्छिन्न
संबंधितयेतद्विधिमंतरेणावघाताप्राप्तेः तथानावहननामग्नीषोमावोज्यस्यैवनावुपांशुपूर्णमा
स्यांयजतन्निनिविधावव्याप्तेश्च अत्रहि देवतायथार्थत्वचितशब्देरनिर्देशाप्राप्तत्वात्पुनर्विधानेफला

२ दर्श

142

भावाच्चन विधीयंते पूर्णमासीसंबंधस्तु विधीयते यद्यप्युद्देशवाक्यं प्रकृतस्य श्रुतेनैवाभ्युयाजसं
नरायजतेति विधिना पूर्णमासीवत्त्र्यमरालेयागं विदधतार्थात्तत्संबंधः प्रापितः तथापि विहृद्दा
क्याधिकारवाक्यगतामावापूर्णमासीपदाम्यां कालसंबंधं निमित्तीकृत्य कर्माभिधायिप्यांशद्दोक्तका
लसंबंधश्चाग्नेयादिषु सत्त्वार्थिकसंबंधेषु वाभ्युयाजग्रहणायोगान्न तस्यानेः सहक्ततसंबंधो न स्यात्
संभवत्वित्येवमर्थं पुनर्विधीयते नत्र विवक्षितोद्देश्यतावच्छेदकीभूतपूर्णमासीत्वसंबंधित्वेनावि
षयीभूतयागस्य प्राप्तत्वादव्याप्तेः अथ स्याच्चतुर्थः यथा सत्यनुक्रमस कल्लदोषोद्भतेः अग्रना विधिषु
हि तत्तत्स्तुत्यात्मक प्रकृतोद्देश्यसंबंधित्वेन प्राप्तविषये प्रतिसंभवत्यप्रकृतनन्तद्धि कृत्यात्मतोद्देश्यसं
बंधित्वेनाप्राप्तविषयप्राप्तिफलकत्वं नैवतत्तत्संबंधाबोधकानां कथं तत्प्राप्तिफलकत्वमिति शंक्यं नहि विधिप्रबोध्यबोधानविधेः

वच्छिन्न ५

क१

फलमिति नियमसंभवः गर्द्दभरशनाया निवृत्तिबोधस्य प्रसिद्धपरिसंख्यायाः फलत्वापत्तेः ॥ अध्ययनश्र
वणविधिः कृतोहि वैदिकपौराणादिवत् सा फलनियमः ॥ अध्ययनविधिश्च यथाऽर्थवादेभ्यो नन्तरी
यकमपि मन्त्रार्थज्ञानमुल्लंघ्य नं फलत्वेन प्राणादिकं प्रशस्यत्वमनुमन्यते तथा केचिद्वि
धिर्ज्ञेनिनाममप्यदृष्टविशेषकारी प्राप्तिमुल्लंघ्य प्रनायाननन्तरमपि प्राप्तं प्रवृत्तिविशेष
करीं फलत्वेनानुमन्यते यदि नु कविदावहिनामवहितप्राप्तिद्वयमपि प्रवृत्तिविशेषकरं त
त्रदीक्षयावाङ्नियमन्यायेनाय्यवहिनानामेव फलत्वेन स्वीकरोति ॥ अत एवाप्राप्तादशायामवघा
तदशायामेव प्रापणमेव तद्विधेः फलं न तु दलनादिनिवृत्तिबोधः तन्निवृत्तिबोधस्यावघातीयतद्दृश
गत प्रापणार्थो न जन्यत्वात् एवं च यत्संबंधित्वेनावघात प्राप्तिविधेः फलं तास्मिन्नकृतो दृष्टे पेवधा
तस्यपक्षेप्राप्तत्वान्नानियमानिति तत्रैवमपि अदृष्टोपूर्वोमवतीत्यत्रानिमासिः पूपस्याहत्त्या

बं

त्मकत्वेन तात्संधिनयाखादिरतायाश्चर्यंताप्राप्तेरितिरिति शक्यो दृष्टादृष्टसंस्कारगुणात्मकरूपेखादिरज
न्योदृष्टांशस्येव तांशतुद्देश्यत्वात्तत्र तस्यापक्षप्राप्तिसंभवादिति चेत्तन्न एवमपि वैश्वदेवीसांग्रहायणी
निर्वपेद्ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्स्वेन भागधेयेनोपधावति ते एवास्मै सजातान्प्रयच्छं
ति ग्राम्येव भवति ऋते सांग्रहायणी फलसंबंधविधावप्याप्तेः स्वयं हि न तस्यास्तत्संबंधप्राप्त्यर्थः
अर्थवादादेव तत्संबंधप्राप्तिसंभवात् यद्यपि वो इंद्रराधिकरणादौ केवलार्थवादस्य फलसंबंधप्र
मात्वं निरस्तं तथापि समर्थं हि मनुष्याः पूर्वमंजनत उपरि हि देवेभ्यो धारयंतीत्याद्यर्थवादोक्तीन विधेस्त
त्तदर्थप्रामाण्यं विधिस्त्वधारणे पूर्वत्वादिन्यायेनोक्तमुपपन्नत एव एवं च यथा मंत्रलिंगकल्प्य
विधिनैव रशनाद्वये मंत्रप्राप्तिसंभवादश्रुतविधेर्न मंत्ररशनासंबंधप्राप्तिः फलं तथाग्रामांतो

२ वरिश्चदात्मक

143

३ स ता ३

कविधेरभावेप्युक्तार्थवादोक्तो न विधिमहिम्ना वैश्वदेवयागस्य सजातसंग्रहात्मकग्रामलाभसंबं
धप्राप्तिसंभवान्नोक्तविधेस्तत्संबंधप्राप्तिः फलं किंत्वामनहोमानां सांग्रहायण्यां गत्वसिद्धेः तत्कारीता
र्थवादात्तस्यात्तत्संबंधलाभोऽपि स्तुतरां मामनहोमविधौ रात्रिवदर्थवादिकैः फलसंबंधस्यात् एवं हि
तद्विधिः श्रूयते आमनमस्यामनमस्य देवाः इति तिस्र आहुतीर्जुहोतीति एतावंतो वै सजाताये महां
तो येऽप्युल्कायास्त्रियस्तानेवावरुंधे त एनमुपतिष्ठंतीति सतिनु प्रत्यक्षविधिबोधितेन
स्याः फलसंबंधे भवति प्रयाजवत्तेषां नदंगत्वं अनत उक्तं इष्टविधेः प्रकृतेश्च प्रकृतेवोद्देश्यस्य विषय
प्राप्तिफलकत्वाभावाद्भवति नत्राप्याप्तिः तथाऽथानोऽग्निमग्निष्टोमेनानुपजंतीति प्रकृतस्याम्नाते
५२ धुनैष्यपेन न मतिरात्रेण न द्विरात्रेण न त्रिरात्रेणेति चेत्कन्नाग्निविधिप्रव्याप्तिः एतेहि नविकृतिषु
निप्राप्त्यर्थाः आद्यवाक्येन प्रकृतां गतया विहितस्यातिदेशेनैव विकृतौ प्राप्तिसंभवात् नाप्यतिदेशेना

न्नरवेधासहविकल्पेन प्राप्तस्याग्नेनियमार्थाविकृत्यंतरेष्वप्यग्निपरिसंख्यार्थाः एवं मेधीयाज्यभागविधि
वदुद्देश्यविधिषुंगांतरपरिसंख्यार्था वा उद्देश्यविकृतिगमनेन कबोदकालोचनोपेक्षायामस्तु न विकृ
त्यंतरगमनेन कबोदकालोचनापेक्षायां वा फलत्वकल्पनायामस्तु भयानपेक्षफलांतरकल्पनायासम
वृ गौरवग्रस्तत्वेनान्याय्यत्वात् अंगांतरपरिसंख्यायाश्च गृह्मेधीयाधिकरणपंचमपक्षवदंगीक
तौ त्रैदोष्यात् सिद्धांतन्यायेनाप्युपगमस्य च प्राकृतांगविधिनिष्पत्त्युत्तरभाविनि वैकृतविधौ वक्तु
मुचितस्य प्राकृताग्निविधिसमवायेन निष्पद्यमाने वैकृताग्निविधौ वक्तुमनुचितत्वात् संभवति
त्वाद्दृमिकन्यायेनातिदेशेनासंभवत्प्राप्तिकानांशेन विनं चित्त्वीन स्वर्गकाम इत्यादिविधिविहि
तानां चयनाभिन्नकाम्यगुणां प्रकृतावपि वि विकृतिष्वप्याश्रयोपदेशमहिम्ना प्राप्तिसिद्धेस्तेषां फले

उक्तं चैवं दाशमिकाकरग्रंथे अतश्चास्तुं नाप्राप्त काम्यगुणप्राप्तिफलत्वं तथाऽपूर्वविधित्वेन निर्णी-
तेष्वपि वैकृताग्निविधिष्वप्रकृत एव प्रकृतोद्देश्यसंबंधित्वेन स्वविषयप्राप्तिफलकत्वाभावादप्राप्तिः
अत्राहुः नैवाऽप्राप्तिः संगच्छते अर्थवादाधिकरणेऽभाणि प्रतिषेधसूत्रे वार्त्तिकन्यायसुधाकृ-
द्भ्यां पशुकामश्चिन्वीतेत्यादिवाक्येः फलार्थत्वेनोक्तस्याग्नेरनंगत्वेऽनातिदेशतोऽसंभवत्प्राप्ति-
कत्वे समनुक्तविधीनां काम्यगुणप्राप्त्यर्थासंभवात् नवय एवं विद्वानग्निं चिनुत इत्युत्पन्नस्याग्नेस्
क्रतुवाक्येः फलार्थस्यापि संयोगपृथक्त्वन्यायेन खादिरतावदग्निष्टोमादिवाक्येः क्रत्वर्थत्वम-
पि किं न स्यादिति शंक्यं फलार्थतयाविहितस्याग्नेरनारभ्याधीतस्य खादिरतावत्प्रकरणादात्र-
यमलभमानस्यावश्यापेक्षिताश्रयसमर्पकत्वेनैवाग्निष्टोमादिवाक्यानामनुपेयत्वात् य

घपिदीक्षणीयादिसोमिकांगसंकीर्णसाविहोमाद्यंगवत्वात्तद्वैशेषिकगुणरूकमुपनिमोचनाद्यंगवत्त्व
लिंगादग्नेः सोमयागाश्रितत्वं संभाव्यते तथापि न क्रत्वाश्रयत्वं तस्यावाविनिकोन्तरवेघवरुद्धायाल्लै
गिकनद्धिरोधस्याश्रयत्वायोगात् विकृत्याश्रयत्वे संभाविते मुनिष्टोमो स्थानिरात्रवाक्यानि तस्य
प्रकृत्याश्रयत्वज्ञापकानि भवेयुः अप्राप्तपक्षप्राप्तित्वाद्विधेः तथा वसतिवावनिकाश्रयनिराकां
क्षस्य लैंगिकाश्रयकल्पनाया असंभवे सति द्विरात्रादिवाक्यान्यथाश्रयज्ञापकानीत्येवमुक्तस्थि
तिरुद्विनेति ननु नेन युक्तं लैंगिके नापि कामनयास्वतः प्रबल्ले नाग्निनावावनिक्या अपि नित्यत्वे
नस्वतो दुर्बलायास्तत्र वेदेर्बाधसंभवात् चमसमोहा ६ नाद्योसामान्यविशेषाद्न्यायतोपि विप्रतिषिद्धन
वाधसंभवेनेदृशस्याप्येवं काम्यानित्यवाधन्यायासंकीर्णोदाहृतत्वसंभवात् वस्तुनस्तु नैवोत्त

वेद्यग्न्योः परस्परबाधकत्वं उत्तरवेद्यां चाग्निप्रणयनमिति श्रुतिबलेनाग्निनिधाने विनस्यत्वोत्तरवेधे
वेदिवर्हिषोश्च हविरासादनरूपसमुदायावगमात् अतो नेर्लिंगादेवप्रकृतिविकृत्याश्रितत्वे
प्राप्तेऽग्निष्टोमादिवाक्यानि क्रत्वंगत्वपराणीत्येवामुपेयं न वाऽऽरम्भाधीनस्याग्नेः काम्यतयाप्रकृतौ
वाह्यस्तकृत्वादिति न्यायाविषयस्यालिंगात्मकलसोमयागाश्रितत्वे प्राप्ते केषुचित्समुन्नविधिश्रव
णमित्तराश्रितत्वपरिसंख्यार्थं कुतो न स्यादिति शंकायां अंत्यं नाप्राप्तपरिसंख्यानतः क्रत्वंगत्वप्र
तिप्रसवस्यैवोचितत्वात् आधानविधिसिद्धस्य यदाहवनीये जुहोतीति क्रत्वंगत्वनयावगत
स्याहवनीयस्य संस्कारकतयावगम्यमाने हविवयनेन्द्रकृद्वारा पूर्णानायामिवाहवनीयद्वा
राक्रत्वंगत्वं प्रसिद्धं नत्वेवमाहवनीयद्वारानन्साध्यमकलक्रत्वर्थत्वापत्तिः यत्क्रत्वर्थोऽग्निः स्या

इत्थं निधीयते नादर्शकल्पनाया एवोचितत्वात् सोमयागसंकीर्तनयोगस्य वचनस्यानु
ष्ठानमादेशपात्मकस्थाने न विशिष्टसोमयागांगत्वं निश्चयात् इत्थं प्रसिद्धं क्रत्वंगत्वमग्नेः काम्य
त्वबोधकवाक्यैरयोदितं शास्त्रेण फलवत्तयावबोधितेः क्रत्वंगत्वं कल्पनायाश्च व्युत्थानात् नत्वप्रति
प्रसवो ग्निष्टोमादिवाक्यैः क्रीयते ज्ञापकत्वात् अतः प्रकृत्यंगत्वेन विहितस्यातिदेशेन संभवसा
न्निकृष्टप्राप्तकेषु काम्यगुणप्राप्तिफलकेषु वैकृतविधिषु भवेद्प्राप्तिरिति मैवं भवतु क्रत्वर्थ
बोधकान्युक्थ्यवाक्यानि तथापि न तावदग्निष्टोमे षोडश्यतिरात्रवाक्येष्वप्राप्तिः तेषां संस्थावत्प्रकृताव
प्राकृताग्निप्रापकत्वात् न च प्रकृतिभूतयोः षोडश्यतिरात्रयोरग्निष्टोमविकारत्वादतिदेशेनाग्निलाभः
शंक्यः तयोः संस्थयोः काम्यगुणत्वेनाश्रयीभूतज्योतिष्टोमविकारत्वेपि तद्विशिष्टज्योतिष्टोमस्याविकारत्वात् स्तोमगुणः

एकस्मिन्नेव हि ज्योतिष्टोमे ग्निष्टोमसंस्थादर्शे विपसदन्नि

उक्थ्याषोडश्यतिरात्रसंस्थास्तु तत्रैव गोदोहनवत्काम्या गुणाः । अतो दर्शवदेव गुणभेदमात्रेण
न तस्य प्रकृतिविकृतिभावः संभवतीति नातिदेशेनाग्निष्टोमो ऽतिरात्रोक्थ्यसंस्थयोर्ज्योतिष्टोम
योः नाप्यग्निष्टोमवाक्योपदेशमाहिम्ना तत्र तत्कामः । अग्निष्टोमे राजन्यस्य गृह्णीयादिति वद
न्यसंस्थयोस्तयोस्तदग्रहणे तैः तस्मादग्न्याग्निष्ठापकत्वेनाग्निष्टोमादिवाक्यत्रयेनाप्याप्तिः
नन्वेवमप्यग्निष्टोमादिशब्दानां प्रकृतिविकृतिसाधारणत्वाद्दुरूपवाक्यत्रयं तद्रूपानाविर्भवति कृ
तिष्वप्यग्निविधायकमिति वाच्यं तत्र विकृतिविध्यंशे ऽतिदेशसंभवत्वादग्न्याग्निष्ठापके स्यादव्या
प्तिः । अथाग्निष्टोमे राजन्यस्य गृह्णीयात् पादपुरुषग्राह्यो ऽतिरात्रे ब्राह्मणस्येति षोडशिविध
यवचनेष्विवोक्थ्यवचनेष्वप्यग्निष्टोमादिशब्दानां प्रकृतिमात्रपरत्वं किन्न स्यान्न तथा सति ष्व

मा॰ दा॰

॥१४७॥

147

कृतिविकृत्योरग्नेरेकविधिविधेयत्वरूपसमानविध्यप्रतिपादकस्य ग्रहणं समानविधानं स्यादिति सू
त्रस्यानुपपत्तिरिति चेन्न गुणकामयोश्चाप्यर्थमुपदेशरूपत्वयैकरूपविधिविधेयत्वात्मनः सामानवि
ध्यस्य तत्र सूत्रे विवक्षितत्वात् एकविधिविधेयत्वविवक्षानिष्प्रयोजनत्वात् च्यहर्गणेष्विग्निवत्सामा
नविधानं स्यादिति द्वादशाहिकपाक्षिकाह्निकयोर्विषयत्वाद्विध्योः सामानविध्यफलत्वकथनपरे सूत्रेऽ
ग्निवदिति दृष्टान्तोपन्यासेनैतस्य सूत्रस्य तथा तात्पर्यस्य वक्तव्यत्वात् दार्ष्टान्तिके हि प्रकृतोपादिरर्थं
तरसामेति विकृतौ ऐन्द्रवायवाग्रं प्रथममहरिति विधिभेदादेकरूपविधिर्णां विधेयत्वमेवसा
मानविध्यं विवक्षितं ततो दृष्टान्तेऽग्नावपि तो दृश्यमभिप्रेतमिति प्रतीयते तस्मात्प्रकृतिमा
त्रपरोऽग्निष्टोमादिर्वाक्यत्रयेणाप्यग्निरिनैव तथा समानविध्यवाक्यत्वाद्यांशाकृतनवाधिनाके

॥१४७॥

ङ्गोपकारतयावगतस्याग्नेर्वैकृतविधिषु ग्रहमेधीयाज्यभागविधिन्यायेन परिसंख्यार्थत्वसंभवेन तंत्र
रत्नेप्रदर्शितस्य परिसंख्यानिरासस्यासंभवापत्तेः एकविधिविधेयत्वरूपसामानविधेयेनतु वैकृत
विधेः प्रागङ्गोपकारकत्वेन तन्निरासोपपत्तेः किंच षोडशिविषयाग्निष्टोमादिवाक्यगताग्निष्टो
मादिदृष्टानां यथा ज्योतिष्टोमप्रकरणसंकोचकमस्तिनैव मनारभ्याधीताग्निवाक्यगताग्निष्टो
मादिशब्दानां असति संकोचके यदाहवनीये जुहोति जुहोतीत्यस्येवोक्ताग्निवाक्यानामपि प्र
कृतिविकृतिसाधारणत्वमेवोचितं ततश्च विकृतिविध्यंशे भवेदयाश्रिरिति उच्यते यत एव
प्रकृतिविकृतिसाधारणा अमी विधयः अत एवैतदभावेन तत्रसंस्थापक प्रकृत्यंगत्वासिद्धे
र्विकृतिषु नातिदेशनाग्नेः संभवत्याप्त्रिकत्वमिति नाप्याग्निरग्निष्टोमादिगतविकृतिविध्यंशेपि

नापि द्विरात्रादिवाक्येषु प्रकृतिविकृतिसाधारणाग्निष्टोमादिवाक्यैरेव द्विरात्रादिक्रतुगतानामग्निष्टोमा
दिसंस्थाहःस्वौपदेशिकाग्निलाभेऽपि काम्यगुणप्रवृत्त्यनुपपत्तौ काम्यगुणप्रवृत्त्यर्थमग्निप्रापणस्य द्विरा
त्रादिवाक्यैरसंभवात् यद्यपि द्विरात्रादिगतत्वेन संभाव्यमानेषु षोडशिसंस्थेष्वहःसु नाग्नेरौपदेशिकत्वं
नेमोलभ्यते तथाप्येकफलसाधनाहःसु साधारणांगस्याग्नेः षोडशिभिन्नसंस्थाहःस्वौपदेशिक
त्वमहिम्ना तदाश्रितगुणप्रवृत्त्युपपत्तौ न तस्मिन्नौपदेशिकत्वसंपादनस्य किंचित्फलं आश्रय
स्यौपदेशिकानुष्ठानमेव हि काम्यगुणप्रवृत्तौ तंत्रं न त्वनौपदेशिकानुष्ठानाभावोऽपि गौरवात्
अन्यथा दीक्षाकालोत्पन्नतयापभृत्त्रयसाधारण्येन रूपे काम्यगुणानुष्ठानापत्तेः वस्तुतस्तु
अग्निस्तुतलिंगदर्शनात्क्रतुशब्दः प्रतीयतेऽत्यधिकरणभाष्यप्रमुक्ष्येनेत्यनंतरं तमतिरात्रेणेत्य

त्यतः पूर्वं तत् षोडशिनेति वाक्योदाहरणात् षोडशिसंस्थेष्विति तुल्यममग्नेष्टोपदेशिकत्वं अन्ये तु द्विरात्रा

दिवाक्यात्तिनाग्निविधायकानीति यथासंभवमनंतरप्रवृत्तिस्थानविध्यपेक्षितस्तुत्याद्यर्थतया स्वीका

र्येष्वनेष्वपि नाशाप्तिः अथोच्यते प्रकृतिविकृतिसाधारणैरप्यग्निष्टोमादिवाक्यैः प्रत्यक्षाम्नानतत्स

स्थाकास्वेव विकृतिष्वग्निः प्राप्तिस्थानानिदिष्टतत्संस्थासु तत्संस्थाककर्मान्वेषणे काले प्रत्यक्षाम्ना

नतत्संस्थाकक्रतूनां शीघ्रोपस्थित्यात्राग्निविधानेन निवृत्तेर्यापाराणां विधीनां विलंबोपस्थिति

संस्थाकेष्वप्रवृत्तेः यदाहवनीये जुहोतीति वाक्यगतस्य जुहोतेरप्यन्यश्चरस्वकालत्वादित्यधिकर

णे विकृत्युपदिष्टामनहोमादिसाधारणमेवाभ्युपगतं ननु वैकृतातिदिष्टसोमसाधारणमपि प्र

थाकृतः ततश्चाहवनीयेन सह वैस्यातिदेशनात्र प्रकृतौ वाद्धिरुक्तत्वादित्यर्थं नित्यश्च योभवेदिति अ

अतश्चाये षुद्विरात्रादिषु संस्थानां न प्रत्यक्षाम्नानमित्यतिदेशाद्द्वादशाहिकसंस्थालाभः नेष्वग्निष्टोमा
दिवाक्यैरनुपदिष्टोऽग्नेः काम्यगुणप्राप्तिर्न स्यादिति तेषु तत्क्रतुग्रहणमित्यर्थम् अग्निप्रापकेषु द्विरात्रादिविधिषु
स्यादग्नाप्तिरिति स्यादेवं यदि दर्शपूर्वसाधनत्वेनोपादिष्टप्रकरणयनस्यासो दोहः न विधावविवक्षतु विशे
षापूर्वसाधनत्वेनोपदिष्टाग्नेरम्याश्रितगुणफलसंबंधविधावाश्रयत्वेनान्वयः स्यात् इह त्वग्निष्टो
मादिवाक्यैः क्रतुसंबंधकरणात्प्रागेवानारभ्याधीतेन एवं विद्वानग्निं चिनुत इति वचनेनोत्पन्नोऽग्निः
शुद्ध एव रूपेणाक्रत्वादिगुणविधिष्वाश्रयत्वेन संबध्यते ततोऽग्नेर्लैंगिकवाचनिक क्रतुसंबंधाद्य
प्राप्तिस्तत्र न दाश्रिते गुणोऽमेर्विनयमित्यार्थिकस्तेषां क्रतुसंबंधः अर्थात्सिध्यंश्चोपादिष्टानिदिष्टा
निकसर्वक्रतुसाधारण्येनैव सिध्यदिति नातिदिष्टग्रहणयनाश्रयणेऽगो दोहः नवैगुण्यंवदतिदिष्टा

स्याश्रयत्वेऽपि नारुत्यादिगुणानां वैगुण्यं तस्माद्द्विरात्रादिवाक्यानां काम्यगुणश्रुत्यर्थत्वासं
भवात्पूर्वपक्षिणाग्निविधिस्तावकग्रहणानां नैम्योग्निनिवर्त्तकत्वं वा द्विरात्रादिष्वेवानरानिवर्त्तक
त्वं तत्र रेवद्यासहानिविकल्पेन प्राप्ताग्ने निर्धामकत्वं वा स्वीकार्यमिति तन्नेष्वष्यमाप्निर्वक्तुमुचितमिति
तन्न तथाहि यत्रोवत्काम्यनयाविहिताग्नेराश्रयार्पकत्वमग्निष्टोमादिवाक्येषु दृष्टं तत्र पशुकामः
श्चित्वीनेत्यादिवाक्ये भावार्थाधिकरणन्यायेन स्थलनिर्माणात्मकचयनरूपक्रियाया एव फलोद्दे
शेन विधानात्कस्याश्रयापेक्षेति आलोचनीयं यत्र हि धात्वर्थः प्राप्तः उपपदार्थश्च द्रव्यादिरप्रा
प्तः तत्रैव फलवाक्यभावार्थाधिकरणन्यायप्रवादत्वेन गुणकामाधिकरणन्यायावतारः ननु
धात्वर्थोपपदार्थयोः प्राप्ताप्राप्तत्वाभावे वा अनत ऐन्द्रवायवाग्रान्गृह्णीयाद्यः कामयेत य

150

थात्र्वंघ्रजाः कल्प्येरन्निति विधावुभयोः प्राप्तत्वात् गृह्णात्यामेव फलसंबंध उक्तो दशमे न चैवमत्रैव यथा
धात्वर्थमूर्तग्रहणानां प्रकरणादाश्रयत्वलाभस्तथेहापि धात्वर्थमूर्तत्वेन यस्य स्थापितत्वाभोवाप्यइत्यपि
शंकास्पदं दृष्टांते विक्रियारूपाणां तेषां माश्रयाकांक्षायाश्च संस्तवेन प्रकरणात्तल्लाभोक्तेरप्यपु
क्तत्वात् यदि च सामान्यः क्रियारूपत्वमतेसोमरेण स्कवीनेन्यत्र स्तोत्रस्य वाक्याग्निग्रहवाक्ययोराश्रयत्वा
भिमतया गविघेयानुवादः स्यात् न तत्स्तु तु नुपपन्ना तन्निरूपितस्याग्निग्रहनिष्ठकार्यविशेषस्य
फलसंबंधकल्प्यनेन तद्देवताश्रयाकांक्षासुतरां प्रकरणादिनाश्रयलाभ उच्येत न चैवं न
वामयत्राप्यप्राप्तः कश्चिद्गुणो विधेयो दृश्यते दध्यादिवद्यदाकांक्षयाश्रयान्वय उच्येत न चैवं

क्रतुमनाश्रित्यफलायविहितानामग्निग्रहाणां क्रतोर्बहिरप्यनुष्ठानापत्तिः एकविंशतिमनुब्रूया
त्प्रतिष्ठाकामस्येत्यादिवचनविहितानुवचनानां काम्यानुवचनानामिव क्रत्वंगेष्वपि विधिक्रमत्वा
त्वदुपन्यस्तक्रत्वंगसंकीर्णत्वैरंगविकृगुणत्वाक्रत्वंतःपातित्वनियमोपपत्तेः एतेन लिंगादाश्र
यत्वाभस्पर्शंकापरिहाराप्यमुक्रत्वंगत्वबद्धोध्यो सन्निकृत्वंतःपातमात्रे प्रसक्त्याभाश्रयाकांक्षायां
लिंगात्तत्क्रतायाश्च अनुष्ठानात्तु नवाभाविप्रतिषेधसूत्रस्यात्काम संयोगात्तु ऽगिरिति वार्तिकादपेः
फलसंबंधाद्गमात्तस्यैवसिद्धत्वादाश्रयापेक्षोपिनैतिशंक्य एवमपिप्राप्तृवैधुर्यादेरिवप्रकृतक्रि
याकारकीभूतस्याहवनीयाग्नेः फलायविधानाब्धयनस्यैवप्रकृतत्वात्तस्यवाक्येऽनुवादद
र्शनादेवाश्रयः स्यात् न तु क्रतुराश्रयत्वेनापेक्षणीयः वस्तुतस्तु वार्तिकात्पूर्वग्रंथे न्दृष

थिव्यामग्निश्चेतव्य इति न निषेधः तथात्वे वचननिषेधकत्वमेव स्यान्न पृथिवी निषेधकत्वं तत्र च वचन
विधिविरोधः तत्र विकल्पेन विधिनिषेधोपपत्तिः पाक्षिकवाधप्रसंगादित्युक्तं तत्र वचनपा
क्षिकत्वार्थमेवमनुनिषेध इत्याशंक्य तस्याविधिकारान्तरेण सिद्धत्वान्न तादर्थ्यमपि निषेध
स्येति वक्तुमुक्तं कामसंयोगाच्चाग्नेरस्यैव पाक्षिकत्वमिति तत्र प्रकृतवचनक्रियाया पाक्षिक
त्वस्य न स्यात्तस्याः कामसंयोगेनैव सिद्धेरग्निशब्दस्य क्रियापरत्वमेव कल्प्यमनुवित्तं दुर्बलश्च प्र
तिषेध इत्युत्तरग्रन्थे प्रतिनिषेधे क्रियापाक्षिकत्वपरत्वनिराकरणात् विशेषणोपादाने तत्र त्व
रनयावगतस्य निषेधस्य क्रियापरत्वेन कल्प्यत्वाद्दौर्बल्यमित्याशयेन हि तथा च तत्र यस्तु
धाकारः तस्मान्नाग्निकपर्यायोच्चने न पशुकामश्चिन्वीतेत्यादिवाक्ये क्रियाया एव फलस

लसंबंध प्रतीतेनाश्रयाकांक्षोपपत्तिः न वाग्निसंस्कारकर्मत्वमवगन्तव्यं चयनस्य फलसंबंधेन
प्रधानकर्मत्वमनुपपन्नमित्यपि शक्यं सामिधेनीसंस्कारकानुवचनस्येव सोमसंस्कारार्थग्रहणे
नामिव बावचनवत्त्वेन तदुपपत्तेः तस्मान्नाग्निष्टोमादिवाक्यैषामध्यस्मार्थकत्वसंभावयितुमुचितं
=आस्तां वाः श्रयाकांक्षागतेः नापापि न लिंगादेवनं क्लामसंभवान्नतेषां न वर्षकत्वं पदश्रौत्वं तु नर
वेघवरुद्ध प्रकृतेर्नैमित्तिकाश्रयत्वाप्राप्तेस्तस्याश्राश्रयत्वप्राप्यमाणार्थान्याग्निष्टोमादिवाक्यानीनेति
तदप्यसाधु लैंगिकविरुद्धत्वाश्रयसंबंधेनाग्नेर्नैराकांक्ष्येप्रतीतेषां वाक्यानामेकत्वे गपरतापा
एवक्रमो वितथात सर्वोहिविधिः किंचिंदुद्दिश्य कश्चिद्विधत्ते प्रवृत्तिजनस्वभावः =आश्रय
संनिपरे वविधावत्र्यपसविधेयः नत्वाश्रयमुद्दिश्यगुणोगुणमुद्दिश्याश्रयेवाप्रवृत्तिजन

प्रवृत्तिजननं संभवति तयोः परस्परं परोद्देश्यक प्रवृत्तिविषयत्वात्मक पारार्थ्यायोगात् अग्नेराश्रया
कांक्षायामगत्या तत्स्वभावहानिमंगीकृत्यापि स्वीक्रियेताश्रयसमर्पकत्वं विधेः लौगिकाश्रयेण
तस्यां निवृत्तायां तु विधिस्वभावसंरक्षणाय कृत्वंगत्वपरत्वमेवोचितं अत एव भाट्टैर्नैकाविद्धावनि
कश्चिदाश्रयसंबंधोंगीक्रियेत तयोस्तर वेद्ययोर्हि नाश्रयप्रतिप्रसवलाद्वदाश्रयसमर्पकत्वमुचितं
त्वदुक्तरीत्या कृत्वंगत्वप्रतिप्रसवेपि लाघवात् अथ यदंगीकृत्य कृत्वंगत्वपरत्वमग्निष्टोमादिवा
क्यत्रये प्रकृतिविकृतिसाधारण्येन नाथ्यापि मुक्तं अग्निष्टोमवाक्यप्रकृतिमात्रपरत्वात् न
चादि यथाश्चल्वाहवनीये जुहोतीति विधिर्होमांगत्वेन आहवनीयविधानं कुर्वन् जुहोतिचोद
नोपदिष्टेषु प्राकृतवैकृतेषु नारिष्टहोमामनहोमादिष्वाहवनीयं विधत्ते नातिदिष्टे वैकृतहो

ष्यपि तेषां विलंबोपस्थितत्वात् द्विरुक्तत्वापत्तेश्च तथा चयनकाम्यत्वबोधकवचनाभावे चयनविधिना
हवनीयसंस्थारकत्वेन चयनं विदधतोक्तानुष्ठानस्यादेश्यसहकृतेनाहवनीयविशिष्टसोमयागांगत्वं
चयनस्याज्ञापयतानैवसोमयागेन द्वैशिष्ट्यमुपदेशेन साक्षादवगतं न तत्रैव तदंगत्वं प्राप्तेन तत्रैव
च सोमयागेन द्वैशिष्ट्यं तथावगतं भवति यदंगत्वेनउत्पत्त्युपविधानाय च तुरवत्तं जुहोतीति वत्सान्य
क्षानिर्देशः न च ज्योतिष्टोमविकृतिषु क्वापि तथा निर्देशोस्ति न तासां यज्ञे तामसीरनुपेयुरित्येवविधाना
न्त्र ग्रहे जुहोतीति ग्रहको विहितस्य ग्रहस्योपस्थितिदेशे नैवलाभोपपत्तेः अतः प्रकृतिभूत ज्योतिष्टोम
स्यैव ग्रहे जुहोतीत्यादिषु तत्र द्वे जुहोतीति निर्दिष्टत्वात् तत्रैवाहवनीयवैशिष्ट्यमुपदेशेन साक्षादवग
तमिति काम्यत्वबोधकवचनाभावेन तदंगत्वमेव चयनस्याज्ञानुष्यात् तदुक्तरीत्या सर्वसंस्थज्योति

माहा०
१५३
153

ष्टोमस्य प्रकृतित्वेन च सर्वसंस्थस्योऽग्निष्टोमांगत्वमेव प्राप्नुयात् तदपवादे काम्यत्वबोधकवचनैः प्रसक्ते प्रति
प्रसवं कुर्वदग्निष्टोमवाक्यं प्राप्तिप्रकृतावेव कुर्यादिति न तस्य विकृतिविषयत्वं तत्र सर्वसंस्थायामेव तत्
स्यात्तं कुर्यादिति नोक्थ्यातिरात्रवाक्ययोः प्रकृतिविषयत्वं न चाग्निष्टोमपदोपेतवाक्येन कथमन्यसंस्थेऽप्र
तिप्रसववदप्यविशक्यं प्रतिप्रसवोपजीव्यप्राप्तिसाधारण्यानुरोधेन श्रौतविधानत्वाय चवायादिनोद्देश्य
ताकयागविशेषणत्वेन च न द्विवक्षाया ज्योतिष्टोमायातत्वात् षोडशिनि ऽप्येवं ब्रूयादिति वचनेषु षोडशि
पदस्य प्रकरणपठितमेधागम्येनेनग्रहेणावच्छिन्नयस्यादिविधाकृताग्निमुवचनपरिचयार्थनिर्देशवज्ज्योति
ष्टोमनेजरूपमन्नाग्निष्टोमसंस्थाद्यागदृश्ययागविशेषपरिचयार्थं निर्देशसंभवाच्च अग्निष्टोमसंस्था
याज्योतिष्टोमस्नेजरूपत्वानाल्लोचनेनाहि अग्निष्टोमादिवाक्यत्रयमध्ये कुत्रचित् प्रसवपरत्वमाश्रित

१५

ऽन संस्थायाश्चाविवक्षाश्रयणीयेति विनिगमनाविरहः स्यात् । अथो विनेतु वाक्यार्थान्वयिन्या
ऽपि तस्यास्त्वाद्दृष्टेन तन्महिम्नैव षट्प्रथमवाक्ये ज्योतिष्टोमस्य तु धारोहादग्युरपि विशेष इति न्यायेनात्रैव ता
दर्थस्य सिद्धत्वपरत्वमिति विनिगमनालाभः । अत एवोक्तम् नित्यानित्यसंस्थयोर्यत्र विकृतौ नैजरूपल
न द्विषयत्वं तद्वाक्ययोः यद्यपि नित्यकाम्यसंस्थयोः पाक्षिकसंबंधोऽविशिष्टः तथापि नित्यवद्विधिम
हिम्नाग्निष्टोमसंस्थायां संभवति स्वाभाविकत्वबुद्धिः संस्थान्तरयोगे तु नाभाविकी यन्म
हिम्नैव गावषट्प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमस्तस्याग्निष्टोमसंस्थस्यैव प्राथम्यं विवक्षितमिति नि
श्चितं पंचमे तस्मादग्निष्टोमवाक्ये न निर्ज्ञानि केवलप्रकृतित्वं गमावस्यातिदेशेन संभवत्वप्राप्रिक
स्य केवलविकृतिसंबंधप्रापकयोरुक्थ्यातिरात्रवाक्ययोः स्याद्व्याप्तिः भवतु वाक्यत्रयस्य प्रके

तिविकृतिसाधारण्यं तथापि विकृतिविध्यंशे भवदेव तेषु व्याप्तिः न हि लक्ष्यविध्यभावे त्यंताप्राप्ति
रपूर्वविधिलक्षणे विवक्षिता येन भवेदुक्तरीत्या व्याप्तिः शक्यपरिहारा स्यात् तथा सति सोमेन यजे
तेत्यादेः सोमाद्यंशे प्यपूर्वविधित्वापत्तेः न हि विध्यभावे यागस्वरूपस्यैवानवधारणेन तत्साधनतया
सोमादिप्राप्तेरसंभवात् तस्माद्यद्वाशिष्यद्यद्विधानाय लक्षणविध्यप्रवृत्तेस्तयोः संबंधाप्राप्तिः तत्र त
द्विधायकत्वं तत्तस्यापूर्वमिति विशिष्टलक्षणं वाच्यं तत्र च सोमेन यजेतेत्यस्य विधेर्यागविधौ तात्
पर्यवृत्तौ तदुद्देशेन सोमं विधायकत्वाप्रवृत्तेः सोमस्य पाक्षिकप्राप्तिसंभवात् सोमांशे नापूर्वविधित्वं सम्भ
वस्तथोक्ताग्निविधानां प्रकृत्यंगत्वे तदग्निविधानाय प्रवृत्तो विकृत्यंगत्वेन तद्विधानाय प्रवृत्तो विकृती
नामिधित्वेनातिदेशतः प्राग्निप्राप्तिसंभवात् विकृतिविध्यंशे पूर्वविधित्वासंभव इति ~ प्रकृतेवा

ऽग्निष्टोमादिवाक्यत्रये त्वदुक्तरीत्याऽव्याप्तिपरिहारः द्विरात्रादिवाक्ये तु स्यादेवाव्याप्तिः अत्रानुप
दिष्टसंस्थाकेषु तेषूक्तरीत्याऽतिदेशसंभवस्याग्निकाग्निज्ञापकत्वात्तस्य यत्तु क्रत्वपूर्वसंबंधप्र
भृत्यभावात्प्रसिद्धवचनमात्रस्पर्शेनाकृत्यादिगुणान्वयत्वाश्रयत्वात्तस्याप्यर्थे न विकृतौ वचनो
पदेशापेक्षेति तन्न क्रत्वपूर्वसंबंधाभावे वचनभावनायाः फलाकांक्षाशांत्यभावेन वचनकर्तव्य
तावोधपर्यवसानाभावे वचनस्याश्रयात्वान्वयायोगात् उक्तं हि संस्थाधिकरणे पूर्वप्राप्ताकर्तव्य
तयानिर्णीतां क्रियामाश्रित्य फलाय संस्थास्तु विहितास्तु तत्कथंभावाकांक्षयेतिकर्तव्यतयान्व
योवाच्यः तत्कर्तव्यतानिर्णयश्च तद्भावनायाश्चांशत्रयान्वयात्प्रागिति प्रथमं ज्योतिष्टोमभाव
नाशेषमन्तरंगवाक्येऽभविनिष्यं तच्छेषत्वेन निराकांक्षीकृतानां च पश्चात्सहतत्संस्थाविधिशेष

त्वंन्नभूयःसंभवतीतिनिरसमानविधानत्वंसंस्थानामिति यदाचज्योतिष्टोमभावनायाइतिकर्तव्यता
कांक्षोपशमाभावेज्योतिष्टोमस्याश्रयान्वयायोग्यत्वंनदाकिंतुवक्ष्यमाणभावनायाश्चाभ्यर्हितत
रफलाकांक्षोपशमाभावेवचनस्यतदयोगपत्वेऽन्यवश्यंशास्त्रोपदिष्टापूर्वविशेषसाधनत्वोपाहितस्य
वद्गुणवचनवचनस्याश्रयत्वंवाच्यं अन्यथाऽनवगतफलविशेषस्यवचनस्यफलवद्गुणसंबंधेऽप्य
त्वप्रसंगेनाश्रयत्वस्यदुर्निरूपत्वात् नचक्रत्वंगत्वासवगमेपिपशुकाममभिव्याचातेतिफलसंबंधावग
मादाश्रयत्वोपपत्तिः फलक्रतुसंबंधबोधकविध्योरेकत्वेपिविनियोजकत्वेकस्यैवपूर्वग्रहत्रोनिय
माभावात् वस्तुतोव्रीहीनितिद्वितीययेवोत्पत्तिवाक्यगतयाग्निमितिद्वितीययेवापूर्वसाधन
लक्षणासहकृतयाक्रत्वंगत्वसिद्धिरितितदपूर्वविशिष्टवचनस्यैवाश्रयत्वं नचकोम्पत्वयो

नच काम्यत्वबोधकविधिनाकृत्वंगत्वापवादान्नैवमिति वाच्यं संयोगपृथक्त्वन्यायेनाबाधेनापि संभ
वत्सहवृत्तिकेन नेनोत्पत्तौ उत्तीनस्य श्रौतांगत्वस्य बाधायोगात् नचैवमन्यथानो नित्यमित्यस्य प्रतिक्रमवत्वा
संभवान्नैवमिति वाच्यं उपदिष्टाग्निहोत्रसंस्थे ऽग्निहुत्दाद्दौ गुणफलमभ्यासेन स्वाप्याप्तिविधायकत्वात्
तथा चाकरमर्थदाग्यागे तत्राप्यप्राप्तिरिति ननश्चैव विकृतिषु काम्यगुणप्राप्त्यर्थः संभवत्येव वय
नैवविकृत्यपूर्वसाधनत्वोपदेशादतिनत्परेषु वाक्येषु स्यादेवाप्राप्तिरिति भवत्तु नाहि पंचमः पक्षः
प्रायणीयरूपविशिष्टोयद्विषयः प्रकृताप्रकृतान्यतरोद्देशसंबंधित्वेनात्मनोऽप्राप्तस्तत्वमिति न
था चनोक्ताप्याप्ती व्यामनहोमविशिष्टसोमयहायणोपाग्रामसाधनत्वेनाप्राप्तेः काम्यगुणविशि
ष्टस्य नस्याविकृतिसंबंधाप्राप्तिविधेस्तदनुत्पत्तिविधौ न तत्रोऽपि विशिष्टस्य न तत्र दधिकाराबि

विधेः फलसाधनत्वविशिष्टस्याप्राप्तेरिति चेन्न एवमपि हि आहवनीये इत्यग्निहोत्रप्रकरणाम्ना
नविधावव्याप्तेः तथाहि अग्निहोत्रे श्रूयते आहवनीये वनेस्तोमादि प्रत्यवनेस्तोन्वाहार्यपच
ने दशगार्हपत्ये विराट् य एवं विद्वान् विराट्संपन्नमग्निहोत्रं जुहोतीति तत्र हि आहवनीयादित्यनेनना
हवनीयविधिः यदाहवनीये जुहोतीत्येव प्राप्तेः नापि विराड्वाक्योत्फलानादेशात् नानामधे
यस्याकुनिधुनत्यादिसंख्यानाश्यमानविधिबलादेव तत्सिद्धेः भवतु तदष्टानामेग्निहोत्राभि
कारविधिबोध्यफलसंबंधाय एतद्वाक्यामाबोधितत्स्तुतिवाक्ये आग्नेकर्मणि संख्यायोविधि
संभवादग्निहोत्रपदानभिधेयानामपूर्वकर्मणां विधायकं स्यात् अग्निहोत्रं जुहोतीत्युपक्र त्र
मणे एवं तदसंभवात् न तत्र विराट्संपन्नवाक्यस्याग्निहोत्रान्निहोत्रसमुदायेनैवाग्निहोत्रशब्दः

सन्नदर्शाग्नित्यत्र दृष्टशब्दद्व्यग्निहोत्रं जुहुयात्स्वर्गकाम इति विधिनामुख्यस्यैव फलसंबंधः
स्यान्नान्येषां ॥ अनेन वाक्येन द्वयोराहवनीयसंबंधे कृते तु शिष्टाभ्यासानामितरवाक्याकांक्षया
मग्निमात्रविधानं सुकरं समं स्यादिति न्यायप्राससंख्याया अनुवाद्यत्वसंभवात् ॥ ततश्च द
र्शाग्निहोत्रवाक्योत्पन्नस्यैव होमस्याभ्यासाः इति सर्वाभ्यासविशिष्टस्यैवाग्निहोत्रस्य फलसं
बंधसिद्धिरित्यंत्यं नाप्राप्तप्राप्तिफलकत्वेनापूर्वविधित्वयालक्ष्यम् तेस्मिन्वाक्ये विषयस्या
हवनीयस्यद्वेनापि रूपेणाकृत विरप्युद्देश्यः प्राप्त्यामावाद्व्याधारिति ॥ अथाद्यपक्षयोर्द्वितीयः
सन्निसमभ्यमीतिपक्ष आश्रीयते तथासति यत्किंचित्संबंधित्वेन यस्मिन्कस्मिंश्चिद्दशाभ्यसनिषु
हृत्तत्वस्यापूर्वविधिलक्षणत्वान्नानंतरोक्ताप्यव्याप्तिः ॥ अष्टानां होमानां फलसंबंधेऽप्याहै

सति हि आहवनीयस्यास्य प्रवृत्तेरिति चेत् न तथापि यस्मिन्न प्राप्ते सति प्रवृत्तत्वं लक्षणत्वेन विव
क्षितं न त्वप्राप्तिफलकत्वमपि लक्षणे वक्ष्ये प्रवेशनीयं अन्यथोलूखलं प्रोक्षणे प्राप्ते सति प्रवृ
त्तेर्हन्तिविधावतिप्रसंगात् न तस्य स्वाप्रवृत्तौ पदसंबन्धित्वेन पदप्राप्तेन संबन्धित्वे नूतनत्वाप्ति
फलकापूर्वविधित्वस्याप्तेः यथाभ्युदयाशिरस्कप्राप्त्यभाव एवोक्तलक्षणे प्राप्तिपदेन विवक्षि
तः मतत्र्यीकायाम् अध्ययनविधिवशेन ज्योतिष्टोमेनेत्यादिविधिजन्यायाः एव स्वर्गसाध
नत्वप्राप्तेरभ्युदयजनकत्वकल्पनात् स्वाध्यायाध्ययनविधिवशेन स्वशास्त्रीयविधि
जन्यायाः एवाग्निहोत्रादिप्राप्तेस्तत्कल्पनात् यथा हिंसाप्रदर्शपविधेरनाप्याधीनस्य मिश्र
विंदादिप्रकरणगतेनाग्निविधिनोपसंहारे गीकृते प्रकरणगतेनैव सामिधेनीद्वारकत्वे

क्रतुसंबंधसिद्धेः किमनारभ्याधीतेनेति शंकायामुक्तं नन्वत्र लब्धे गावपदयाम्नानवशादुभयत्र
न्यङ्गानस्याभ्युदयकारित्वं कल्पनशक्ति न न्वयुक्तोयं दृष्टान्तः अनारभ्याधीनविधेः सर्वविधि
षु प्राकृतपांचदश्येन सह वैकल्पिकसाप्तदश्यविधायकत्वं मित्रविंदादिगतस्यैव नाम्नियाम
कत्वमिति द्वयोरपि दृष्टान्तविशेषकरत्वसंभवेऽभ्युदयफलत्वकल्पनायाश्चानुचितत्वात्
तत्वोपदेशिकेन साप्तदश्येन प्राकृतपांचदश्यस्य बाधोचितत्वात्कथं विकल्पप्रसक्तिरिति
वाच्यं मित्रविंदादिगतस्यैवेत्यपार्थमाभूदित्यनारभ्याधीतेनवचसाप्राकृतपांचदश्य
स्य पाक्षिकीं प्राप्तिं सोढ्वा पाक्षिकनये वैसाप्तदश्यविधानात्तु न नतोपदेशो करोती निर्वच
सोऽतिदेशेनाऽप्यभागप्राप्तिं सोढ्वा पाक्षिकप्रतिषेधवदिति मैवं अतिदेशप्राप्तपां

वदश्यस्याप्राकरिकत्वेनक्लृप्तोपकारकत्वेनववत्सवन्नयानेनैवानारभ्योक्तसान्नदश्यस्य
वाधेमन्तिविकल्पायोगात् उक्तं हि चित्रयायजेत पशुकामइत्यत्रमेषीयागानुवादेनचि
त्रत्वविधिशंकायांआकृतकेष्मसारंगाभणांविरुद्धत्वान्नचित्रत्वविधिसंभवइतिचित्राधि
करणन्यायस्तुक्षायां नाहि मित्रविंदादिगतवाक्यवैयर्थ्यपरिहारायतादृशेनापिपांवद
श्येनस्वस्यपाक्षिकत्वमंगीकृत्यतइतिवाच्यमितिचेत् साधोऽमेकविकृतिगतस्यानेकौ
दकश्राप्तस्यपांवदर्शपस्यपाक्षिकत्वकल्पनातोऽलघीयसांआकृतिमात्रगतपांवदश्य
स्यपाक्षिकत्वकल्पनांकिमितिनकरोषि भवनांहितयापिनहेस्पथ्यपरिहारः भव
तुसैवकल्पनानावनाप्पमुदयफलकल्पनानुचितैवेतिचेत् मैवं अर्थवादादौहष्ट

नाभ्युदयफलकत्वेन वैय्यर्थपरिहारे संभवत्यानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायानवतारे
बलत्वेनापांचदश्यादिनास्य पाक्षिकबाधानभ्युपगमात् नन्वेवमपि सप्तदशवैश्यस्यान्यनेनैवोपसंहा
रसंभवादुक्तदृष्टांतासंभव इति चेन्न पांचदश्येन बाधितस्य सामान्यतः प्रकृतस्य पूर्वं संबंधाप्राप्तेरुपसं
हारायोगात् भवतु नाम दर्शपूर्णमासाधिकारिसामान्यसंबंधित्वेन प्राप्तस्य पांचदश्यापोदितस्य
वैश्यसंबंधित्वेन प्रतिप्रसव इति चेन्न एवमपि अनारभ्याधीतविधेरभ्युदयशिरस्कत्वापरिहारे बहू
नां वैरूवाक्यानां संहारसंबंधापूर्वसंबंधात्मककार्यद्वयपरत्वनिमित्तगौरवपरिहाराय वैरूतवि
धिभिरुपसंहारस्योचितत्वात् तस्माद्युक्तो दृष्टांतः उच्यते एवं सति व्रीहीनवहंतीत्यत्रापि नियमा
प्तिः अध्ययनविधिबलेन तत्क्रतुनाराएवावघातप्राप्तेरभ्युदयकारित्वात् आक्षेपस्तावदहश

भा दी
१५९
रत्न
159

प्राप्तेरभावात् अथ स्यादप्रवृत्तेरित्यत्र विध्यन्तराप्रवृत्तिविशिष्टायां केवलायां वेति विशेष्यते न तावन्नो
क्तावाप्ती सार्वकामविध्यप्रवृत्तिविशिष्टायां स्वर्गकामविधिप्राप्तौ स्वर्गसाधनत्वाप्राप्तेः शास्त्रान्तरीय
विध्यप्रवृत्तिविशिष्टायां स्वशास्त्रीयविध्यप्रवृत्त्यावग्निहोत्राद्यप्राप्तेरिति चेन्न वैकृते रथन्तरप्राप्तिसंभव
तीति एष स्तोत्रनियमविधौ तत्रेह त्विहाप्रसंगस्य तदगति वैकृते षोडशिनियमविधौ वाति
व्याप्तेः अतिदेशाप्रवृत्तिविशिष्टायामपि तद्विध्यप्रवृत्तौ स्तोत्रे षोडशिनो रन्यन्ताप्राप्तेः व्रीहिभिर्य
जेतेत्यत्रापि विधानेष्व केवलेन तत्प्रवृत्तेर्यव नियमप्रवृत्तेर्नदितरनिरासेन व्रीहीणामन्यता
प्राप्तेः एतद्दोषपरिहाराय केवलायां वेति विशेषणादाने व्रीहीन्प्रोक्षतीत्यत्राप्याप्तेः नहि प्र
वृत्तिमात्रेणैव तत्रैल्लक्षणसंभवात् तत्र फललक्षणस्य वैकृते न रथन्तरादिविधिप्रस्थिति

१५९

र्दोषात् एकस्यानेकलक्षणयोगेनानेकहेत्वाभासरूपत्ववदनेककृविधिरूपत्वोपपत्तेः उपधे
यसंकरेऽप्युपाध्यसांकर्यान् इष्यते हि सृष्टीरुपदधातीत्यत्र विशेषभेदेन लक्षणत्रयसांकर्यान्
तथाहि तैत्तिरीयाणामासामुपधाने मंत्र इतीष्टकास्तु न्नुक्तमनोरितिकाणानि स्मृतेः सृष्टिशब्दस्येहद्र
ष्टिपदेऽपेतमंत्रोपधेयेष्टकावाचित्वेऽपि नेष्टकाविधिपर एष विधिः इष्टकाभिरग्निं चिनुत इति वि
धिमहिम्नैव सर्वेष्टकानां चयनसाधनत्वप्राप्तेः तासां चानुपदिनानां नत्तत्साधनत्वसंभव
नीतिजन्महिम्नोपधानशास्त्रैर्नतद्विधिपरोऽपि अथ यद्यपि प्रधानेऽमंत्रावृत्तिन्यायात् इष्टकामु
पधानशास्त्रेभ्य एवतूपधानविधिः अन्यथा मन्त्रदिनानां भपिनन्त्रसक्ते रिति चेत् न एकेनोपधा
नविधिनोऽन्यप्रयोजनसंभवेऽस्त्र सृष्टीरुपदधाति प्राणश्च नत्तउपदधातीत्यादावनेकोपधानविधि

वैयर्थ्यप्रसंगात् नेष्टकेनैवकृतेनोपधानं विधेयमिति वाच्यं नियतुमशक्यत्वात् वस्तुतः प्राजापत्यपशुष्व
नेकवत्तुरवत्तसंस्कारप्रक्षेपस्येवानेकेष्टकासंस्कारकोपधानस्यापि तंत्रानुष्ठानसंभवेन सत्यप्युप
धानविधौ सत्येकोपधानाप्राप्तेः अथ हिरण्यशकलैरग्निं प्रोक्षतीति विहितप्रोक्षणस्येष्टकासंस्का
रत्वपक्षे प्रतीष्टकमावृत्तिवदुपधानस्याप्यावृत्तिस्यादन्यथेष्टकातिरिक्तमवयवनं प्रसाध्य प्रोक्षण
स्य तन्त्रसंस्कारकत्वाभिधानं नावश्यकं तत्संनिष्कृत्स्यादिति चेन्न यदि हि प्रोक्षणमिष्टमुख्यं
स्यात्तदा व्रीहिप्रोक्षणवदवशेषपरिक्रीयमाणं तंत्रेणैवोपकुर्यात् यतस्तु हिरण्यशकलस्याद्
यत्वेन द्रव्यसाधनक्रियावाचिना प्रोक्षतिना संयोजनं लक्ष्यते तत्र नेमं भवत्यावृत्तिः एकेष्टकासंयोज
ने सर्वसंयोजनासंभवात् वस्तुतस्तु प्रोक्षणस्य गुणत्वेपि न व्रीहिप्रोक्षणवत्प्रकृते तंत्रसंभवः यतः सकर्मकर्मक —

धात्वर्थ संस्कारकर्मस्थले विवक्षितोद्देश्यतावच्छेदकविशिष्टे धात्वर्थतावच्छेदकफलोत्पत्तिरेव संस्कारोत्प
त्तिनियामिका विभिन्नचितिप्रदेशाधिकरणक विभिन्नमंत्रकरणकोपधानैर्विभिन्नसाधनभा
वास्विष्टकासु तु ब्रीहिवदेकोद्देश्यतावच्छेदकाभावः तस्मान्नोपधानप्राप्त्यर्थं उक्तः विधिः ना
पि तदंगत्वेन मंत्रप्राप्त्यर्थः प्रकरणादेव तत्प्राप्तेः तच्चेतरमंत्रपरिसंख्याप्राप्त्यर्थः वचनप्रकर
णेन दाम्नानवैयर्थ्यप्रसक्तेः अत्र प्रधाननियतलिंगशून्यायेष्टयास्तु वत्सज्ञात्वस्वस्वमंत्रैत्वे
वमादीनां मंत्राणां मिष्टकाग्रहणादप्राप्तिप्रसक्तेः विनियोगपरिसंख्यार्थः तेषामेव मध्यमविधि
चितिसंबंधप्राप्त्यर्थश्च यांचेन कांचन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावु
पदध्यादिति वचनेऽप्यन्यपक्षप्राप्तब्राह्मणवाहितेष्टकानां मध्यमचितिनिवेशो विधीयत इति पंचमे

स्थापितत्वात् काऽष्टकास्तद्व्युद्यादिमंत्रोपधेयास्तूपधानात्प्राग्निर्णयासंभवेन तत्र ब्राह्मणवाक्या
नामिष्टकाविशेषणोऽमूर्तमंत्रमात्रपरत्वेनोक्तवाक्यस्य तादृशमंत्राणां मध्यमचितिसंबंधपरत्वात्तद्
प्रत्येकोपधाननियमार्थश्च विभिन्नमंत्रोपधेयत्वमद्ध्यैव भिन्नोपधेयत्वस्येष्टकानुसिद्धेः एवं च
स्तद्वीरूपदधातीतिवत्तद्वैकृतनरर्थनरादिविधिष्वभवेत्वनेकलक्षणायोगेन विधिनियमोभयरू
पत्वमितिचेन्न यद्यपि रथंतरादिविधिषु नैवमपूर्वनिष्ठा विधित्ति: तथापि पुरोडाशेन माध्यंदिने
सवने इत्यत्र भवेत् इदं हि वचनं सवनीयपशूनां निर्देशात्प्राक् पुरोडाशयागं कालमुद्दिश्य विदध
द्भवति कालनियमविधिः अतिदेशाव्यवहितत्वेन कालविशिष्टमपूर्वं यागं विदधदपूर्वविधिः स्या
त् तत्र नियमविधित्वे सती हाग्नेयनागतोऽपिमागोऽग्नीषोमीयपशुयागे यदा न्यत्तेस्तदापूर्ण

अपूर्वविधित्वे च विधीयमानयागस्येतिकर्तव्यताकांक्षायां मंत्रवर्णबोधिताग्नेयत्वबलेनाग्ने
यविध्यंतं विशिष्ट एवानुष्ठेयः न चैतदुभयं विकल्पेनापि संभवति वस्तुतोऽतिदेशसत्त्वात् तथा
विश्वजिति सर्वस्वं ददातीति विधिरतिदेशाप्रवृत्तौ सर्वस्वदानापूर्वविधिः स्यात् तत्प्रवृत्तौ नियम
विधिः प्रकृतौ द्वादशशतेनावमयितत्वात् अपि सर्वस्वेनेति सर्वस्वदानस्य पाक्षिकाम्नानात् तत्रा
पूर्वविधित्वे द्वादशशतान्यूनस्यापि दानाद्यावत्स्वस्य दानं स्यात् नियमविधित्वे तु यावत्स्वधनं
त्रेधा विभज्य मध्यपर्यन्ततृतीयभागात्मनो द्वादशशतानाधिकपरिमाणस्य देयत्वस्य यथाप्राप्तस्य सर्व
स्वस्य नियमनात् तादृशस्यैव दानं भवेत् न चैतदुभयं भवेत् वस्तुतोऽतिदेशसत्त्वात् प्रकृताव
व चासर्वस्वं ददातीत्यत्र द्वादशशतविध्यप्रवृत्तिसहितायामेव तद्विध्यप्रवृत्तौ नियमविधित्वं के

162

वत्वैतदप्रवृत्तौ तु द्वादशाहानानियमेन सर्वस्याप्राप्तेरपूर्वविधित्वं स्यात् न चोभयथानुसार्यनु
ष्ठानं संभवति वक्तृतो द्वादशाहानाविधेयत्वात् न च दृष्टार्थस्य कथमपूर्वविधित्वमिति वाच्यं
अत्यन्ताप्राप्तविषयत्वे दृष्टार्थस्यापि अपूर्वविधितायाः व्यवस्थापयिष्यमाणत्वात् यद्यप्येके
लक्ष्यसंग्रहार्थलक्षणवशादापन्नस्याप्यपूर्वविधित्वादेरनुष्ठानाप्राप्तत्वात्तेन दृष्टेनुष्ठा
ति तात्पर्यविपरीतानुष्ठानमापादयितुं शक्यं तथापि लक्ष्याविशेषेणानुष्ठाने व्यवहारे चोप
युज्यते नन्वसाधारणं लक्षणस्योचितं तत्रोलक्ष्यविषयप्रवृत्तिघटितमेव लक्षणं वाच्यं न तु वि
षयांतराप्रवृत्तिघटितमपीति न शास्त्रांतरीयविधिसार्वकाम्याविधिज्ञापितत्वनिमित्तायास्याः
परिहारसिद्धिः किं च स्वाप्रवृत्तौ विप्रापकरहलक्षणेऽस्मामगम्यानित्यघाभिधानीमादनेष्ट

निपरिसंख्याविधावतिव्याप्तिः गर्द्दभरशनासंबंधित्वेन मंत्रनिवृत्तेरत्यंताप्राप्ताया अप्रापकत्वात्
अथ भावरूपं यदप्राप्तं तत्प्राप्तिफलकत्वं विवक्षितं नत्रासन्निदीक्षितो न जुहोतीत्याद्यपूर्व
विध्यात्मकनिषेधेष्वव्याप्तिः तादृशभावव्यापकत्वाभावात् अथ च निषेधप्रतिस्पर्द्धिविधि
त्वमेव प्रकृते लक्षणावच्छेदकं अनुवादप्रतिस्पर्द्धिविधित्वेन कर्त्रधिकरणादेर्दोषव्यवच्छेदनेपि
निषेधे तदभावादलक्षणत्वं न चापूर्वविधित्वप्रतिपादनाय प्राप्त्यप्राप्तिर्विवेचनं नत्राबाभाव
विषयत्वमुत्पादनादर्शनात् अनुवादविधिप्रतिस्पर्द्धिविधित्वमेव प्रकृते लक्षणावच्छेद
कमित्यपि शंकास्पदं विषयेषु भावत्वाभावयोः स्वाभाविकयोर्विवेचनानर्हत्वात् शास्त्रोत्तर
धीननिर्णययोरप्राप्तिप्राप्त्योस्तदर्हत्वात् न च निषेधप्रतिस्पर्द्धिविधित्वं भावगोचरमपि

163

शास्त्रं भावं गोचरयति येन तदशास्त्रिर्नापेक्ष्येत ॥ अप्रवृत्तप्रवर्तनात्मन स्तस्याशास्त्रविषयत्वनियमा
त् एवं दर्शितं च परिसंख्यास्वत्र न्यायस्तु धारणां निषेधानां परिसंख्यात्वोक्त्या ऽपूर्वविधिवद्भिमतत्वं
एवं चनोक्तनिषेधे व्याप्तिरिति चेन्न तथा सति निषेधस्यानेकत्र शास्त्रस्य फलविद्विषयेषु नः कथ
ने विषयान्तरे निषेधनिवृत्त्यर्थं नित्यशास्त्रभावप्राप्तिफलके परिसंख्याविधावनित्याप्तेः नयथा
न नीलीवसनं धार्यं नृपालैरनुत्सवे ऽन्यत्र धार्यमित्यनेन नीलीधारणनिषेधसामान्यतः प्रा
प्ते ऽनुत्सवे पुनस्तत्कीनमुत्सवे निषेधपरिसंख्यया नीलीधारणशास्त्रार्थं यत्तु यद्नृपालैर्नधा
र्यमित्यनूद्य तदनुत्सव इति पर्युदासेन कालरूपगुणविधिरेष इति तन्न नृपालग्रहणस्यावि
वक्षापत्तेः ॥ अनुत्सवपदे च कालक्षणापत्तेः उत्सवमित्तप्रयोजनमुद्दिश्य न धार्यमिति

विनैवलक्षणायोपपत्तिः विवादेन्तुनंवद्देदित्यादौसन्नप्योद्देश्यत्वाभिधानस्यापिदृष्टत्वात् नचैव
मपिदृष्टवचनव्यक्त्यंगीकारेणधारणनिषेधे तत्संबसंबंधानिवृत्तिपरमेतद्वचनंन तत्संवेनिषेधनि
वृत्तिपरत्वेनभावप्राप्तिफलकत्स्यादितिशंक्यं यतोनत्र न्यायाद्दृश्यसमभिव्याहारेयमुद्दिश्ययद्वि
धेयंनत्वतिनादृशसमभिव्याहारेतमुद्दिश्यतन्निषेधमितिव्युत्पत्तिमर्यादा तथाचनानुयाजेषुये
न्यत्रानुयाजोद्देशेनागुरोनिषेधाच्छास्त्रप्राप्तनिषेधनिमित्तः पर्युदासश्चाश्रीयते आश्रीयतेच
दीक्षितोनददाति होन्य यज्ञियावैमाषाइत्यत्राशास्त्रप्राप्तस्यदीक्षितस्यकर्तुमाषद्रव्यस्यचनि
षेधात् प्रकृतेचयद्यनुत्सवपदंकालपरंस्यादिवाप्रयोजनपरंतथापितदर्थमुद्दिश्यधा
रणप्रतिषेधोबोध्यः ॥ प्रसक्तिंनञिनमुद्दिश्यैवधारणस्याप्रतिषेधत्वात् पूर्वनिषेधेवानोत्सवेऽनु

न्तवेनित्यत्वाप्तस्यधारणवर्जनस्यानुन्तवेपुनर्ज्ञापनंकिमर्थमित्यपेक्षायांरशनामंत्रस्यगर्दभ
रशनायामिवधारणवर्जनस्योन्तवेनिवृत्त्यर्थंविकृत्युवितंविधेयपरिसंख्याख्यानिवृत्तिप्रयोगित्वस्य
श्रुतविधेयगामित्वस्वीकारेप्रतियोगित्वेनापिश्रुतविधेयस्याविधेयकोटिनिक्षेपेप्रतीतवि
धेयत्वानिर्वाहात् श्रुतोद्देश्यप्रतिस्पर्द्धिप्रतियोगित्वेतुतदनिर्वाहात् अयमेवचशेषिपरिसंख्या
संख्योदाहरणेविशेषोयच्छ्रुतशेषाविषयत्वंनाम एवंचयोऽनुत्सवस्तत्रस्वपालैर्नधार्यमनुत्सवेनु
नैर्धार्यमितिविधेयकोटिनिक्षेपाद्रूपालविवक्षापिलभ्यते नत्सिद्धिमप्राप्तभावप्राप्तिफलकेस्मि
न्विधानेपित्यागित्विरिति अपिच अत्यंतमप्राप्तेऽत्रकिंनामप्राप्तिरात्यंतिकत्वंविवक्षितं
येननियमविधिनिरासः किंस्वोद्देश्यानिवृत्तिः उतक्वचिदपिउद्देश्येव्याप्यवृत्तित्वंउतत्रैकालि

कत्वं अथा पाक्षिकत्वं नाद्यः सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति प्रत्याख्यातेः स्वर्गाद्यप्रदेशेपेकदेशे वा
फलांतरादेव विधेयत्वप्राप्तेः पक्षुदाशिकिसर्वेह विषयनयायतीयमाने वस्तुनत पांशुयाजहविर्मा
त्रे वारितार्थं भजन्ते धात्वंडुलान्विभजेदिति प्रत्याप्याव्रतिरिति यश्चात्मदाक्षेपः सिद्धांतमर्यादायोगेन
पंचशराववाक्यवन्मध्यमादिवाक्येषु वाक्यभेदभयेन कर्मान्तरविधेरुचितत्वात्त्रेधा तंडुलानिति भू
यं मध्यमादिस्विरूपेणोविभागानुवादीनि तदुभयमप्युत्पत्तिनिरूपणावसरे प्युदयेष्टिवाक्यार्थन
त्वं निरूपयाद्भिरस्माभिर्निरस्तमिति नेह प्रतन्यते नद्वितीयः यथाप्रकृतावित्तिष्ठो दशशत जनिता
नत्वं सहंभवविशिष्टविश्वजिद्याकोप्रदेयनयाज्ञाप्रस्पसर्वस्वस्याविश्वजिति नियमार्थे सर्वस्विंदह
नीतिवद्वनेज्ञत्वाप्तेः यद्यपि सार्वकाम्यविधौ स्वर्गान्यफलेषु दर्शपूर्णमासयोरिव व्रीहिनवे

हंतीत्यत्र केषांचिद्व्रीहिषु अवघातस्य प्राप्तवत्त्विनी अप्राप्तिरवधारयितुं शक्यते तथापि द्वादशशतेन
संभवदानतिके विश्वजिति शक्यते एवं सर्वस्वदानाभावधारयितुं एवमन्यत्रव्यवस्थितविकल्पश्चा
प्तस्य नियमविधावतिव्याप्तिरूह्या यत्तु पृष्ठ्यः षडहो बृहद्रथंतरसामा कार्य इति गवामयनिके
पृष्ठ्यषडहे द्वादशाहिके पृष्ठ्यषडहादिदंति देशेनप्राप्तानां रथंतरबृहद्वैरूपवैराजशाक्वररै
वतारव्यानां षट्स्तोत्रसाधनसाम्नां मध्ये पृथुकृत्वं पृष्ठः स्तु चैरूपादीनां बाधार्थं षडहमुद्दिश्य
रथंतरबृहतोर्विधानपरो विधावव्याप्तिराधाक्ष्योरतिदेशेनैव रथंतरबृहतोः प्राप्तेरुद्देश्यषड
हव्यापकाप्राप्तेरभावादिति तदयुक्तं यद्यपि चोदकाद्व्याधात्यास्मिन्विधावाधेहनि बृहद्रथं
तरे द्वितीये बृहदिन्येवं तत्पंतरबृहतौ विधायेते नत्वेकैकस्मिन्नहनि समुच्चितेरथंतरबृहतौ

नाप्याधे वृहद्धिनीयेरथंतरमित्येवं विधीयेनेन तथापि नास्य विधेरपूर्वविधित्वं हिरण्यगर्भः स
मवर्त्तताग्रइति त्र्याघारमाघारयतीति वत्प्राकृतमंत्रकार्ये मंत्रांतरं विदधतो नियमविधित्व
मेवं वक्तुमुचितत्वात् यच्चोक्तं वाक्रीयत इति कर्मान्वयायोग्यस्याद्धेष्टस्य विधेयस्योद्देश्य
ऋग्वेदविहितेकर्मणिप्रापकाप्राप्तेः सत्वादतिव्याप्तिरिति तदप्यसाधुयेन संबंधेन यत्र यो हि
धेयं तेन संबंधेन तदप्राप्तताघातेरवश्यविवक्षितणीयत्वात् अन्यथा नियमविधिमात्रे केनापि सं
बंधेन विधेयस्याप्राप्तत्वाप्तिसंभवेनातिप्रसंगापत्तेः उद्धेष्टस्य कर्मांगत्वं मंत्रोच्चारणनिव
र्तकतासंबंधेन कर्मणि विधेयत्वम्पवतेन संबंधे नो द्धेष्टं न प्राप्तं येनातिप्रसंगापत्तिः एते
नसाम्नाम्नावीतेनाधावतिप्रसंगो निरस्तः नतैर्थः एतेन अप्रयाजेष्विषा सविष्टमाज्यस्या

दानव्याप्तेः । अत्रलाघवबोतिदेशेनप्राजापत्यपशुस्थलयागेप्राप्तस्यश्रपणस्यद्वारलोपात्स्वसंक्र
बाधस्यप्रतिप्रसवार्थंद्वितीयमपिकेवलपूषदेवत्यचरुयागेप्रयोजनाभावेनप्रसक्तनिवृत्तिक
स्यातिदेशेप्राप्तस्यपेषणस्यप्रतिप्रसवार्थं न त्वप्रतिप्रसवस्यापूर्वविधित्वादन्यागतिरितिन
योःप्राक्कालेप्राप्तिसत्वात्त्रैकालिकप्राप्त्यभावेनाव्याप्तिः । अथस्वाप्रवृत्तौस्वविषयविषयाबा
धितप्राप्त्यभावस्यत्रैकालिकत्वंविवक्ष्यते प्रकृतेचप्राकस्त्या । अपितस्याबाधितत्वान्नाव्या
प्तिः पत्नवसमर्थे आज्यभागविध्यभावेचोदकेननियमविध्यभावे आक्षेपेणावघातस्यचप्रा
जानांसंभवविध्यसमाप्तिकानांविधायकेऽपवादविधिः प्रयाजान्यजतीतिविधावतिव्याप्तिरिति तदपि
वंसतिपरास्तं विध्यंतराप्रवृत्तिसहितप्रकृतविध्यप्रवृत्तिघटितविवक्षायामेवाव्याप्तिर्वक्तुमोचितात्

नन्वेवमपि यदि सोमं न विंदेत्पूतीकानभिषुणुयादिति सोमप्रतिनिधित्वात्पूतीकनियमवि

धिपरे विधावनिष्प्राप्तिः एतद्विध्यभावे हि सोमप्रतिनिधित्वेन पूतीकप्राप्तिः कालत्रयेपि न

संभवति सोमस्तु सदृशानां द्रव्यांतराणां सत्वान्न च पूतीकानां प्रतिनिधित्वे तेषामनंगत्वम्

मुपेत्य सोमावयवानामेवांगत्वस्याभ्युपेयत्वान्नैव विधिः सन्निधानाद्विधौ विधीयमानस्यां

गत्वावश्यंभावात्प्रतिनिधित्वमिति शंक्यं सोमाभावे विकल्पात्सोमावयवान्यदुपाददीत

तत्पूतीकगतानिति नियमांगीकरणान्न यद्यपि तेन्यत्रापि सन्ति तथापि नियमबलात्पूतीक

गतविजातीयावयवानां सोमावदर्शनायां हविःसंस्कारकत्वं पयः प्रपणवत्कल्प्यते अतएव

च पूतीकाभावे सोमपूतीकाभ्यामसदृशमुपादेयं न तल्लाभे तु सोमसदृशमिति सिद्धांत

नमाकरशनिवेन नतुसदृशानामभावे पूतीकानाम बाधितमविरोधासेः संभवात् एतेनाग्ना
त्रेरपाक्षिकत्वमात्यंतिकत्वमितिवतुर्थपक्षेपि पूतीकोदाहरणेनिव्याप्तिर्निरस्ता नह्यत्र व्यवस्थि
तप्राप्तिसमानाश्रयत्वं पाक्षिकत्वं येन पूतीकाप्राप्तेस्तदभावात्मकमात्यंतिकत्वं स्यात् किंतु स्व
भिन्नकालीनप्राप्तिसमानाश्रयत्वं सन्निहितत्वपाक्षिकत्वेन व्यवह्रियमाणायां नियमपावधा
तसर्वस्वदानाद्यप्राप्तेनास्तित्वतद्व्यवहारः अन्याधानाग्नावाममयनिकषडहे रथंतरबृहतोरप्रा
प्तो सत्यविभिन्नार्थवर्तिन्योः प्राप्त्याप्राप्त्योः भिन्नकालीनत्वे समानाश्रयत्वाभावात् तथा
पदृशसंज्ञके क्रतावश्वप्रः शणादक्षिणे निदक्षिणात्वेन विहितावश्वस्य काम्येन ब्रह्मसवं
धाविधिपरेण सब्रह्मणेदेयइति विधिना पजीव्यात् कश्चिदश्वांशे ब्रह्मणोऽप्राप्तिः तेसामपि

पाक्षिकत्वव्यवहारश्चान्यायांनास्तु क्वचिदपि पाक्षिकत्वं सत्यप्युभयात्मकसमानाश्रयप्रागभा
सोऽभिन्नकालीनत्वव्यवहारात् ननु च सोमाभावविशिष्टज्योतिष्टोमे स्तु सहस्रलाभदशायां
पूतीकाप्राप्तेस्तदलाभदशायां तु प्राप्तेः संभवति पूतीकानां पाक्षिकत्वमिति न तद्विधावतिव्याप्ति
रिति भवत्वेवं तथापि वायव्ये पशावतिदेशप्राप्त ऐन्द्राघारे दाशमिकन्यायेन मंत्रविधिपरे हि
रण्यगर्भःसमवर्तताग्र इत्याघारमाघारयतीति विधावतिव्याप्तिः हैरण्यगर्भमंत्रस्योद्धकर्मत्वा
त्रैकालिकपाक्षिकत्वाप्रसक्तात् तथेषेत्वेति शाखां छिनत्ति परिधौ पशुं नियुञ्जीत इत्येकैरेवा
जिनमासादयतीत्येतेषु व्याप्तिः इषेत्वेति मंत्रस्य छेदनविनियोगोऽत्र छिनत्तीति पदाध्याहा
रकल्पनेन छेदने सामर्थ्यस्याप्यापाद्यनत्वात् ततः शाखाप्राप्तसंभवात् परिधौ नियोजनार्हस्योऽन्य

कल्पनेन नियोजनसामर्थ्यस्योत्कर्षे इत्थं प्रत्वकल्पनेनासाधनसामर्थ्यस्य तत्राद्विनियोगो तर
मेव कल्पत्वेन तत्रहि नियोगं विनाशादृष्टिकायाअपि प्राप्तेः संभावयितुमशक्यत्वात् नचैतेलक्ष
एवेतिशंक्यं नियमविधित्वमंतरेण नियमादृष्टकल्पकत्वानुपपत्तेः वस्तुतस्तु ऋहेतोरवद्य ह
द्व्यर्थंतरसामान्यदृष्टाः षड्हः सव्रह्मणेदेयइत्यनयोर्नियमविधित्वात्तद्धादृष्टपाक्षिकत्वलक्षणे
विशेषणदानमपाक्षिकत्वरूपोऽपूर्वविधिलक्षणेऽतिव्याप्तिकरमितिप्रायेणायसंबंधितावच्छे
दकरूपावच्छेदेन व्याप्तिसामानाधिकरण्यमप्राप्तेः पाक्षिकत्वं वाच्यं अप्राप्तिर्हि नादृश्य
दुहत्वावच्छेदेन नादृश्यत्वावच्छेदेन वद्यहद्व्यर्थंतरप्राप्यप्राप्यो(व्रीहि)संबंधप्राप्य

ईह्लसंबंधप्राप्तप्रयाजोत्थसामानाधिकरण्ये तथासोमाभावविशिष्टज्योतिष्टोमत्वावच्छेदेन पू
र्णीकृतप्रयाजस्योरपि संभवति सामानाधिकरण्ये परंतु तथापाक्षिकत्वनिर्वचने निर्दिष्टानां
वनस्पृष्णांमाघारविध्यादिविषयाणामनतिव्याप्तीनां न परिहारः सार्वकाम्यविधौ श्रतो ऽन्यथे भवती
त्यत्र वाव्याप्तिदोषावधिकौ नादृशसर्वकामत्वावच्छेदेन दर्शपूर्णमासयोर्गुणत्वावच्छेदेनास्य
संस्थाश्चप्रयाजप्राप्तिसत्वात् तस्मादानंतिकत्वस्यापि निर्वचनासंभवान्नापूर्वविधिलक्षणं संभ
वतीत्यत आह यस्येति यस्य प्रायणीयत्वाभिमतस्य यदर्थत्वं यत्संबंधित्वं तदर्थत्वेन तत्सं
बंधित्वेनानेन धेरुत न सामान्यविध्यसंपादनेन विकृतिषु काम्येषु गुणावाप्तिफलके विधौ
तादर्थ्यप्रापके पिनाव्याप्तिः प्राप्तमित्यत्र प्रशब्देन वास्तिकस्थानवंतपदार्थः प्रकृतगविधिक

169

लीभूतावाप्तिविषयत्वाभाववन्निर्णायकत्वरूपः प्रमाणांतरकरणकाप्तिगतो विधीयते प्रकर्षः
सर्वत्रानिषिध्यते एतेन तात्पर्यंतपदस्यापि वार्त्तिके प्रशस्तार्थप्रकटीकरणार्थत्वान्नावाप्तस्य
यित्वमिति सूचितं विधिपदेन प्रापकत्वं विवक्ष्यते न तच्च यस्य पर्यंतसंबंधित्वं प्रकृतविधिफलीभू
तावाप्तिविषयत्वाभाववन्निर्णायकप्रमाणांतरकरणकफलाविषयीकृतं न प्राप्नोति तस्य तत्सं
बंधित्वप्रापकइति वाक्यार्थः सोपूर्वविधिरित्यनेन लक्षणांतःपातिनोपि विधिपदस्यार्थस्या
लभ्यमसमर्पकत्वं वार्त्तिके सूचितं पाक्षिकरूपितसंबंधवत्तयाप्यप्राप्तोक्तफलत्वाभाववन्निर्णाय
कमानांतरफलत्वासंभवः न संबंधितया नस्याप्तिफलकत्वत्वं तस्यानस्यापूर्वविधिरिति
निष्कर्षः ॥ अत्र प्रकृतात्प्रकृतविधेयोद्देश्यत्वाद्यप्रवेशान्नविषयसप्तमीपक्षोक्तपर्यवविधि

१५५

निर्वचनेषु पूर्वोक्तदोषाणामापत्तिः नचसमन्तिसप्तमीस्वीकुर्मः तथासतितस्याप्तिफल
कत्वाध्याध्यैर्हारगौरवात् किंतुसप्तम्याविधीयमानानांविषयतामेवम्मपागंनुबंधिनी
वदामः यथाचक्षुः फलम् तच्चमितिविषयेरूपादौचक्षुर्विषयत्वंयावज्ज्ञायते तथाविधि
फलम् तत्राप्तिविषयेविरुद्धन्यायतासंबंधावविधेयोपिविधिविषयत्वोक्तिः यद्यप्यग्निहोत्रं
जुहोतीत्यादावुत्पत्तिविधाविष्टसामान्यसंबंधप्राप्तिफलकत्वेन तल्लक्षणोपपत्तिः न
स्यामधिकारविधिफलत्वेनेतद्विधिफलत्वाभाववनिर्णयत्वात् तथापिशष्टांतसधिकेरस
हूरूनेनामुनायोयागत्वहोमत्वाद्यवांतरजातिसंबंधोज्ञाप्यनेतत्संबंधप्राप्तिफलकत्वे
नलक्षणमुपपादनीयं यद्यपितादृशजातिसंबंधप्राप्तावपिशरवांतरीयाविधिफले

भा॰ दी॰
१७०
170

त्वं संभवति तथापि न तत्स्वफलत्वाभावनिर्णायकं स्वफले तत्पत्रफलपदस्योद्देश्यसाधकपरत्वात् पर
फलत्वाद्वा स्वफलत्वाभावस्य फलंद्रूपपरफलत्वाभावस्य तत्र च विनिगमकाभावेन घटेऽध्ययनीना
दे तु अपरत्राश्रोमानां परफलत्वेऽप्यविनिगमकत्वोपजीव्यत्वात् पूर्वं स्वरूपतस्त्वावत्वं नोक्तविधेन वि
निगमनाविरहेणानद निर्णायकं कर्तुं युक्तं तथापि बाधितत्वयाज्ञस्य उपयोगिन्मांश्राश्रोमानां
नरफलत्वमनुपपद्यमानं स्वफलत्वमपेक्षते न त्वकथं तन्नाधं कुर्यादिति युक्तं एवं विशिष्टाभा
व एतेन सार्वकाम्यविधिप्राप्तस्वर्गफलकत्वज्ञापके विधावप्यापत्तिर्निरस्ता अध्ययनविधिर्हि
सर्ववेदवाक्यानां फलस्य वेस्थापकः स च विधित्वम्पां लाक्षणिकीमपि प्राशस्त्यविधियमर्थवा
दफलत्वेन स्वीकुर्वंस्तस्या विधिफलत्वं निराचष्टे किमुत वक्तव्यं शङ्क्याक्रीयमाणो स्वर्गफलक

१७०

त्वश्राद्धिमनन्यफलस्वर्गकामविधिफलत्वेनांगीकृत्य सार्वकाम्याविधिफलत्वं नस्यानिरावष्ट
इति तुल्यमुंवविधेः श्रवणेनावोधेनेव सार्वकाम्यविधेः स्वर्गेतरफलसंबंधबोधेन चरितार्थत्वं
तेन पूर्वत्र निर्णायकत्वात् विशेषणाभावो विशिष्टाभावः इह नुमानां नरफलत्वनालोवनेरूप
विशेष्याभावात् अध्ययनविध्युक्तानेति ह्यापि विशेषणाभावश्च युक्तो विशिष्टाभावः यागे
स्वर्गसाधनत्वप्राप्तेः सार्वकाम्यविधिफलत्वात्स्वर्गकामविधिफलत्वाभावः एतत्फलत्वाध
नफलत्वाभावस्तत्र विनिगमनाविरहस्यापि तुल्यत्वात् नचावघातविधिनाहननिरिव
स्वर्गकामविधिनास्वर्गफलकत्वं नियम्यतेयेननतप्राप्तेः सार्वकाम्यविधिफलत्वं नाध्ययनवि
धिर्वाधेन नस्वीकुर्याच्च स्वर्गकामविधिफलत्वं नियमविधानेनैव फलवत्वोपपत्तेः प्राकृतत

पर्त्तुरक्तोपकारान्न दृष्टादृष्टरूपान्विकृतौ प्राप्यते नो निदेशस्य विषयभेदेनापूर्वविधित्वान्नियमविधि
त्वव्यवस्थापनाय चक्षुले सर्वंधनिरूपकाभिधायिपत्तेच्छष्टप्रवेशः ननु यद्योन्यां गायति तदुत्तरयो…
र्गायति निस्पृष्टीरूपदधातोरन्यादेर्विषयभेदेन तदुभयरूपत्वव्यवस्थापनाय सः रथंतरादेर्योनि
विषमच्छंदस्कयोस्तत्र योर्वचनिके दृष्टकानां मध्यमाचितिसंबंधस्य वात्यंताप्राप्तत्वेपि दृष्टार्थत्वान्नि
यमादृष्टाक्षेपकत्वात्पूर्ववत्स्मिन्नशेऽपि विधेर्नियमविधित्वमिवयतोप्युक्तं वक्ष्ये ईदृशरीत्यास्वीकार्य
नियमविधित्वे तु हिरण्यगर्भः समवर्त्तताग्र इत्याघाघारमाघारयतीत्यादिषु निवारणाय तन्त्संबंधि
नये तस्यानन्त्रि विनिरूपकमात्रदृष्टपूर्वसाधनत्वाक्षेपकसंबंधवत्त्रये तस्यार्थो बोध्यः निरूपकदृष्ट
त्यपूर्वसाधनत्वाक्षेपकत्वे सति तदितरदृष्टपूर्वसाधनत्वाक्षेपकत्वं च संबंधो निरूपकमात्रदृष्टपूर्वसाधनत्वाक्षेपक

नैतेन नोरूप्यत्वेऽतिप्रसंगः फलीभूतश्रान्तिविषयीभूतानां तत्तन्मंत्रादिसंबंधानां स्वनिरूपकेतरनि
यमविषयत्वपूर्वसाधनत्वाक्षेपकत्वात् यथा च नियमविधौ नियमादृष्टस्य नियम्यमानाजन्यत्वं नियम
जन्यत्वं च न तथोपपादितमधस्तात् नापि मंत्रेणेदमरशनामित्यश्विसंबंधस्यापि परिसंख्याविधा
वतिप्रसंगः तस्य निरूपकेतरत्वापूर्वसाधनत्वानाक्षेपकत्वात् संबंधस्यापेक्षकत्वं हि आक्षेपानु
मितिजनकविधिकल्पं परिसंख्याविधिश्च यथैतो रूसंबंधनिरूपकेतरवर्त्तिनीमपूर्वसाधनता
नानुमापयति न तथैव तन्निरूपकवर्त्तिनीमपि तामुपपादितमनेवैतदुदाहरणाक्षेपावसरे य
दित्वनेत्युधिवावयंतीत्यादौ आपापनिवृत्तेः स्तोत्राणां तराम्पूर्वसाधनत्वमाक्षिप्यतेन दीतत्रा वा
पस्यापि माध्यंदिनार्भवपवमानस्तोत्राम्पूर्वसाधनक्षेपाद्भवति परिहारः न चैवं दीक्षितेनोनु जु

भाद्दी०
१७२
172

होतीत्याद्यवप्रसंगः दीक्षितकर्तृकहोमक्रियाभावसंबंधप्रकरणाज्ज्योतिष्टोमे आपयतानेनु
विधिनासंबंधनिरूपकाभावहृत्यपूर्वसाधनतायाएवानुमानात् नवमाध्यस्तुधोक्तरीत्या सर्वे
निषेधाः परिसंख्याविधय एवेति युक्तं अपूर्वविध्यादिविवेकोपायस्याप्यंतिकत्वमाक्षिकत्व
रूपप्राप्तिवैचित्र्यस्य नद्विवेकोपायकत्वस्य गौरवलाघवविवेकस्य च निषेधेष्वपि तुल्यत्वेन त
द्विवेकस्याव्योचित्यायानत्वात् नचैवंअत्वर्थनान्नृतं वदेतीत्यादिनिषेधपक्षेऽपस्य प्राप्तस्यानृ
तवर्जनस्य नियमं कुर्वन्त्यन्निति वाच्यं: नियमादृष्टस्य नत्वाकल्प्यत्वात् स्यापिष्यन्नृतवर्जनए
वक्रतापूर्वसाधनतायाः कल्प्यत्वादिति वाच्यं क्रतुनिरूपितसंबंधे वत्तयाऽनृतवर्जनश्रा
द्धोस्वफलत्वाभावनिर्णायकाप्रमाणांतरफलवतायाः सत्वात् संभवतिहि क्रत्वर्थप्रकारकत

१७२

याऽनृतस्यैवानृतवर्जनस्यापि कदाचित्प्राप्तिः एतेनातिदेशप्राप्तवैकल्पिकादृष्टार्थांगस्यनि
यमार्थेविधावपिप्राप्तिः नत्वहिनियमस्यादृष्टजनकत्वं कल्प्यते किंतु यथाप्रकृतावनभ्यु
स्तप्रयाजजन्यनयाऽकृत्तो योऽदृष्टोपकारः स एवाभ्यस्तप्रयाजैर्जायत इति वचनात्स्वीक्रि
यते तथाप्रकृताडुपायांतरेणजातमपूदृष्टं विकृतावेकेनैवोपायेनजायत इति स्वीक्रियते
तद्यथोक्तरेहन्द्विरात्रस्यगत्र्यन इति यथा वा मिश्रमते विकृतौ रथन्तरं पृष्ठं भवतीत्यपि परास्मि
न्नत्रापिनादृष्टप्राप्तौ नादृष्टस्यातिदेशप्राप्तानां नरफलस्यापि सफलत्वात् यथैकस्यावघा
तविधाभावेपिवाऽसिकावघातप्राप्तिमाक्षेपतः संभावितामालोच्यवदन्ति न्यायविदः
नास्यविधेरवघातप्राप्तिः फलमपि तु नियम इति शक्यत एवं तथातिदेशतः षोडशपादि

भा॰टी॰

१७३

173

प्राप्तमालोक्यस्तु न रागंवक्तुंनास्यविधेः षोडश्यादिप्राप्तिः फलमिति नचभूपालैरनुत्सवइत्यादौ निषि
षेधस्तु खपरिसंख्यालक्षणप्रसंगः भूपालैरुत्सवेधार्यमित्यस्यानुज्ञारूपेण विधिना विधेयसंबंध
निरूपकेऽपूर्वसाधनताया अनाक्षेपात् नापि निषेधापवादत्वसाम्येपि पूर्वापविष्टभागापू
नेऽश्रयपयत्नोत्पादावप्रसंगः तयोर्निरूपककृत्यपूर्वसाधनताक्षेपकत्वात् विवाहेऽनृतं वदेदि
त्यस्यानुज्ञाविधौ परप्रसंगो त्रिपुरुकश्चयस्तः तस्यालक्ष्यत्वात् अस्मत्पितृदस्मिन्विधौ निषेधा
तिक्रमभयप्रयुक्तस्यप्राप्तेसेवानृतवदनं विवाहार्थमिनद्भवनस्त्रत्वासमर्थपरमेव विधिः
अतोऽत्यंताप्राप्तविषयत्वाभावे कथमपूर्वविधित्वंस्यात् यदि त्वदृष्टार्थपदार्थकर्तव्य
ताज्ञापको निषेधस्तु खण्डहत्नपरिसंख्याविधिः कश्चित्संभाव्यते यथेंनाऽश्यासंनिधने नेत्
ग

१७३

न्वयाज्ञानपक्षे भवतीत्यत्र दाशरथिकाधिकरणपूर्वपक्षी मन्यते न दानत्वानिवाप्तिवारणा
य निरूपकवृत्तीत्यस्य स्थाने निरूपकतावच्छेदकावच्छिन्नत्वं साधनताविशेषणं बोध्यं यद्य
पि पूर्वपक्षानुसारेण नद्यानूयाज्ञानपक्षे न भवतीति विधिरात्मिथ्यायां पत्नीसंयाजनिषेध
निरूप्तिसंबंधबोधस्तन्निरूपनिरूप्यात्मकपत्नीसंयाजे घातिथ्यापूर्वसाधनत्वमाक्षि
पति तथापि न नत्वाद्दशानिरूपितत्वावच्छिन्नं किंतु पत्नीसंयाजत्वावच्छिन्नमेवेत्युक्तं निरूप
कतावच्छेदकत्वं च निरूपके विशेषणीयं न त्वात्मिवेलायां भासमानत्वं न तु येद्धर्मवि
विशिष्टनिरूपकत्वं नान्वेतित्वं नेन शङ्कान्तरादिमानज्ञानपवच्छिन्नो विज्ञानीयपूर्वसा
।धनतां यागादिवर्त्तिनीमाक्षिपत्युत्पत्तिविधोनाव्याप्तिः यद्यपि हि प्रायणीयसंबंधेना

तादृग्ज्ञानियागयोर्निरूपकत्वात् नैवजातिविशिष्टस्यनिरूपकत्वेनान्वयः तथापिनिरू
पकयागेतादृशज्ञानेविशिष्टत्वेनयामानात्संभवत्येवतस्यानिरूपकतावच्छेदकत्वं कतौ
भार्यामुपेयात्स्नात्वान्नानिभुंजीतसाधून्प्रयुंजीतेतिशास्त्रेषुवक्रनुगमनयोःप्राप्तुवत्व
भोजनयोःसाधुत्वप्रयोगयोः संबंधश्चाप्तिरेवफलत्वेनयद्यप्याश्रीयतेतेनदानियमविधय
एवैतेनवचनेष्वनित्यावाप्तिः शंक्या यद्यपिभार्यागमनत्वप्राप्तुवत्वसाधुशब्दात्मकनिरूप
कत्वात्रयत्वपूर्वसाधनत्वाक्षेपकत्वमेतत्स्नायत्नीयसंबंधेष्वस्ति एकशब्दःसम्प्रतानः
सत्प्रयुक्तः स्वर्गेलोकेकामधुग्भवतीत्यादिशास्त्रांतरेषुशब्दादिनाभिन्नाएवापूर्वसाध
नतायाज्ञापनात् तथापितत्रत्संबंधश्चाप्तिर्भुस्वफलत्वाभावनिर्णायकमानांतरफल

वसत्वात् यदि तु स्व तु स्नातां तु यो भार्यां संनिधौ नोपगच्छति घोरायां भ्रूणहत्यायां पच्यते
नात्र संशयः ऋग्आयुष्यं ब्रा गुरुस्तोमुद्दे एकः शब्दः समभिज्ञानतः स्यादिशब्दान्तरैकवाक्यतया स्व
तु गमनादेः भ्रूणहत्यानिष्टनिष्टत्वादिहेतुत्वप्राप्तेः भोजनाभिनन्दाश्रुत्वतायां आयु
हेतुत्वप्राप्तेश्च योगाभिनन्दसाधकशब्देन स्वर्गहेतुत्वप्राप्तेः शक्तेन विधिफलत्वमाश्रीय
नेन तदा पूर्वविधय एवैते न वाक्यापत्तिः तत्र मध्यन्तु तात्मकसंबंधानां मानान्तरादप्राप्तता
न्निरूपकमात्रं दृष्टपूर्वसाधनताक्षेपकत्वात् तस्माद्यन्निरूपितसंबंधवत्तया यस्या
श्चोत्स्वफलत्वाभावनिर्णायकमानान्तरफलत्वाभावः तन्निरूपितनिरूपकतावच्छेद
कावच्छिन्नापूर्वसाधनत्वाक्षेपकनिरूपकतरदृष्टपूर्वसाधनतानाक्षेपकसंबंधव

तयानन्याप्राप्तिफलकस्तेन रूपेणानस्यापूर्वविधिरिति लक्षणं सिद्धं येतु नियमादृष्टंजनि
यमाप्यमानक्रियाजन्यमेवापूर्वं तु द्देश्यपरतां भजतीत्याहुः तन्मते निरूपके तरवृत्तीत्यस्य
स्थाने निरूपकानुद्देश्येत्यक्षरान्वयिद्रष्टव्यं येतु नियविधौ नियमान रूपोद्देश्यगतसाध
नतावच्छेदकत्वं कल्पयंतो नात्रसेवनियमादृष्टमित्याहुः तन्मते निरूपकतावच्छेदका
वच्छिन्नेतरनंतरं निरूपकवृत्तीति साधनतान्वयिबोध्यं तवाप्यंनिरूपकेनरेत्यादिस
वंधस्यविशेषणांनरं केचित्तु परिधोपष्टुंनिष्टुं जीनेत्यादावन्यंताप्राप्तिविषयेदृष्टार्थ
विधौ नियमविधिलक्षणाव्याप्तिमपूर्वविधिलक्षणातिव्याप्तिंच परिहर्तुंदृष्टार्थः सर्वोपि
नियमविधिरितिवदंतोऽपूर्वविधिमदृष्टार्थंमन्यंते तेकथमुत्तरेहृत्स्विरात्रस्यग्रहपाठ

दाभुक्तलक्षणाया व्याख्यानीयानीपरिहरेयुः अपूर्वविधिरेवायमिति चेन्न पाक्षिकत्वाप्रा
मानप्ययमपूर्वविधिः अप्राप्तिकाप्राप्तिमानमपि परिधावित्यादेर्नियमविधिरिति फलत्वना
ग्रानिर्वीजत्वात् नियमाददृष्टसदङ्गावादेववीजमिति चेन्न अपूर्वविधिनियमविधि
विवेकमूलनगौरवलाघवोपयोगिनः अप्राप्तिवैचित्र्यस्यैव तन्निविवेकवीजत्वेन स्वीकर्तु
मुचितत्वात् नियमाददृष्टसदसद्भावयोश्च गौरवलाघवाप्रयोजकत्वात् किंच निगदा
धिकरणे निगदेष्वत्यन्ताप्राप्तोपांशुत्वविधाने पूर्वविधित्वं तद्भिन्नमन्त्रेषु चोपांशुत्व
विधाने नियमविधित्वमुपांशुपजुपेत्यस्य स्यादिति प्राचामुक्तिर्न भवन्मते संगच्छ
ते उभयत्रापि विधेयोपांशुत्वगतदृष्टार्थस्य तुल्यत्वात् नियमादृष्टकल्पनायाश्च

१७६

176

नाश्वतुल्यत्वात् ॥ एतेनांतिमशास्त्रे वाग्मिके सतीति मदुक्तादो हि पश्चनरवृहत्पव्रत्वेतु
सुविना किंचदृष्टार्थो विधिर्नियमविधिरित्य त्र विधिविषयदृष्टाद दृष्टार्थत्वेन विधेदृष्टा
र्थकत्वं विवक्षितं विधिफलमन्तशास्त्रविषयदृष्टार्थत्वेन वा आद्ये मंत्रपरिसंख्या
विधावतिव्याप्तिः विधिविषयमंत्रस्य दृष्टार्थत्वात् द्वितीये ऽसंभवः परिसंख्यावि
धाविनविरत्नेरिव नियमविधौ नियमस्यैव फलमन्तशास्त्रविषयत्वात् नस्यच
दृष्टार्थत्वासंभवात् नमृदपाल्ले रनुत्सवइत्यादौ निषेधमुखप्रवृत्तपरिसंख्याविधावति
प्रसंगश्च फलमन्तशास्त्रविषयस्य निषेधनिवृत्त्यात्मनो नालीधारणस्य दृष्टार्थत्वात् वक्तु
नस्क्तपदष्टादोक्तिरनुस्तन्यपरिधाविन्यादेरपूर्वविधित्वप्रसक्तेरहन्नित्यादेर्नियमविधित्व

मितिस्वीकर्तृत्वमुचितं तथासति चास्मदुक्तलक्षणेऽनिरूपकतावच्छेदकावच्छिन्नापूर्वसाधनताक्षे
पमात्रस्य संबंधविशेषणतया प्रवेशाङ्गीकारः तावतैव वारणीयपरिसंख्यावारणोपपत्तेः अवघा
तादिविधिनियमवारणस्य चोद्देश्यदले नैवोपपत्तेः नचैवमत्यन्ताप्राप्तिविषये पूतीकविधाव
पूर्वविधित्वेन सोमकार्ये सोत्र नियमव्यवहारो न स्यादिति सांप्रतं तदभावे पूतीकानां पाक्षिकप्रा
प्तेः प्रागुपपादितत्वात् नचैवमपि पत्नीसंयाजानामाज्यहविःसंनिष्ठत्वमित्यत्र नावमिको व्यवहा
रो न स्यात् अप्राप्त्यंशेनाप्राप्तविषयत्वात् तथाहि देवाश्चादिहारियोजनपर्यन्तं कर्माहः शे
षवाच्यमिति तावत्तत्रत्यादौ स्थितं तत्र च द्वादशानां नाराशंसानां संहतत्वसिद्धेर्हारियोजनेनान्तं
तरमवस्थानं प्राप्नुयात् यद्यपि भेदस्कन्नद्रप्सादिद्येकादशोऽस्कन्नायेन स्तुत्याकालो नानामच्छिके

177

पाकानामहर्गणेष्वहस्साहचर्येनिर्णयात् कृत्स्नपापाशुकैष्टिकप्रयोगसमाप्त्यनंतरमेव तत्स्थानापत्त्या ननु पत्नीसं
याजांतान्येषामनिष्टकृतेबर्हिर्वनाभावपक्षेपि आनुयुरिति नैवं आस्तां तावत्पाशुसोमयागास्साहः शब्दाद्वा
यत्वं तावन्नाहोरात्रियोजनानन्तरमेवावस्थानप्राप्तिः कथं भवहितिन ततः प्रागपि यत्र क्वचिदवस्थाने समा
त्यसिद्धिर्यागद्वादशत्वेव तनोत्तरकालीनपदार्थविस्थाने पितुनैरांततत्सिद्धिः पश्चैकादशोध्यायः सप
वनांते तत्वं साहित्यसिध्यर्थमपेक्ष्यते तावतो विहायान्यान् पदार्थान्निषीकुर्यात् ननु साहित्यबाध
यालमितिसुधीभिरूह्यं परे तु स्वाश्रवृत्तौ अपूर्वीयत्वान्यस्योद्देश्यतावच्छेदकरूपेणातिदेशाभिन्नस
समानशास्त्रीयविधितोऽसंभवत्संवोद्देश्यानुप्रवृत्तप्राप्तिकभावविषयो विधिरपूर्वविधिरिति अपू
र्वीयत्वेन रूपेण व्रीहित्वसंताऽप्राप्तमवघातं विदधत्स्ववघातविधावतिप्रसंगवारणायापूर्वीयत्वान्वे
ति नदन्यदुद्देश्यतावच्छेदकव्रीहीन् प्राप्तान् व्रीहीनवहंतीत्यत्र व्रीहित्वं तेन रूपेणानादृत्य पुरोडाशवि

१७७

घितोवघातस्यासंभवन्त्प्राप्तिकत्वात्प्रोक्षणस्यासंभवत्प्राप्तिकत्वाच्च नातिप्रसक्त्यप्रसक्ती तादृशोद्दे
श्यतावच्छेदकत्वेरूपेणेतिविवक्षणेगावामयनिकाहई [illegible] गतयोरैंद्रवायववाग्रत्व विधेयांशेशिके
स्वर्गकामविधौत्रेधातंडुलानितिदेवतापनयनविधौवनाद्याप्तिः अग्नीकाविधिनेप्रथमभागत्व
रूपेणैंद्रवायववायववाग्रतायाः प्राप्तिसंभवेपिस्वोद्देश्यतावच्छेदकारूस्वरूपेणप्राप्त्यसंभवात्
सार्वकाम्यविधितः काम्यमत्वरूपेणदर्शप्राप्तिसंभवेपि स्वर्गत्वरूपेणतदभावात् देवतांतरसं
योगविधितोमध्यमत्वादिरूपेणपूर्वदेवतापनयप्राप्तावपिसंयुक्तहविष्ट्वरूपेणतत्प्राप्तेरभावा
त् = प्रथक्रिमेणोद्देश्यतावच्छेदकत्वंव्रीहित्वादिगामिनतावदुद्देश्यतोनतिरिक्तवृत्तित्वं प्रोक्षणा
भावनानुद्देश्यलौकिकव्रीहिसमवेतस्यव्रीहित्वस्यानवच्छेदकत्वापत्तेः नापितद्न्यूनवृत्ति

त्वंप्रोक्षणभावनोद्देश्येथपियवेषसनोव्रीहित्वस्यानवच्छेदकत्वापत्तेः नवपराभिमतः स्वरूपसं
बंधविशेषः यथाहि कार्यकारणसंबंधबोधकेप्रमाणेनयद्धर्मावच्छिन्नेकार्यताप्रजन्यते तस्मिन्नेव
स्वरूपसंबंधात्मिकाकार्यतावच्छेदकतासिध्यति तथोद्देश्यविधेयसंबंधबोधकेनविधिनायद्धर्मा
वच्छिन्ने उद्देश्यताप्रतीतेस्तस्मिन्नेवधर्मेताद्दश्युद्देश्यतावच्छेदकतासिध्यंती सिध्येत् नचव्रीहित्वा
वच्छिन्नोद्देश्यताविधिनाप्रमीयतेनतदवच्छिन्नोद्देश्यताबाधेनलाक्षणिकापूर्वीयत्वावच्छिन्नोद्देश्य
ताकल्पनोत् =अथापूर्वसाधनत्वलक्षणरूपमेवोद्देश्यतावच्छेदकत्वेनविवक्षितमितिचेत् न
=अपूर्वीयत्वान्येनयस्याबैयर्थ्यापत्तेः स्वर्गकामोयजेतेत्यादौस्वर्गत्वादेरनथात्वेनाव्याप्त्यापत्तेश्च
=अथोद्देश्यविशेषणत्वेनश्रुतमेवतथात्वेनविवक्षितमितिचेत् न विश्वजितायजेतेत्यादौस्वर्ग

त्वादेर्न तथात्वे वाव्याप्त्यापत्तेरिति चेन्न उद्देश्यविशेषणतयाश्रुतत्वविधौ प्रतीयमानत्वमेव तथात्वे
न विवक्षितमिति ब्रूमः अतिदेशप्राप्तेनापि विशेषणोद्देश्येन चरुत्वाद्यविधिषु द्वादशाहिकत्वनी
कांतर्गताग्रताविधौ श्च नाव्याप्तिः तत्र तत्रातिशायिताग्रताविशेषाणामतिदेशत एव संभवत्प्रा
प्तिकत्वात् समानशास्त्रीयेति विशेषणोच्छास्त्रान्तरीयविधितः संभवत्प्राप्तिकान्यग्निहोत्रादिक
र्मणि विदधत्स्वपूर्वविधिषु नाव्याप्तिः स्वसमानशास्त्रीयत्वं यत्र स्वाम्नानं तत्सांशास्त्रायाम्नात
त्वं न विवक्षितं कुमारादिशिखादेर्वधत्वबन्धिवत्स्था असीन्याधुत्तेयेषपूर्वविधिष्वव्याप्तिः स्वस
मानशास्त्रीयत्वाप्रसिद्धेः अतिदेशान्तेन्यस्य वैयर्थ्यापत्तेश्च असमाम्नानस्य तत्साम्नानत्वे
नैव निराकरणसिद्धेः किंतु स्वघीतानिप्रयोजकं यच्छास्त्रीयमाम्नानं तच्छास्त्रीयाम्नानप्रयोज

प्रतीतिविषयत्वं स्वघटनातिरिक्तयोजकत्वं वस्तीयाम्नानवत्वेऽन्नायकमंत्राघम्नानस्यापि संभवती
तिनोक्तदोषः न च नष्टाम्नातत्वमित्येतावत्कृतत्त एवातिदेशवारणासिद्धेरतिदेशगन्यैतिविशे
षणमपि मास्त्विति शंक्यं समानशाखीयमंत्राद्युन्नेयविधिनैः संभवत्स्वाप्तिकविषयत्वेन
परिहार्यविधावतिव्याप्तेः न च दृष्टादृष्टसमूहात्मकयूपत्वावच्छेदेनाग्नखादिरतांवि
दधाति विधावतिव्याप्तिः तत्संस्कारविधिषु प्रत्येकभूतस्य यूपशकलस्य प्रत्येकसंस्का
रवाप्तित्वेन खादिरताविधौ दृष्टसंस्कारस्यैवोद्देश्यतावच्छेदकत्वात् न दवच्छेदेन च
खादिरतायाऽरक्त विधावाप्तिसंभवात् न च तावद्भूतामिति विधावव्याप्तिः प्रकृतौ

179

राम

देश्यतावच्छेदकपूर्णमासीत्वावच्छेदेनोपांशुयाजस्याप्राप्तिसंभवात् ऽअंतरावाक्येन पूर्ण
मास्यां प्राप्नुवन्नपि तूपांशुयाजो नैव पौर्णमासीत्वेन रूपेण प्राप्यते ऽअंतरालत्वेनैव तत्र कालस्यो
देश्यत्वात् यथोक्तविधिप्रक्रमवशेनांतरालवाक्यं पौर्णमासीज्ञापकं भवेत् न तु स्वतंत्रो नु नत
ज्ञापकत्वशंकावसरः वस्तुतस्त्वंतरालवाक्यं संभवति पूर्णमास्यमावास्ययोः ज्ञापकमिति ताव
न्तामिति वाक्यस्य वनेलक्ष्यपत्तं पूर्णमासीनियमार्थत्वादिति ६ आहवनीयस्य स्त्रनु
व्यावृत्तेरपूर्वोपविधेयत्वान्नाप्राप्तिः एवमापराग्निकवाक्ये ऽपि चतुरागृहीतविधायके ऽग्ना
न्वायस्तु धोदाहृताभ्यां गार्हपत्ये जुहोत्यन्वाहार्यपचने जुहोतीति वाक्याभ्यामेव प्राप्तिसंभ
वात् विराड्संपत्तिवाक्यं तु दशत्वं तथा प्रसक्ते विकल्पाद्गतीनन्यविहितसंख्यानां विक

वौ

ल्पश्च सक्तिवारणायेति स्फुटं वार्त्तिके न च सांग्रहायणीविधावव्याप्तिः तदभावेऽर्थवादमात्रा
दौ ध्रुवराधिकरणन्यायेन फलसंबंधासिद्धेः भावपदश्रवणाच्चा तेनाप्राप्तिनिवृत्त्यापके परि
संख्याविधानातिव्याप्तिः नापि निषेधमुखत्व हृत्ते भावप्राप्तिफलके परिसंख्याविधौ तादृशस्थि
रोदाहरणाभावात् यत्तु केश्चिदुदाहृतं स्मृतिकौ छिद्रमांऽस्यास्तु रामयदृतस्य च त्रिःसप्तमा
र्जनाच्छुद्धिर्न तु कांस्यस्य स्नापनमिति शंखवचनं अत्र हि कांस्यस्याद्भिः स्नापनं न कार्यं अन्यस्य
तु कार्यमिति व्याख्यातमपरार्केणेति तदसत् अत्र पर्युदासाश्रयणेन कांस्यभिन्नस्य स्ना
पनं कार्यमिति विधिस्वीकारात् अप्राप्तस्नापनस्य निषेधपरिसंख्ययोरसंभवात् न भूपा
लैरन्तु त्सवदन्यत्रापि यदू पालेन धार्यमित्य भूपनदनुवर्त्से वदति कालो विधीयते अन्यत्रापि

विशेषनिषेधाय यदि हृश्यंनेन दार्क विद्वेषाधिक्यज्ञापनं प्रयोजनं कश्चित्तु सामान्योपसंहारः आ
त्यंतिकत्वं च सर्वोद्देश्यानुवृत्तत्वं आप्तिविशेषणं न चैवमप्यनाविध्यादेष्वव्याप्तिः उक्तरीत्या ल
क्षणस्यात्रोपपत्तेः न चैवं यदि सोमं न विदेत पूतीकानभिषुणुयादित्यत्र गायत्र्यपशुगतेऽहिर
ण्यगर्भः समवर्त्तताग्र इत्याघारस्याघारयतीतिविधौ चातिव्याप्तिः सुसदृशद्रव्यांतरसंभवेन पू
तीकानामप्यत्नाप्राप्तेरिंद्रदेवत्ये च कर्मणि हिरण्यगर्भमंत्रस्याप्यत्नाप्राप्तेरिति वाच्यं यत्र य
उपकारजनकतया मद्विधित्सितं न त्वनदुपकारजनकतया तस्य यादृच्छिक्या प्राप्तिः अनुष्ठा
नयोग्यतारूपसहकृतपरपर्यायाः प्राप्तेरभावस्य विवक्षितत्वात् अधिकोवपवालिभ्याया
सुसदृशद्रव्यस्यैवोपादानं प्रापयता शास्त्रेण यादृच्छिक्याः प्रादेशप्राप्तेः पूतीकविषयायाः

ऽनिवार्यत्वात् लौकिकवाक्यवद्ध्यानादिवत् हैरण्यगर्भस्यापि मंत्रस्यैंद्राघारे गौण्यादिनादे
वतांप्रकाशयितुं समर्थस्य तादृश्याः प्राप्तेरनिवार्यत्वादित्याहुः तन्न सार्वकाम्यविधौ काम्यमा
नत्वेन फलानामुद्देश्यतायामपि स्वर्गकामविधावव्याप्तेरवश्यंभावात् तथाहि तादृशविधितो
संभवत्प्राप्तिकविषयत्वरूपोक्तलक्षणे यादृच्छिकप्राप्त्यभावस्यावश्यमेव विषयविशेष
णतया निवेशनीयः अन्नाम्नातलौकिकमानमूलायां यादृच्छिकप्राप्तावुक्तविध विधिमूल
त्वस्य सर्वथाऽसंभवात् योगसिद्धिन्यायेन स्वर्गकामविधिमनपेक्ष्यैव सार्वकाम्यविधिबलादेव तत्
तत्संगत्वेन स्वर्गमुद्दिश्य यागे पुरुषः प्रवर्त्तते तत्त्वेनोद्देश्यस्यैव तदुत्पत्तिनियामकत्वात् न तत्त्वेन
वदुक्तप्रकारान्तरादृश्यानुष्ठानयोग्यताप्राप्तिः वोध्यतां वैधीवा सर्वथापि ताव्याप्तिविमोक्षः

अकृतविधिमंतरेण प्रतीकाद्विधिवल्लक्षतेस्तु नरां भवंतीयादृच्छिकी

कथं वोक्तविधमवल्लक्षणे मिश्रमते वैरुत्नेरथं नरपृष्ठं भवतीत्याद्यो निरामविधौ भवत्व
ति व्याप्तिपरिहार इत्यादि समाहि तु वैतो भावं वलोक्यतां वस्तुतस्तु ष्टाकपालादिविधिः प्रकृ
तद्रव्यवैतुष्यं विनानुपपद्यमानो लौकिकव्रीहि परिजिहीर्षया प्रक्षेपविषयतावच्छेदकगौरव
स्यापवैशास्तिपांनरगौरवस्यापरिजिहीर्षया पुरोडाशप्रकृतिद्रव्यत्वावच्छेदेनैवावघातमा
क्षेपणप्रापयेन व्रीहीन वहंतीति विधिस्तु व्रीहित्वावच्छेदेनैव प्रापयतीति प्राप्तिस्तोदाहर
णएवातिव्याप्तेरपरिहार इत्यलं विस्तरेण क्वचित् हेरणतावच्छेदकावच्छिन्ने विधेयता
वच्छेदकावच्छिन्नस्याप्राप्तैनाप्राप्तस्य प्रापको विधिरपूर्वविधिः उद्देश्यतावच्छेदकशद्दुनसा
ध्यत्वघटकाविकारादिघटकाभावे वैतुष्यादिरूपेण वैतुष्यविशिष्टहस्त्रनिवावघातस्याप्रा

182

ष्ठाग्नेः संयोगविशिष्टं प्रतिवप्रोक्षणस्याप्याग्नेर्नातिव्याप्त्यव्याप्ती अपूर्वसाधनत्वाकारेणाग्नीहिष
वघातानामाप्तिमादाय प्राप्तमतिव्याप्तिं वारयितुं मुख्योद्देश्यतावच्छेदकग्रहणं स्वर्गोद्दितक्रिया
जन्यः असाधारणसुखत्वादिनानुमानेन विहितक्रियात्वेन रूपेण दृष्टादिः स्वर्गहेतुत्वप्राप्तिमा
दाय संभवतीत्यव्याप्तिं परिहर्तुं विधेयतावच्छेदकेति अत्यंताप्राप्तशब्देन स्वर्गप्रवृत्तेः पूर्वं वस्तुतः
प्राप्त्यभावबलेमभिप्रेतं तथा चातिदेशतः सामान्यविधितः परशास्त्रीयविधितो वा संभवत्प्रा
प्तिकविषयेष्वतनाविधिः स्वर्गकामविधिस्वशास्त्रीयविधिषु नाव्याप्तिः आनुमानिकत्वसा
मान्यप्रवृत्तत्वप्रत्याधीनत्वे हेतुभिर्विलंबितप्रवृत्तिकेष्वपोतिदेशादिप्राप्तविपरीता अप्रता
दिविधयः पूर्वं प्रवर्त्तंते ततः प्रवर्त्तमानो चातिदेशसामान्यविधीशरशास्त्रानुरोधेन कुर्शोध

षिवद्गत्यक्षाद्यनादिविद्याधिगतत्वानुरोधेनाग्रनादिष्वपि नैव प्रामाण्यभावं भजन्तेतु हि न दतिरि
क्तविषयावेद्यावतिष्ठते ॥ अबाधितत्ववदनधिगतत्वमपि हि प्रामाण्यप्रसिद्धे निषेधस्यावरप
करनिस्फुरीकृतमोन्त्यात्रिकस्यैकदेशेऽसे सिनिना श्वव्यतिरेकेऽर्थेऽनुपलब्धेन स्वमात्मनि
ति यद्यप्यग्रनाद्यधिगममप्रयोजनं नित्यत्वप्राप्त्याद्यन्यदस्ति तथापि न तद्धर्मानुष्ठानीत्यत्र
द श्रोहोमांगत्वमिवक्रियानुवादत्वमप्यं ॥ अतः शीघ्रवद्दत्तविधिनाऽवश्यविधेयस्यपुनर्वि
धानवैयर्थ्यादतिदेशादेरप्यग्रनायतिरिक्तविषयत्वमवश्यंवाच्यं ननु प्राप्त्यायविधेश्च नतेतु
तृषविषयत्वं एवं चकेनापिप्रत्यक्षस्यशास्त्रार्थालोचनात्पूर्वमाम्नोविनादतिदेशा [illegible] देर्य
घप्यग्रनादप्राप्तिरनुभूयते तथापि नामो वक्तृत इति भवत्सुक्तायाप्तिनिरासः ननु चैवमा

183

क्षेपात्प्रागवघातविधानादवघातस्य विधेरपूर्वविधित्वापातः मैवं यदर्थात्प्राप्नोति न तच्छास्त्रा
र्थ इति न्यायेनाक्षेपेण संभवत्प्राप्तिकावघातस्य प्रत्यक्षशास्त्रेणाप्रापणासंभवात् नियमविधि
लक्षणया श्रुतविधेरवघातनियमपरत्वमेव युक्तम् ननु अवघातेनैव वितुषीकुर्यादिति गृहीतं
चेतन्न नियमजन्यादृष्टस्यापूर्वजन्यजनकभावस्येशास्त्रैकसमधिगम्यत्वे सति फलस्य शास्त्र
विषयत्वापेक्षया श्रुतशास्त्रविषयत्वस्वीकारे लाघवात् ननु अनयैव दिशा पूर्तीकविधावप्या
गंगम्न हैरण्यगर्भमंत्रविधौ वा नियमविषयत्वापत्ति विधेयस्यापूर्वत्वाभावान्नातिव्याप्तिः
न चाप्राप्तनियमज्ञापकत्वेनैव तदापत्तिः ननु शब्दानां स्वरसतो विध्यन्वयित्वेनाप्रतीत
स्यैव विधेयशब्दार्थत्वात् आकरे नियमस्यार्थानि युक्तिश्च सोऽपि मात्रमुक्तं न्यायात् स्तो १८३

मार्यामुपेयादित्याद्यव्यापकत्वाच्च न त्वाक्षेपात्पूर्वं हन्ति विधिरिवरापूर्वमसौ विधिः प्रवृत्त
इति शंक्यं निरूपणमित्याह ननु चेत् तथा सति नियमविधेरपि कृतहान्याद्यदोषत्रययुक्त
त्वेनाङ्कुराद्दृष्टसाधनताज्ञापकत्वेन वा परविधिद्वयादो वैयर्थ्यापत्तेः विध्यन्तरविवेकेन नि
यमविधिनिरूपणफलं तस्याकस्थनियमविधिप्रावृत्यं यवहारस्याच्छेदापत्तेरित्यलं पल्ल
विनेन किन्तु कार्यं पूर्वविधिलक्षणोदाहरणं तदाहृतमेव व्रीहीन्प्रोक्षतीति चेत् न अग्नये
जुष्टं प्रोक्ष्यामीत्येवं रूपस्य मन्त्रस्य प्रकृते न देवतासंबन्ध इत्थं कर्मकप्रोक्षणप्रकाशकस्यैव
करणावगतकत्वं न भावस्य लिङ्गात्प्रोक्षणाङ्गत्वावगतौ सत्यां प्रोक्षणकर्तव्यतामन्त्रेण
नादृष्टानुपपत्त्यैव प्रोक्षणप्राप्तेः फक्त विधिवैयर्थ्यादिति शंकानुपपन्नत्वेनानिराकृत्याप्युपेत्य

नावदुदाहरणांतरमाह यथेति अत्यंतापूर्वसाध्यसाधनभावस्य पदद्वयज्ञापकत्वमभि
प्रेत्य दृष्टांतेनोपन्यस्तं ननु विश्वजिन्यायाद्दर्शनमस्तु वः स्फुरतीति मंत्राद्युक्तन्यायसहिताद्वा
स्वर्गार्थत्वस्यापि प्राप्तेः कथं नद्विधेरपूर्वविधित्वमित्यत आह यागस्येहेति नहि विश्वजि
न्यायेनोक्तमंत्रार्थवादस्य वास्तवं स्वर्गार्थत्वं प्रमाणं श्रुत्वैव न विधौ स्वर्गकामपदं कल्पनेऽपरं प्रमाणं स्यात् न
नश्चेन द्विधिरयमतिरेकेणैव स्वर्गार्थत्वाप्राप्तिरविरुद्धेत्यर्थः ननूक्तन्यायमंत्राद्यर्थापत्त्या स्वर्गकाम
पदं यदाग्नेयाद्युत्पत्तिवाक्येष्वेव कल्पेत तेनोदाहृतेनाधिकारवाक्येन तत्रोदाहृतेन विध्यभावेनैव
तु स्वर्गार्थत्वप्राप्तिः संभवति दर्शपूर्णकामस्य वाक्येऽप्यसाविन्याज्ञायन शंकनेऽकिंचिदिति परिहारस्तन्नेने
यति यद् अग्नेयाज्यादि परिहारेण मिलितानां षण्णां स्वर्गसाधनत्वं विधिसिद्धं नेति ननु उ
त्पत्तिवाक्ये स्वर्गकामपदाध्याहारेऽपि तस्मिन् प्रत्युत्पत्तिवाक्यं नदध्याहारसमात्येकैकस्य यागस्य स्वर्गार्थत्वापत्तेः

184

आग्नेयादिवाक्येष्विव प्रयाजादिवाक्येष्वपि फलाकांक्षेत्यप्येनन दर्शपूर्णमासप्रयाजाद्यङ्गयागा
दीनामपि स्वर्गार्थत्वापादनात् नापि सार्वकाम्यवाक्यात्तत्सिद्धिः स्वर्गकामवाक्यस्यापादकत्वाय
न कर्तव्यतां बोधयता अध्ययनविधिना स्वर्गेतरफलसाधनत्वस्याप्रेरव सार्वकाम्यविधिफल
त्वांगीकरणादित्याशयः अथानियमः पाक्षिके मनोन्यत्र कस्य पाक्षिकत्वं विवक्षितं विद्यु
पात्तानुपात्तस्यावरस्य कस्यचिद्वा आद्ये विधेरस्योद्देश्यसोमयस्य वानद्वितीयसत्नीयो व्रीहि
न वहन्तीति विधेयावघातस्यैव पाक्षिकत्वेन केवलं विधेयनियमविधावव्याप्तेः नाद्यः के
वलकोयनियमे विधेयसहितकार्यनियमे वाव्याप्तेः तथा हि यद्यान्यांगायति तदुत्तरया
गायतीत्यस्याविधेरस्तिद्धिरूपत्वपस्यस्तोत्रीयसामत्तराग्रंथेयोनिविषम...दुरच्यत्र ते

र   म

185

रेणपठितेनतयोस्तावदयमपूर्वविधिः एतमावेहिसमछंदस्केहिके ऽत्र पूर्वेभावमिकन्यायसहकृता
देकंसाम्नन्तवेक्रीमन्तरनिर्शस्त्रात्स्वाभुवानां यस्यनुस्तोत्रीयसाम्नन्तत्रैवयोनिसमछंदस्केतेपठि
तेष्वकरणादिनावगतस्तोत्रांगभावेवतत्रोभयनियमः यथैवहिस्तोत्रीयसाम्ननृवगेयत्वनिर्वाहि
यथोनिभित्रर्गुयस्यानियमेनश्राशोनियमक्रीयतेनूतथास्तोत्रांगत्वेनावगतयोरध्रुवागतयोस्तोत्रंग
त्वायोगादनियमेनसामञ्जाश्लोसंभवतियोनिसाम्नोनियमः यत्रतुवैरूपेवामदेव्यंपृष्ठंभवतीना
दिविधौसाम्नस्तोत्रांगत्वादेवतद्योनेस्तोत्रसंबंधः रूप्यनेतत्रोत्तरयोस्तोत्रांगत्वंनप्रमाणमस्ती
तिनतन्निर्वाहायाद्रियतांसामञ्जाविरस्तीतिसामसंस्कार्ययोः केवलस्त्रोरिवनियमाऽवतिकार्यमात्र
नियमः केवलेकार्यनियमसामनियमसहितेचकार्यनियमेपाक्षिकविधेयञ्जायणात्मनोनियम

लक्षणस्याव्याप्तिः एवंसमप्राधान्येन कार्योपायनियमद्वयफलकोऽसंत्यन्येप्यथास्मदुदाहरणीभू
ताविषयः यज्ञेषु क्रांग्रहणात्प्रियाजेष्वप्यस्मादिति एतदभावे हि प्रयाजानामप्यनियमात्सर्वक्रत्वंसा
न्(?)जो हि वाजपेयस्यानियतप्रयाजजनकत्वं स्यादिति भवत्यस्माद्व्यनियमसिद्धिः तथा वाजपेये यजुर्यु
क्तं रथमध्ववेददानीन्येन तद्विध्यभावे रज्जुयुक्तरथस्यानियतलिंकसंबंधः प्राप्नुयादध्वर्योश्चानियत
रथसंबंधः प्राप्नुयात् तथा सोमरभ्रकन्याज्ञाने हीपितृहृष्टिकामाय निधनं कुर्यादिति विधेरभावे हि
हीति निधनस्य स्वर्गादिफलकसोमरसंबंधो विप्राप्नुयात् इष्टार्थसोमरस्य वागादिनिधनांतरसंबं
धो विप्राप्नुयादिति भवत्येनाम्नाम विविधिभावान्तेकस्येरू नियमद्वयसिद्धिः यथा प्राक्लूणस्य याजना
दिषुद्रव्यादिषु वार्जनोपायेषु प्राग्नेषु याजनाद्युपायनियमस्यावध्रू यतेपलांतुकमणामस्यत्रीणि

186

कर्माणि जीविका याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति उक्तनियमाद्ब्राह्मणादीनामेव याज
नाद्यधिकारस्यापि नियमसिद्धिर्भवति यज्ञादिविधयो हि याजकादिसाकांक्षा उक्तविध्यभावे कानु
पपत्त्या याजकादीनाक्षेपेरन् उक्तविधिसत्त्वे तु न दृष्टेनैव याजनादिषु प्रवृत्तानां ब्राह्मणानां निरीक्षणेनैव
व निराकांक्षाः सन्तो नाक्षिपन्तीति एवं चात्रापि पूर्ववद्व्याप्तिः ननु विधेयगतपाक्षिकत्वविवक्षा
यां नो काप्यापत्तयः संगच्छन्ते यद्योन्यायमित्यस्य विधिस्तावदेकं साम तृचे क्रियते स्तोत्रीयमिति विधिवि
हितत्रित्वपूरणाय योनिभिन्नगृह्याग्रवर्त्तिनि शस्त्रविवादे एकं सामेति विधिना सस्तोत्रांगत्वेन त्रित्ववि
धानसामांगत्वेनेति निरूपितं न चैवमेवं तत्र च सामगानाधिकरणे एवं च स्तोत्रांगत्वात्रित्वपूरणाय स्तोत्रांगभूतर्ग्भा

यद्योन्यायमिति

पक्षायां प्रवर्त्तमानेन विधिनोत्तरार्द्धं पस्तोत्रांगत्वेनैव विधेयं साम संबंधस्तु न दृष्टेनैव संभवत्याक्षेपिकत्वादनुवादित्वमः

फलचमसेभक्ष १

पूतीकेषभिषवसंबंधसंबंधसंबंधसंबं स्तोत्रे वर्ज्योऽरूपायत्वेनैव नियम इति यद्योन्यायमित्येतदुपा
यनियमपरमेव न कार्यनियमपरं आस्नांगात्वदुदाहृनेवामदेव्यं पृष्ठं पृष्ठं भवतीत्यादौ कार्यनिय
मः उभयनियमस्य संभवतीति तदुदाहरणेऽहूतौ कहायनीन्याये नैवोभयनियमसंभवे विधिवैयर्थ्या
त् अपं विनं चैव फलसांकर्यं स्वं इत्येवं अनुवाविधिमूलो नियमद्वयसिद्धिः तथापि कार्यनियमस्य न कार्य
फलत्वं संगच्छते यथैव हि दर्शनादिनिष्पत्तिरिति विधिना जायमानापि न तत्फलं अविधेयगामित्वादि
अदृष्टत्वाच्च तथा कार्यनियमतः विधिमात्रः सिध्यन्ति न तेषां फलं ताभ्यामेव हेतुभ्यां अश्राद्धता द
र्शपूर्णमासादिन विधानं कुर्वन्नेव विधिना बोधितसाध्यसंबंधेन निराकांक्षेण साधनेन साध्यांतराकांक्षणा
त् कुर्वन्नहि साध्यनियमः साधननियमो वान्तरमेवात्मानं लभते न वचनतत्त्वविधेयसंबंधनिरूपक

187

त्वाविशेषेणविधेयोद्देश्ययोस्तन्त्रामित्वाभ्यां फलत्वाफलत्वविवेकसंभवः साध्यसाधनसंबंधबोधय
तोविधेस्तत्सहकारिणांवाक्यत्वादीनांसाधनांशएवप्रामाण्यात्साध्यांशस्यनांतरीयकत्वात् अत
एवाङ्गभेदाः श्रुत्यादिभिः प्रमाणैश्च शेषत्वस्यैवनिर्णयः शेषीतद्विषयत्वेनलक्ष्यंतेनांतरीयकइति
अत एव वा यथा नः शेषलक्षणमित्येतत्सूत्रितं नशेषिलक्षणमिति प्रमाणफलस्यैवप्रामाण्यविषयगा
मित्वेसंभवति नान्यगामित्वमुक्तमिति वेत्कृ विधीनांकार्यनियमफलत्वांशेनायामुदाहरणत्वंस
गच्छते यत्कृ प्रतिग्रहादिनियमविधाववाक्यास्युपन्यासः सोतितुच्छः स्वोक्तिविरुद्धश्चायं यथा हि प्रति
ग्रहादिविधिवलात्प्रतिग्रहादिषु प्रवृत्तावाक्षणानुपपन्नस्य निराकांक्षादानादिविषयो नान्योन्य
तिप्रतिग्रहीत्रादिनाक्षिप्यंतीति ब्राह्मणानां दानादौ प्रतिग्रहीतृत्वादिनियमोलभ्यते न तथा नेद

वविधिभिश्चत्रब्राह्मणादिभिः प्रतिग्रहाद्यर्जितधनानुपलम्भं निराकांक्षैः क्रतुभिर्नान्यानि धना
न्याक्षिप्येरन् प्रतिग्रहाद्युपायार्जितधननियमः क्रतुप्रसिद्ध्येन अस्त्वेवमिति चेन्न तथा सत्यध्ययनस्या
क्रत्वर्थत्वेऽपि तन्नियमस्य क्रतूपयोगसंभवादध्ययनस्य क्रत्वर्थत्वं पुरुषार्थत्वेऽनभ्युपगम्य यथाऽर्थ
तानार्थत्वं स्वीक्रियते तथाऽर्थार्जननियमस्यापि क्रतूपकारितया क्रतूपयोगसंभवादर्थार्जनं केवलमर्था
र्थमेव स्यान्न पुरुषार्थं तथा सति नियमादृष्टं कल्प्यं नोपन्यासोऽर्थार्जनाधिकरणभाष्यकारीयो न
संभवेत् यच्चोक्तं प्रधानव्याख्याने शिलोञ्छदायाद्यभावे प्रतिग्रहादृष्टानादभ्युदयः प्रतिग्रहादिभिनो
पायानुष्ठानात्प्रत्यवायो वा कल्प्यत इति तदपि न घटेत श्रेयोऽर्थोऽर्थार्जनस्य ह्यसत्पुरुषार्थत्वेऽ
दृष्टकार्यार्थार्जनाधिकरणएव तद्बाधान कर्तुमर्हतीति भाष्यव्याख्यानाव्याख्यानावसरे निराकृ

तं यथाह्यग्निविधयोराधानाध्ययनविध्यभावेऽनन्याक्षेप्यत्वेन क्रतुविधिभिर्नियमनाक्षेपप्रसक्तेऽग्नि
विद्यामात्रार्थत्वेनाधानाध्ययने विरुध्यन्त्यां विधिभ्यामग्निविद्यायोगो वश्यनियमनाक्षेपप्राग्निबंधात्तत्सिद्धा
ग्निविद्यानियमः क्रतुष्वसिध्यति एवं प्रतिग्रहादिविध्यभावेऽपि क्रतुविधिकर्त्तृकोधनाक्षेपोनि
यमेन प्रसक्त्येन स्वप्रतिग्रहादिविधिभिः प्रतिबध्येत न तदा प्रतिग्रहादिविधेः क्रत्वर्थत्वेऽपि तत्सिद्धध
ननियमः क्रतुष्वसिद्ध्येत् नैवैवमस्ति प्रतिग्रहादिविध्यभावेऽपि जीवनार्थमनिमार्जितधनोपाद
नेनोपपन्नैः क्रतुविधिभिरनाक्षेपकत्वसंभवात् अतोऽदृष्टार्थत्वे नियमानर्थक्यात् क्रत्वर्थत्वे च मा
नाभावात्पुरुषार्थमेव द्रव्यार्जनमिति नहि रागतः प्रतिग्रहादिषु प्रवृत्तैरेव प्रतिग्रहीत्र्यादिभि
भा॰ रुपपन्नाः क्रतुविधयो नोक्तविध्यभावेऽपि प्रतिग्रहीत्रादीनाक्षिपेयुरिति नोक्तविधिभिस्तदाक्षे

प्रतिनन्निषेधस्य वा पुरुषार्थत्वाद्येन केनाप्यार्त्विज्ये क्रीयमाणे क्रतुवैगुण्याभावान्नार्त्विज्यं ब्राह्म
णैनैव कर्तव्यं किं तु त्रिभिर्वर्णैरिति पूर्वपक्षं प्रदर्श्य सिद्धान्तितं स्यादेवं यद्विक्रतुरूढिप्रकार
मेव शास्त्रं स्यात् अस्ति त्वदापि क्रत्वर्थं ब्राह्मणानामेवार्त्विज्यमिति राजयाजकयाज्यस्य यथादत्तं ह
विर्नशोदिति वचनदृशा ब्राह्मणानामार्त्विज्ये क्रतुवैगुण्यं निर्णीयत इति यदि प्रतिग्रहादि
शास्त्रात्पुरुषार्थादपि ब्राह्मणानामार्त्विज्यनियमः क्रत्वर्थः सिद्धेत् न दोनश्री क्रतुप्रकाराद्वुभा
वपि पूर्वपक्षसिद्धान्तावनुपपन्नौ स्यातां अस्तु वा ततः एवं शास्त्राद्ब्राह्मणानामार्त्विज्यादि निय
मसिद्धिः तथापि त्वदुक्तरीत्यैव स्याच्च विधेयगामित्वादिप्रकृष्टत्वाच्च दलेनादनिष्टे हंति विधि
फलत्वाभाववत्त्वप्रकृतं विधिफलत्वाभाववदिति कथं न फलत्वाशेनायामसुदाहरणत्वं संगच्छते

प्रतिग्रहादिविधीनां अतो विधेयगतपाक्षिकत्वविवक्षा निर्दोषेति चेन्न यतो विधेयमप्यत्र विघुपात्त
विवक्षितं अनुपात्तं बाधः अनुपात्तनियमपरे विधावप्याप्तेः दृश्यते हि पुरोडाशं प्रथयतीत्यनुपा
त्तकर्तृनियतो नियमविधिः न ह्यत्र प्रथनं विधेयं पुरोडाशाक्षेपादेव तत्प्राप्तेः अध्वर्युकर्तृकर्तृक
त्वनियमार्थं तु न हि विधीयते तथा व्रीहिभिर्यजेतेत्यत्रैवानुपात्तेषु अनुपात्तव्रीहिनियमपरो विधिः अ
त्र हि साक्षाद्यागाङ्गत्वेन प्रतीयमाना अपि व्रीहयो न तथा विधेयाः आग्नेयादीनामुत्पत्तिशिष्टपुरोडाशा
वरोधात् उपांशुयाजस्यापि नाववृत्तामितिनाक्येनित्यवदाज्यावरोधप्रतीतेः अतः पुरोडाशप्रकृ
तित्वेन विधेयाः न त्वेन च तन्नियमो निर्वापादिविधिभ्योपि प्राप्नोति तेषु हि निर्वापादेरवस्कार्य
त्वेन व्रीहयः अतः प्रयोजनमपेक्षन्ते कपालेष्वधिश्रयणीति प्रयोगानर्गतेन अप्रणविधिनावसा

मान्यतः प्रकृतिद्वयोपादानासंभवे किं ज्ञानार्थं पुरोडाशप्रकृतिद्वयमुपादेयमिति भवत्याकांक्षा उ
भयाकांक्षया परस्परान्वयोऽभवन्नेव व्रीहीणां प्रकृतित्वनियमः यद्वोभयरीत्या प्रकृतिद्वयविशेषा
कांक्षायां षष्ठांत्यन्यायेन व्रीहीणामेदस्तु मनस्यमानं इति मंत्रादेव व्रीहिनियमसिद्धिः अतो न व्रीहि
नियमार्थमपि तच्छास्त्रं किंत्ववघातप्रोक्षणशास्त्रयोर्यवविषयज्ञापनार्थं तेन व्रीहीणामपूर्वसाधनत्वे
ज्ञापिते हि सति हिंसति प्रोक्षणशास्त्रयो व्रीहिपदेन पूर्वावधृतापूर्वसाधनत्वलक्षणोऽसंभवाद्
वतिनयोर्यवसाधारण्यं इतरथा तस्यात्रासंभवान्न तत्सिद्ध्येत् न तु व्रीहिशास्त्राभावेऽपि अपण
विधुश्चाप्रकृतिद्वयाकांक्षां प्रोक्षणादिविध्युत्थां च प्रोक्षणादिसंस्कृतव्रीहीणामर्थाकांक्षा
मालोच्यमदानादृश व्रीहीणां प्रकृतिद्वयनयोऽन्वयः कल्प्यते तेन तदा प्रोक्षणादिसाध्यत्वमपि

मा.प्र
१९०

धा

नेमां न व्रीहित्वाकारेण संभवतीत्यालोच्य कस्मिंश्चिन्न शक्तितदवच्छेदत्वमन्यकापूर्वसाधनत्वाकारेणैव नेषां न
साध्यत्वमित्यपि कल्प्यते नैवं नियमवैदेवं प्रोक्षणादेर्यवसाधारण्यापत्तिरिति चेन्न व्रीहिशास्त्रबोधितापूर्वसाधन
त्वलक्षणायां सत्यां स्रुवादिवाक्यतन्त्र्यर्थमपूर्वसाधनत्वस्य व्रीहित्वेन विशेषणे युगपद्वृत्तिविरोधात्तंडुलप्रग
डिकेयेवं न हि विशेषणीयं तादृशापूर्वसाधनत्वं यववैषम्यातिभवति प्रोक्षणादेस्तत्साधारण्ये व्रीहिशास्त्रा
भावेऽपूर्वसाधनत्वलक्षणाया अभावात्कस्मिंश्चिन्न द्रव्ये शक्तितदवच्छेदकत्वकल्पनापूर्वसाधनत्वाकारेण प्रोक्ष
णादिसाध्यत्वं कल्प्यं न तत्र स्रुवादिवाक्यतन्त्र्यर्थरूपस्थितं व्रीहित्वेनैव शक्यतेऽन्वेतुं शब्दानामसत्क
कल्पनायां हि द्वयविरोधाऽसमर्थस्य स्यवयववाक्यत्वात्तत्र साधारण्यं प्रोक्षणस्यादिति नन्वे
वं व्रीहिशास्त्रानैव न स्यात्साधारण्यासिद्धिः अपूर्वसाधनत्वलक्षणाया असंभवेन व्रीहित्वविधित्वि

१९०

धा

190

वक्षायामपि हन्त्रिद्वयाश्रसक्तेः कथं तदसंभव इति चेन्न ~ आनर्थक्यपरिहारार्थं सा स्वीक्रिय-
यते शक्यते तु तां विनापि तत्परिहर्तुं यागस्वरूपस्यानिर्भुंजाने त्पत्र हि रागतः प्राप्तभोजनानुवादे-
न विहितमपि प्राप्तुस्वत्वेन कृतेनेतरूपेण वा रूपेण भोजनार्थं स्वीक्रियते कल्पाददृष्टफलार्थं
त्यजते एवं व्रीहीननुवादेन विहितस्य प्रोक्षणादेस्तादर्थ्यपरित्यागे न कृत्प्रकरणिकत्व प्र-
वर्थित्वं कुतो लक्षणां विनैव नो चेत् ~ अथ द्वितीयाश्रुत्यवगतव्रीह्यर्थत्वनिर्वाहाय व्रीहिप-
दस्यापूर्वीयव्रीहिपरत्वमावश्यकं तत्र व्रीहित्वस्योद्देश्यविशेषणतयाविवक्षायां वाक्य-
भेदात्तदविवक्षितमित्युच्यते ~ अपूर्वीयत्वांशस्येवार्थिकत्वेन व्रीहित्वविवक्षायामेव वाक्य-
भेदाभावात् प्रधानविधेः कथं भावेक्षायां प्रोक्षणावघातविध्योः फलाकांक्षायामेकवाक्यता

तावदवश्यं कल्प्या प्रोक्षणेनावघाते व्रीहिद्वारा प्रधानं कुर्यादिति न वापूर्वीयत्वान्यथा व्रीहिद्वारेणापू
र्वार्थत्वं संभवतीति भवत्यर्थादपूर्वीयव्रीहिविषयत्वलाभः न वापूर्वीयत्वेनोपस्थितिं विनालौकि
कव्रीहित्वाकारेण संस्कार्यत्वबोधो न संभवतीत्यपि शंकास्पदं न त्वेपर्याप्तसिद्धानयनीमत्र नाहृ
त्रापयस्त्वेनैव दध्यानयनसंस्कार्यत्वस्यावश्यमभ्युपेयत्वात् एतद्वाक्योपस्थितसंस्कृतपरामर्शिस
र्वनाममुक्तेनैतद्द्वारपठितेन सा वैश्वदेव्यामिक्षेति वचनेन द्व्यदेवतासंबंधोपस्थापनमुखेन ज्ञ
प्यायागापूर्वसाधनत्वस्य पयः समवायिन एतद्वाक्यप्रवृत्तिवेलायामसंभवदुपस्थितिकस्यात्रत्यप
दैः पदैर्लक्षणायासंभवात् आस्तां वा प्रधानविधेयकवाक्यत्वं व्रीहिमात्रोद्देशेन प्रोक्षणादिविधि
मात्रपर्याप्तोद्देशेनाप्यपूर्वार्थप्रोक्षणादेरपूर्वीयविशेषत्वलाभः शक्यत एव निरूपयितुं यथायस्यामा

तग्नीत्यनुगतो ऽभिनिमित्तो वेदस्मुदिशाह्वा पुनराधेयमेव तस्य प्रायश्चित्तिरिति त्यत्र कृत्वा चिन्तात्म
कहविरूमयत्वन्यायेन शास्त्रे ऽबोधवेलायां निमित्तविशेषणत्वे ऽमयत्वाविवक्षया ऽनुगतरागस्यानुगमस्यनि
मित्तत्वसंभवे ऽपि नैमित्तिकाधानस्य महिताग्निद्वयजनकत्वस्वभावानुरोधेन आमयाग्न्यनुगम एव
निमित्तमित्तमिति कल्प्यते यथा व्रीहिसंस्कारत्वेन विहितप्रोक्षणस्य व्रीहिविषयत्वे सत्यानर्थक्यादपू
र्वीयव्रीहिविषयत्वयोग्यतामालोच्य तदनुरोधेन शक्यत एव कल्पयितुं अपूर्वीयव्रीहय एवात्रोद्देश्या
इति किमपूर्वसाधनलक्षणयासत्यां वा तस्यां तु वा दिव्यपि अनिप्रोक्षणीये त्यापत्तिः नैतच्चेत्तत्र हन्ते
रदृष्टार्थत्वं व्रीहिषु दृष्टार्थत्वमिति वैरूप्यापत्तिश्च तद्वारणाय तं डुलनिर्वृत्तिप्रणाड्या तदुद्देश्यापूर्व
साधनविशेषणत्वाकामे दापत्तिः यदि च व्रीहिपदेन वसोमममभिषुणोतीत्यादिवाक्येषु सोमपदेन

पूर्वसाधनलक्षणास्यात् न दार्शप्रोक्षणादीनां यवसाधारण्यवत्सोमधर्माणां फलत्वमससाधारण्यं स्यात्
फलत्वमस्य नैमित्तिकत्वात् यववैलक्षण्यमस्तीति चेत् किं न तत्ः न हि सोमत्वमससाधारणाकारेणापू
र्वसाधनोद्दिश्य नित्यवत्प्रोक्षणादिविधाने नित्यानित्यसंयोगविरोधोऽस्ति फलत्वमससाधारण्याभावेना
ग्निनिमित्तमूलनिवारपूतिकादिसाधारण्यमपि प्रोक्षणबवादीनां न स्यात् नव मुख्यव्रीह्याद्यवयव
लिप्सया गृहीतमाणानीवारादयो नैमित्तिकद्रव्यान्तरत्वेन गृह्यन्ते येन फलत्वमसत्तुल्यं स्यात् किं तु व्री
हिस्थानदवयववत् व्रीहिशास्त्रार्थत्वेनैव गृह्यन्त इत्यविशंक्यं व्रीहिनीवारयोस्तुल्यत्वप्रसंगात् व्री
हिसमफलशास्त्रार्थत्वासंभवान्नीवारेषु न हि कल्प्याद्व्रीह्यसंभव एव नीवाराणां शास्त्रार्थत्वमिति चेत् त
सिद्धं तद्दत्वमसमेव नैमित्तिकत्वं एवं च व्रीहिनीवाराणां नावयवानां जातिसिकरूपेण नित्यत्वानित्य

त्वभेदसत्त्वपूर्वसाधनत्वात्यक्तनित्यरूपक्रोडीकृतानां नित्यप्रोक्षणादिसंबंधउपपादनीयः नवानेनै
वरूपेण संभव-संप्रवृः फलचमसः किमित्युपेक्षणीयः यदि त्वपूर्वसाधनलक्षणां परित्यज्य संस्कार
वाकेषु व्रीह्यादिपदं मुख्यार्थमंगीक्रियते तदा प्रतिनिधिभूतनीवारादेर्नैमित्तिकफलचमसादेश्च
नित्यप्रोक्षणादिसंबंधासंबंधो संभवतः व्रीहिगतानामिव नीवारगतानामप्यवयवानां व्रीहिपदे
नविषयीकरणेपि सोमपदेन फलचमसस्याविषयीकरणात् तस्मात्फलचमसस्य नित्यधर्मा
लाभः प्रतिनिधेस्तु तत्त्वामरतिसिद्धांतानुरोधेनाप्यपूर्वसाधने विधीयमानं न तत्समकालं वि
धीयते धर्माश्च नित्यवद्विधीयमानाः स्वविधिसमकालप्रतीतनित्यविधिशेषत्वेन निराकांक्षा
न पुनर्नैमित्तिकविधिशेषत्वं प्रतिपद्यंते प्रतिपद्यंते च प्रतिनिधिशेषत्वं नित्यविधेरेव तत्त्वापक

त्वात् न व्रीहिविधेः प्रोक्षणादिविधेश्च नित्यत्वेन युगपत्प्रवृत्तत्वात् प्रोक्षणादिविधेः प्रागनवगत
मपूर्वसाधनत्वं व्रीहिष्विति प्रोक्षणादिविधिगतेन व्रीहिपदेन न लक्षणेत्यपि शंक्यं यवेषु धर्मकी
क्षाप्रशमार्थापूर्वसाधनत्वलक्षणार्थमेव स्वतुल्यप्रवृत्तिकतया प्रतीयमानमपि व्रीहिशास्त्रं प्रतीक्ष्ये
व प्रोक्षणादिविधिप्रवृत्त्यभ्युपगमात् एवं व्रीहिशास्त्रोपस्थापितसाधनत्वं लक्षणया न द्विषयीकृ
तत्वाविशेषेण व्रीहीणामिव नीवाराणां तुल्यप्रवृत्तिकशास्त्रबोधितसाधनत्वानां च यवाना
मपि संग्रहाद्वत्रिविधधर्मसंबन्ध उभयेषां नैमित्तिकविधेस्त्वपवादतया धर्मविधिवन्नित्यद्रव्य
विधिप्रतीक्षणत्वसमकालप्रवृत्तेन तेन धर्मविधेः प्रागपूर्वसाधनतानाश्रयतापन्नानां धर्मवि
धिषु लक्षणयानन्तसंग्रह इति न नैमित्तिकस्य धर्मत्वाभ इति मैवं यवानामिव फलत्वमस्यापि

धर्माकांक्षोपशमार्थं फलवत्वमस्य विधिमपि उन्नीय तत्साक्षणापूर्वसाधनलक्षणयाऽत्र वृत्तौ धर्मवि
धिस्तत्रापि धर्मश्रवणस्यानिर्वाहकत्वात् न च व्रीहिशास्त्रेण वस्तुतो नीवारा विषयीक्रियंते व्रीहिशब्दे
न व्रीहित्वावच्छेद्यानामिव तत्तदनवच्छेद्यानां तदवच्छेदकत्वयोग्यानामपि नीवारगतावयवानां निर्देशसंभ
वात् न तर्हि इदं सत्यामपूर्वसाधनलक्षणायां न नैमित्तिक इति नियोगो धर्मत्वाभावान्नाम व्यवस्थितिशक्य
ते नु तस्यामसत्यां समुपपादयितुं यद्यपि व्रीहिभिर्यजेतेत्यत्र तत्र व्रीहिपदवत्प्रोक्षणादिविधिगत
व्रीहिपदमपि तत्स्वरसतो नीवारगतावयवान्निर्दिशति तथापि व्रीहीणामिव तेषामप्यपूर्वसाध
नत्वान्नियमे संभवत्यनियमस्यान्याय्यत्वेन इति नियमाद्याकांक्षत्वात्साभिधेयव्रीहित्वावच्छेदत्व
रूपसंबंधानादरेण तदवच्छेदकत्वयोग्यतामेव लक्षणानिमित्तसंबंधमभ्युपेत्यैकरूपेव लक्षणया

194

व्रीहिनीवारगतावयवान्प्रतिपादयंति न च व्रीहिशास्त्रेण पूर्वोक्तरीत्या नीवाराणामविषयीकर
णे केन तेषामपूर्वसाधनत्वमिति वाच्यं स्वस्वरूपकर्तव्यतावोधकत्वेन प्रधानविधिना व्रीह्यभावे
द्रव्यांतरमाक्षिपता व्रीहित्वावच्छेदयोग्यपदार्थमुख्यसंनिकृष्टानां तदवयवानां संभवेपि प्रदृष्टानां
तदर्हत्वेन तदवयवा एवाक्षिप्यंत इति प्रधानविधिवलादेव श्रुतिनिर्धीनामप्यपूर्वसाधनत्वसि
द्धेः न चैवं प्रथमप्राप्तव्रीहिसंवंधेन निराकांक्षाधर्माणि पाश्चात्यनीवारैः संवंध्येरन्निति शंक्यं प्रकृति
संवंधानिराकांक्षाणामपि धर्माणां पाश्चात्यनिराकांक्षानुरोधेन विकृतिसंवंधवन्नीवाराणामप्युक्ता
कांक्षानुरोधेन हंत्यादिधर्माणां तत्संवंधोपपत्तेः नन्वेवं फलवमसस्यापि तदाकांक्षा
त्वान्नीवाररीत्या सोमधर्मसंवंधः स्यादिति चेन्न व्रीहिनीवारसाधारणलक्षणाहेतो

१९४

व्रीहित्वावच्छेद्यत्वयोग्यतासंबंधस्यैवसोमफलचमससाधारणलक्षणाहेतोः असिद्धसंबंधस्याभावा
त् नचैवंयवानामपिप्रोक्षणादिसंबंधोनस्यादितिशंक्यं इष्टापत्तेः हंत्यादिनियमलाभायाप्रसिद्धे
नापिसंबंधेनव्रीहिसोमपदार्थयोःपचफलचमसलक्षणास्यादितिशंक्यं नादृशलक्षणाकल्पना
दनियमस्यैवन्याय्यत्वात् अन्यथायवप्रयोगेपुरोडाशस्यादनस्यस्मारकोनियमनिवारणाय
नस्मीत्सीदेतिमंत्रगतव्रीहिपदस्यनीवारेष्विवयवेष्वपिकथंचित्सत्वहित्तिस्तूपपाद्ययवप्रयोग
पिनस्यमंत्रस्यग्रहस्यापत्तेः नरसमयपुरोडाशेषुबधान्यमसीतिमंत्रेवीदकश्रानेधान्यपदोद्धारदे
वतादेवतावद्ध्यस्यविधिगतशब्दनियमाभावेनप्रसज्यमानस्यमांसमसिपलमसिनरसमसीत्यपि
यतपदप्रयोगस्यनिवारणायप्रकृतपदलक्षणानिमित्तसंबंधाभावेपिधान्यपदस्याप्रसिद्धसं

संबंधेन मासे प्रवृत्तिमुपपादयन्नयोगापत्तेः तस्मिन्नैमित्तिकप्रवृत्तिनिषेधो धर्मलाभलाभव्यवस्थाप
नापूर्वसाधनलक्षणास्त्वीकर्तुमुविना किंच यदि ब्रीहिपदे पूर्वसाधनलक्षणामंगीकृत्य ब्रीहित्व
मविवक्षितमुच्यते तर्हि दर्शपूर्णमासावारिप्समाणस्त्वारम्भणीयायजेतेत्यत्रारंभस्यापृथगपूर्वाभा
वेन दर्शपूर्णमासापूर्वसाधनरूपत्वारंभपदेन लक्ष्यमिति ब्रीहित्ववदारंभस्याप्यविवक्षास्यात् वि
वक्षायां वा कथं न वृत्तिद्वयापत्तिर्वाक्यभेदो वा अस्त्वविवक्षितमेव तत् एवं च सौत्रामण्यादीनामभिवृद्धि
नीयादिप्रवृत्तिकल्पनारंभणीयायाश्चांगत्वापत्तेः तथासति द्वितीयादिप्रयोगेषु सानकार्येति नाव
मिकसिद्धांतस्पृक्षणीयादिप्रधानारंभानन्तरं पृथगारंभाभावेन राजसूयान्तर्गतेष्टिषु ब्रनिरपेक्षारंभाभ
भावेन सा न कार्येति दाशमिकसिद्धांतयोरुच्छेदापत्तिः किंचास्ति प्रथमामन्वाहत्रिरुक्तमामि

मिति विहितस्त्विरम्पासोनन्यधर्मः किं तु प्रथमोत्तमस्थानधर्मस्तेन श्च यत्र तत्रस्थाग्रवो वा जीया
नं निरम्पासं लभते प्रथमस्थाने विधमानानुपाकाविद्दक्रिरम्पासं लभन्त इति न दूषमेसिद्धान्ति तं
न कथं संगच्छते यदि प्रथमादिशब्दाना अपूर्वसाधनलक्षणार्थस्फुः न हि प्रथमस्थाने किं
चिदपूर्वं क्लृप्तमस्ति यत्साधनलक्षणयास्वेच्छया व्यवस्थितानामनुष्ठाने सिद्धिः स्यात् सर्वत्र पिहि
सामिधेन्यः समिद्धाग्निप्रकाशनेन दृष्टार्था एव तस्मात्समिद्धाग्निप्रकाशनं निर्वर्तितं अन्ना
ऽङ्कयाप्रधानापूर्वसाधनत्वलक्षणामंगीकृत्य प्रीहितुवत्सा शम्याद्यविवक्षितं वाच्यं तथा स
ति सामिधेनीमात्रे त्रिरभ्यासापत्तिः किं च रथंतरे प्रस्तूयमाने निर्माल्यं येन दृष्टमिति प्रस्तूयमाने समु
द्रं मनसा ध्यायेदिति विधानां दृष्टार्थं रथंतरधर्माणां निर्देशाव्यवस्थिति स्तोत्रे कृतानेवमेसिद्धां

196

तित्वं तत्रनिर्देशशब्देनोद्देश्यतावच्छेदकयोर्बृहत्त्वरथंतरयोर्भेदेनानिर्देशोभिप्रेतइतिभाष्येव्याख्यानं
पदित्वाक्षणिकमपूर्वसाधनत्वंप्रोक्षणादिविधाविव निमीलनादिविधावुद्देश्यतावच्छेदकंस्या
त् न तावद्बृहद्रथंतरयोरेकंमाहेंद्रस्तोत्रमनूद्यरथंतरंपृष्ठंभवतिबृहत्पृष्ठंभवतीतिवचनाभ्यां
विधीयमानयोरेकस्तोत्राप्पूर्वसाधनत्वमवगतमितितदुद्देश्यतावच्छेदकीकृत्यव्रीहित्ववद्या
येनरथंतरत्वादिविवक्षांवस्तीकृत्यनिमीलनादीनांविधीनामपूर्वस्यैववक्षस्यपेत नवोक्तेर्वच
नयोस्तोत्रोत्पत्तिपरत्वादामिक्षावाजिनाभ्यामिवस्तोमभ्यांस्तोत्रभेदाद्भिन्नापूर्वसाधनत्वमेव
नयोरितिशंक्यं प्रकृतयोस्तोत्रविधात्वश्रवणात्गुणसंक्रांतिशक्तिकल्पनतद्धानुपपत्तेःस्पगुणासंक्रां
तशक्तिकस्यबृहत्पृष्ठेःस्तुवतइतिवचनस्यपृष्ठपभृप्सोमाधिकरणन्यायेनावाराग्निहोत्राधिकरण

न्यायेन वृत्तोत्रोत्पत्तिपरतायावरूमोऽस्त्वित्यात् तस्मान्नैवापूर्वसाधनत्वलक्षणांगीकारः क्वचिदपिपु
करतिनैवव्रीहिभिर्यजेतेत्यस्य विधेर्हि तिविधिस्य व्रीहिपदे पूर्वसाधनलक्षणापादनमुखेनानु
पात्तहिं तिनियमार्थत्वं घटते अतएवात्र विधेयपाक्षिकत्वविवक्षायामपि न नियमविधिलक्षणास्य
व्रीहिभिर्यजेतेति विधावव्याप्तिस्संभवतीति द्वेत् अत्र ब्रूमः न तावत्प्रोक्षणादिविधानपूर्वसाध
नलक्षणामंतरेणानर्थक्यपरिहारः संभवति यस्तावत्तत्र प्रकारः आकुरवत्वनियमदृष्टांतेनोक्तः
सोऽतितुच्छः यतस्तत्र निधेयद्यपिव्रीहीनितिद्धितीयानश्रुतेन तथापि व्रीहीणां मानान्तरेणापू
र्वीयतायाउपस्थितेर्घोक्षणस्य तादर्थ्यमेव स्वीक्रियेत न तु साक्षात्क्रत्वंगत्वं संनिपातितायाः
प्रधानकर्मत्वापेक्षया न्यायस्त्वात् उपपादितं त्वेतदधस्तात् स्थाणोस्स्थाण्वाज्जुहोतीत्युदाहरणे

भा॰दी॰
१९७

197

प्राङ्मुखत्वोदाहरणेपिहियद्यशानस्यकेनापिप्रकारेणेनानुप्रवेशादिनयोपस्थितिःस्यात् नैवप्राप्नुय
त्वंतादर्थ्यंलक्ष्यात् ईदृशमानर्थक्यपरिहारंविश्वजिन्न्यायेनापिसंभवंतमप्रसिद्धदृष्टांतेनाकि
स्तुकृवानभवानित्याश्चर्यं यदपिप्रधानविधेरेकवाक्यत्वबलेनप्रकारांतरंतदप्युक्तं अपूर्वसा
धनलक्षणामनंगीकृत्योक्तोभयाकांक्षावशात्किसियंपदैकवाक्यतोद्योतन वाक्यैकवाक्यतावग
न्तव्यः परिपूर्णान्वयबोधजनकत्वेनविभज्यमानसाकांक्षत्वश्चन्यस्याप्रतीयमानप्रधानवि
धिसान्निध्यस्यकृचित्वादेलक्षणाभावेनतत्केत्यपिनानुपपत्तेः नद्वितीयः द्वयोःपदसमुदाय
योःप्रत्येकमन्वाबाधितान्वयबोधजननेनत्व एववाक्यपदेशयोरुभयाकांक्षालोचनेनपदैक
वाक्यत्वंतद्विवाक्यैकवाक्यत्वं तथैवप्रयाजादिवाक्येषुदर्शनात् तत्रप्रोक्षणादिवाक्याज्जाता

व्रीह्यर्थत्वबोधो यदा बाधितस्तदा कैमर्थ्याकांक्षैव न स्यात् बाधितत्वे वाक्यथमुक्तविधं वाक्यैकवाक्य
त्वं किं च यदि प्रोक्षणादिविधिगतस्य व्रीहिपदस्यापूर्वीयव्यक्तिविषयत्वं प्रधानविध्येकवाक्यता
लभ्यं व्रीहिद्वारकप्रोक्षणप्रधानसंबंधलभ्यं न तु न स्यात्ः प्राप्नुयात् न चैकवाक्यताकल्पकप्र
करणस्य वैयागसाधारणत्वात्कल्पितैकवाक्यतावत्त्वेन षड्विधयागान्वितप्रोक्षणस्य व्रीहिद्वारे
णनादर्थ्यमवगम्येत अपूर्वसाधनीभूतानामेव च द्वारत्वसंभवाद्यथाऽपूर्वसाधनव्रीहिपरत्वं
व्रीहिपदस्यावधार्यते तथा यावत्प्रकारणीययागसाधनीभूतानामेव नान्यानि द्वारत्वसंभवात्तु रो
डाशप्रकृतिभूतानामन्यथात्वान्न द्वारत्वं स्यात् संभवति नादृष्टकमन्वाहार्यप्रकृतिभूतानामिति
तेषामेव द्वारत्वं स्यात् अस्ति च दक्षिणान्वाहार्यं अपपयनीति विधिवशेनां नः प्रयोगमुप

198

पादेयानांधर्माकांक्षा न च तेषामपूर्वार्थत्वाभावात्पाक्षिकत्वाद्वा कथंप्रोक्षणादि प्रतिद्वारत्वमितिशंकी
नाद्वमिकन्यायेनाऽप्रपणार्थयोरपि दधिपयसोऽप्रपणसाधनत्वमात्रेणाऽप्रपणार्थधर्मान्वयवदपू
र्वोपयोगमात्रेणानेषां तदन्वयोपपत्तेः पाक्षिकत्वस्य च पुरोडाशिकव्रीहिष्वपि समत्वात् त्रायचनेवा
न्वाहार्यद्वारापि व्रीहीणामपूर्वार्थत्वं वक्तुं तुल्यन्यायेन व्रीहिमियजेतेत्यत्रापि पूर्वसाधनलक्षण
नंगीकारेऽधिकारविधायकवाक्येन यावदुपांशुपूर्वांगत्वेन व्रीहिविनियोगोनरं दूरत्वेन षड्यागग्रहण
स्यापि वैहायन प्रपणाक्षिप्तब्रह्मतिद्रव्यानियमस्यापौविरत्यायातत्वात् नवान्यपेवोजुष्टं प्रोक्षामी
तिमंत्रस्यान्वाहार्यव्रीहिप्रोक्षणेऽसंभवइति वाच्यं तादृशमंत्राणामतिरिक्तहविःप्रोक्षणादिवि
धिविषयकल्पनेनार्थवत्वात् अस्तु वा पमे वविधिर्हि विधव्रीहिद्वारंप्रोक्षणादेरपूर्वार्थत्वबाधकः

मंत्रस्य प्रधानहविःप्रोक्षणविषयो भविष्यति एकविधिविहितेनापि सकलप्रदानार्थसोममानेयथै
द्रोमंत्ररूपेद्रप्रधानविषयो भवति तथा च समंत्रकं प्रधानव्रीहिप्रोक्षणादि अमंत्रकमन्वाहार्यव्रीहि
णां तदिति वक्तृदृष्टकल्पना स्यात् तद्वरं व्रीहिपदे पूर्वसाधनलक्षणामंगीकृता न्प्रों[illegible]क्रियते हि प्र
ति पदाधिकरणे वक्तृदृष्टकल्पनो भयेन मत्वर्थलक्षणा कृषमपूर्वसाधनलक्षणायां न कल्पनो प
रिहार इति चेत् शृणु व्रीहीन्प्रोक्षतीति प्रोक्षणप्रेरणवाक्ये प्रतीयमानव्रीह्यनुवादसिध्येर्कुनः प्रा
प्तिरित्याकांक्षायामनुवादस्यपरा दृसंनिहितामित्योत्सर्गाद्व्रीहिभिर्यजेतेति विधेरिति बुद्धिर्भवति
ततो व्रीहित्वाकारेण प्रधान्येसत्सामर्थ्यक्या यदा पूर्वसाधनलक्षणा श्रीयते तदानुवाद्यव्रीहिणामि
पदपूर्वसाधनत्वं प्रापकशास्त्रादवगतं तदपूर्वसाधनत्वमेव लक्षयितुमुचितं शक्यसंबंधात् न वे

नः पूर्वकेनापि मानेन न सर्वयागांगत्वमनधारितं प्रोक्षणादेः येन श्रुतव्रीहीन नादत्य सर्वयागसाधा
रणव्रीह्यन्वेषणं क्रियेत न वोक्तलक्षणोत्तरकल्पितेनापि प्रधानविध्येकवाक्यत्वेन सर्वापूर्वार्थत्व
मापादयितुं शक्यते ॥ अतो नान्वाहार्यव्रीहिप्रोक्षणादिप्रसक्तिः न च यागमात्रांगत्वेन व्रीहीन्विदध
व्रीहिवाक्यं पुरोडाशान्वाहार्ययोर्यागांगत्वाविशेषात्समयमप्रकृतत्वेनैव कुतो न विदध्यादिति शक्यं
यतो यदाग्नेयादिवाक्यप्रकृतप्राप्तिमात्रोपजीव्ये वाक्यत्वादनुवादः प्रवर्त्तते न त्वत्र वपेयागायादृत्केन व्री
ह्याकांक्षाः प्रतीयन्ते न तदंगत्वेन नादृत्केनैव व्रीहिनियमः कर्तुमुचितः ॥ आग्नेयाग्नीषोमीयोपांशुयाग एव व्री
हिवाक्ये पुरोडाशसाधनकत्वेनैवावगताः संनिहितान्वक्रमप्रकृतत्वेनैव व्रीहीनाकांक्षन इति
पुरोडाशद्वारेव तद्यागत्रयांगत्वेनैव व्रीहिनियमार्थमदः शास्त्रं भवेदिति ━━

किंच यद्यपूर्वसाधनलक्षणामनंगीकृत्य प्रकरणकल्प्यैकवाक्यतावलेन सर्वसंस्काराणामपूर्वे वि
नियोगः तर्हि सर्वप्रोक्षणादिवाक्येषु विधिप्रत्यया अनर्थकास्युः किं हि तद्वाधिना विधयः कुर्युः नोत्प
त्तिं प्रोक्षणादेर्लोकसिद्धत्वात् नाधिकारप्रयोगौ अंगानां प्रधानीयाभ्यामेव ताभ्यां तद्वत्वसिद्धेः नापि
अदृष्टविनियोगं तस्यावाधितत्वेनाफलत्वात् अवाधितत्वेनागौर्हि नवन्निराकांक्षस्य प्रकरणेन
ग्रहणासंभवात् नापि तद्द्वारा प्रधानापूर्वे विनियोगं एतद्वाक्यैकवाक्यतापन्न प्रधानविधिवलेन
तत्प्रतीतिसिद्धेः न चोत्पत्त्यादिकार्यचतुष्टयादन्यद्विधिकार्यमस्ति न चोपपदेऽक्षविल्लक्षणोभय
तत्प्रधानभूतस्य विधेरविवक्षा विना प्रयाजादिविधौ तर्हि किं कार्यमिति चेत् इष्टसामान्यात्मना
कृतो विनियोगः न चासौ बाध्यते अत एवाहुः अंगं सत्प्रयोगविधिर्गृह्णातीति संगच्छते वेय

मुक्तिः सत्यामेवापूर्वसाधनत्वलक्षणायां प्रोक्षणादौ यदपि पुनराधेयदृष्टान्तेनानर्थक्यपरिहारा
न्तरं तदप्यसत् निमित्तगतविशेषाभावात् गमान्याङ्गनिमित्तकविधेरिव संस्कार्यगतापूर्वीयत्वावगमो
त्या संस्कार्यविसामान्यात् अत एव नैमित्तिके हि वैदिकत्वेन वैदिकाश्च दानं निमित्तत्वेन निर्णीयते नि
र्णीयते च संस्कारधारणस्य वैदिकत्वेन संस्कार्य हिरण्यस्य वैदिकत्वं अथ हिरण्यधारण्यधारणे
त्री हि प्रोक्षणे प्रकृतापूर्वीयत्वोपस्थित्याऽस्ति विशेष इति चेत् तदानुवादस्य प्रकृतगामित्वे नै
नैवापूर्वीयत्वलाभे पुनराधेयदृष्टान्तोऽर्थवस्यात् अस्तु वा सार्थकः तथापि यथा स्रुवेण
वघतीत्यत्रोद्देश्यावधानर्थपिस्याल्पमोद्वयाविधयारथ्याविशेषात् तद्वा वक्त्राद्युध्याहारमन्तरे

श्रीगणेशाय नमः स्फुटं तत्र पूर्वविधिशब्दाध्याहार इति चेत् न द्वारमपूर्वसाधनत्वलक्षणे वांगीकृता धर्मि
कल्पनातो धर्मकल्पनायाल्लघीयस्त्वात् नन्वेवं श्रेयसाधनत्वं घतीत्यत्रापि द्रव्यमित्यध्याहारेण स्यात्
द्रव्यविषयत्वस्य लक्षणयैव प्राप्तीतिसंभवात् न चानन्यलक्षणाया विप्रयोजनं अवश्यंभाव्यपूर्वसा
धनत्वलक्षणासमभ्येऽपि लक्षणाविशेषेण द्रव्यपदस्य अपूर्वसाधनलक्षणयैवाभिप्रेतन्यायव्यवस्थाला
भसंभवादिति चेत् न लक्षणापि द्रवाद्यावदृष्टप्रवृत्तिकस्यानित्यं कर्मकारकान्वयसापेक्षस्याव
घातेरनुरोधेनयोपपद्याध्याहारस्यापूर्वसाधनलक्षणातः प्रागवश्यंभावात् न चाजायमानो हि ना
प्यर्थविबोधाय यथाश्रान्तवाक्यार्थबोधात्ताज्ञो इति यागेन स्वर्गं भावयेदित्यादौ स्वर्गकामो येन वाक्ये
भुनान्यथार्थं विशेष्यत्वाद्विरपि हि भावे विश्वजित् विधौ न स्वर्गमित्यध्याहार्योपनेयं जनकत्वेन स्व

गकामपदेनैवयथाश्रुतवाक्यार्थबोधनिर्वाहात् व्रीहीन्प्रोक्षतीत्यादौ तु नैवयथाश्रुतबोधाय
कस्यचिदपेक्षा नात्यर्थबोधायापेक्ष्यमाणत्वेपूर्वीयविशेषोपस्थितिः सामान्यवाचिना व्रीहिप
देन लक्षणयातुल्यमेतिसैवाश्रीयते स्याद्वा विनैव लक्षणाध्याराभ्यामपूर्वीयव्रीहीणामुद्देश्यत्वं श्रुतेन
व्रीहित्वाकारेणैव तु न स्यान्नापूर्वीयत्वाकारेणेति न तः किमिति चेत् वक्तृतोपूर्वीयानेव तेनाका
रेणानुपस्थितानन्यानार्हवनीयत्वादिरूपेणोद्दिश्य विहितो धानस्याकृत्वर्थत्वे न प्रोक्षणादेरकृ
र्थत्वेनानर्थक्यापत्तिरिति स्यादेतत् माकरएवनवमे लवनमन्त्रिणापूर्वसाधनत्वस्य श्रुत्यादिसाम्ये
न हंतिविधेरदृष्टार्थत्वे वैयर्थ्यापत्तिः उपांशुयजुषेत्यस्य निगदेष्वपि ईवपत्नीसंयाजान्तताविधे
रन्योक्तदेव सामान्यप्रवृत्तस्यापि हंतिविधेः प्रयोजनवशेनैव संकुचितादिप्रोनिवृत्तिसंभवात्

किंच हंतिविधौ यद्यपि व्रीहिपदं न श्रूयेत तथापि दृष्टप्रयोजनानुरोधेनौषधमात्रविषय एवासौ
भवेन्न प्रकृतप्रधानहविष्टः विशेषेपि सान्नाय्यादिविषयः स्युः कृत्नीयेनेषामर्थेन संबंधः स्यधि
करणे यथाहुः क्वचिद्दृष्ट निराकांक्षः क्षीणोर्थापत्तिशक्तिकः नादृष्टार्थोपि सोन्यत्र शक्यः कल्प
यितुं विधिरिति न तत्कथमाकरज्जे व्रीहिपदश्रवणेपि स्तुवादिषु हंतिराप्यायन इत्याश्रयं यद्यपि
न दापादनं नैष्टनिवार्यं स्यात्तथापि पत्नीसंनह्नेप्येकवचनवत्सर्वेच हंतेरदृष्टार्थत्वमेव स्यादिति
कथं वैरूप्यापत्तिः नन्वेवमपि नेष्टुप्रोक्षणं स्यादिति चेन्न लक्ष्यसाधनतयाः प्रणाडिकाविशेष
णवैशिष्ट्यात् विशिष्टोद्देशे वाक्यभेद इति चेन्न आंतोसिनहिवयं प्रोक्षणादिवाक्ये प्रणाडिका
मुद्देश्यविशेषणतयानिवेशयामः किंतु व्रीहिपदेन व्रीहित्वैकार्थसमवायितया लक्ष्यो यः सा

साधनताविशेषस्तत्परिच्छेद्योपायतयानिर्देशाम: यो हि ब्रीहिशास्त्रस्थप्रतीगतः साधनताविशेषो
निष्कृष्टशक्त्यात्मकः प्रोक्षणवाक्यस्थब्रीहिपदेन लक्ष्यतेऽसौ स्वेनैवात्मनास्तु वाक्षिप्योपाहृतः व्या
पारभेदेन तु परिचीयते दर्शपौर्णमासेनेकव्यापारैः कार्यं कुर्वतां काष्ठस्थाल्यादीनां भिन्नसामर्थ्यव्यवहा
रः काष्ठस्थाल्योरन्यतरेण पाकसिद्धिंम्रानात्याद्यो मन्यन्ते वदंति तं प्रत्येवंभिन्नसामर्थ्यवत्त्वेसोभय
मप्यावश्यकमिति पक्षे भिन्नजातीयमपि स्थाल्यादिद्वयमेकक्रियायामावश्यकं मन्यते तत्पमनयोस्सा
मर्थ्यमेकार्थे वा तन्मित्येवदंति ॥ अत एव व्यापारैक्येन ब्रीहिपदलक्षितनिष्कृष्टशक्त्यात्मनः साध
नत्वस्यापूर्वसाधारण्यात्प्रोक्षणादौ नान्वयः साधारण्यासिद्धेः ॥ अन्यथा अद्ययावत्सकलमीमांस
कानां प्रणाडिकाविशेषविवक्षणेन स्रुवादिपरिहारं वदतां ब्रीहित्वस्यवाक्यभेदवशेना

नाविवक्षितत्वमापाद्य पक्षसाधारण्योक्तिर्निरस्ता विशिष्टव्याप्तिनिरूपेणापृथेन ॥ अथ पूर्वक्षणवृत्ति
त्वादिरूपसाधनत्वमेव वक्तनीयः शक्तिस्फूर्तिनदवच्छेदिकेत्येवतमतमाश्रीयते न तथापि नादेशसाधन
त्वाशरीरसंबंधत्वेन प्रणाडिकाप्रवेशस्यावश्यकत्वान्संभवति प्रणाडिकायास्तु वादिद्यावृत्तित्वत्त
रिचायकत्वं प्रणाडिकात्तसंबंधविशेषेण पूर्वक्षणवृत्तित्वरूपसाधनतायाश्च पक्षसाधारण्यापाद
वतिधर्माणां तत्साधारण्यं न वज्रादित्वाद्यवच्छेदकभेदेन साधनताभेदः एकजातीयापूर्वव्यभि
चारवारणाय साधारणेशक्रेरवनदेनवच्छेदकत्वात्तल्लाभात् तृणारणिजवच्छ्रोवैजात्यानुप
गमेपि सर्वथाऽनुपानारूपस्यापूर्ववैजात्यस्य गौरवग्रस्तत्वेन नत्वकल्पनया व्यभिचारपरिहारा
योगात् ॥ अत एव पयः अपणस्यमेत्रावरुणान्यत्र हेत्वे वज्रादिधर्माणां पक्षेषु न संभवस्तथापि परास्तं

च्चमप्यासापूर्वाणामिव व्रीहियवापूर्वयोर्वैजात्येमानाभावात् तस्मान्न प्रणाडिकाविनष्टायां वाक्यभेदः
यत्तु सत्यामपूर्वसाधनत्वलक्षणायां यवन्यायेन फलवमसेधर्मापादनं मदनमुपगच्छन्तं प्रतिप्राति निषेधोन
दभावापादनं वनदप्यलीकं व्रीहियवशास्त्रयोरुक्तस्य प्रवृत्तिलवस्योमफलत्वेम मशास्त्रयोरुक्तस्य प्रवृत्ति
त्वाभावाद्व्रीहिप्रावणगानसाधनत्वसोमसंबंधज्ञापनेन निहत्त्यानां विधानां विलंवागानसाधनत्वफलव
मसंबंधेऽसामर्थ्यात् प्रोक्षणादिशास्त्रं हि निस्यवत्स्य छिनत्वेन व्रीहिशास्त्रतुल्यकालप्रवृत्तिनया
प्रतीयमानमपि व्रीहियवत्तुवादेन प्रोक्षणादिविधानं कुर्वन्संस्काराहं व्रीहिप्राप्तिमंतरेणानदयोगात्त
दाक्षेपे व्रीहिशास्त्रं प्रत्याक्षेपेव प्रवर्त्ततेन स्मिंश्च प्रतीक्ष्यमाणेनानतरीयकं तथा यवशास्त्रमपि प्रती
क्षितमेव भवति व्रीहियवशास्त्रप्रवृत्त्योः पौर्वापर्ये सर्वथैव हेतोरदर्शनात् प्रतीक्षितेव तस्मिन्नु

मपि व्रीहियवशास्त्रद्वयेनैकया प्रणाडिकयैकापूर्वसाधनतया युगपदुपस्थितं भवति ततो व्रीहिपदेन लक्ष
णया तादृशसाधनरूपत्वविशिष्टविधीयमानं प्रोक्षणादि यवसाधारणं भजेदिति नाश्चर्यं पूर्वाविगमेन साध
नारूपेणोद्देश्यतावच्छेदकीकृतानां प्रोक्षणादिभवनात् अस्तु उद्देश्यत्वप्रतीतेरवर्जनीयत्वात् एवं यदि
सोमफलचमसशास्त्रे युगपत्प्रवर्तेत न तु सोमशास्त्रप्रतीक्षमाणेरभिषवादिशास्त्रैः फलचमसशास्त्र
मपि प्रतीक्ष्यत तस्यापि धर्मसंबंधः क्रियेतेति नैवमस्ति धर्मविधीनां स्वगतसोमानुवादार्थेव फलचमसविधेः
स्वकार्यसोमापवादार्थसोमशास्त्रप्रतीक्षित्वेन धर्मविधीनां फलचमसविधेश्च तुल्यप्रवृत्तित्वात् किंच
यथा पर्णताविधिः स्वोद्देश्यजुह्वाः प्रकृताविव विकृतावपि प्राप्तिसत्त्वेन न वित्त्वं न त्वेन पर्णतां विधत्ते विकृ
तौ तस्या अतिदेशेन संभवत्प्राप्तिकत्वात् तथाभिषवादिविधिः स्वोद्देश्यतावच्छेदकीभूतापूर्वसाधनतायाः सोमफलचव

यो स्मत्कल्प्यश्राद्धिकत्वेन फलत्वमसांगत्वेन धर्मान्विधितो कार्यापत्त्यैव धर्माणां मन्त्रप्राप्तिसंभवात् न च यवेष्टापि न स्वा
प्तिसंभवस्तत्र्यश्रुतित्वं क्रत्वसधर्मकत्वेन क्रतुप्रसामकार्योद्देशेन फलत्वमसत्येव क्रतुप्रश्रीहिकार्योद्देशेन यवादिविधानात्
फलत्वमसोहि नाहन्त्यागसाधनत्वेन क्रतोः न मसोमभक्षं श्रेयश्च इति भक्षत्वेनैव श्रवणात् तत्र देवतन्यापूर्वीयद्रव्य
रूपसोमसंस्कारकस्य भक्षणस्यान्वयप्रलादृष्टरूपस्य फलत्वमपूर्वसंभवतीति भक्षणान्वयात् यागसाधनत्वसिद्धिर्वा सो
सोमस्य यागसाधनत्वे धर्मसंबंधे वा क्रतुप्रभक्षणान्वयस्यैव यागसाधनत्वसाधकत्वं संभवतीत्यपरपर्यन्ततद्भयपसि
ध्युत्तरमेव फलत्वमतः सोमसंस्कार्यविधेयः धर्माणां कार्यवप्तुक्रत्वा क्रतुप्रधर्मककार्यान्वयेनैव तथात्वेऽसक्रत
सोमधर्मत्वाभोपपत्तेर्नामिषवादिविधिः फलत्वमसेपि व्याडीयतेन वैयर्थ्यं च विधेः आग्नेयी हीत्यसधर्मक
कार्यसंबंध क्रतुप्रोक्षित्व हि तु रस्ति प्रश्ने यजिते निस्पृष्टयवसंबंध श्रवणात् यदि च त्वत्कल्पनेष्टापत्तिः कीदृश्यपा
वे श्रीहिसंनिरूढत्वमात्रेणाश्रीहिशास्त्रेण च पयौ कृतानपि नीवारान् प्रधानविधिरुपादापयेत् न तेनैष फल

फलचमसन्यायेन कार्यापत्त्या लब्धहन्त्यादिनियमनयानीवाराणां निराकांक्षतया नैव हन्त्यादिविधेर्नीवारसाधारण्यं
भवदुक्तं स्यात् ऊनत्र्व्रीहिकार्ये प्रधाने विधिविलक्षणसाधनतांसाधनतांश निषिध्यमानानां नीवाराणां कार्यान्वयमहिम्ना ध
र्मलभसुरेवेति किमित्यवघातादिविधौ व्रीहिपदस्य व्रीहित्वावच्छिन्नत्वयोग्यतासंबंधेनाप्रसिद्धनीवारादिसाधा
रणलक्षणाश्रयणं अस्तु वा हन्त्यादिविधौ न तदाश्रयणं लक्षणाविधौ तु न तद्वीजं हन्त्यादिनियमवलस्यैव लक्षणेन
वारापेक्षितत्वस्य वक्तुमशक्यत्वात् न च हन्त्यादिविधिप्राप्यपाठ एव तद्वीजं प्राप्यपाठस्य संदिग्धनिर्णायकत्वेन
नीवाराणां वैपरीत्यापादनाशंकेः यच्चाप्रसिद्धसंबंधेन यव फलचमसलक्षणया असंभवेन तयोर्धर्माभावाभिधा
नं तदप्यसत् स्तुसमूहशब्दानि निधनभावे मतोपवर्णहशत्वेन प्रतिनिधि वृध्वयागोह्यमाणयोरपि यवफलच
मसयोर्धर्माभावापत्तेः अथ नदवायवानामपि विलक्षणायै व्रीहित्वसामान्यपरिच्छेद्यत्वयोग्यतारूपः प्रसिद्ध

संबंधोऽस्त्येवेति वाच्यं तदा वैकल्पिकनैमित्तिकयोरपि तयोः संबंधः केन वार्यते कथं च प्रधानविधिनानीवारप्रा
प्तिः न हि व्रीहिशास्त्रस्य व्रीहिमात्रप्रापकत्वेन तत्संनिकृष्टद्रव्यग्रहणेन काचिच्छास्त्रार्थसिद्धिरस्ति यस्ये प्रधानवि
धिनीवाराने वाक्षिपेत् एकादशेषु परिहृतास्तोमानां प्राजापत्येष्वरंतीत्यत्र प्राकृतकालप्रत्यासत्तिलाभाय प्रश
स्त्रवतां स्तोमानामुपरिष्टात्प्राजापत्यचरावहरणे विधीयमान इति पूर्वपक्षं प्रदर्श्य न प्राकृतकालप्रत्यासत्तिमात्रे
ण चोदकानुग्रहो भवति येन वंस्पादनः सर्वस्तोमानामुपरिष्टात्स विधेय इति सिद्धांतितं यथा चाविहितका
लसंनिकर्षेण न विहितकालानुग्रहः तथा विहितद्रव्यसंनिकर्षेणापि न विहितद्रव्यानुग्रहः कथं भव
तापि व्रीहिशास्त्रान्नीवारप्राप्तिः कथ्यते कथं वा मन्त्राणामपि तस्यामुख्यत्वेन प्रतिनिधित्वेन वा ग्रहण
प्राणयवादे धर्मिग्राहकानामध्यवस्थानम्यते च प्रसिता वन्मंत्राणामिति न विधीनामपि प्रकरणपाठकृतवैर्थवै

ऽर्थवादाधिकरणे वार्त्तिककृतानडुपपादनात् ऽन्यथोपकारपदार्थस्य संभावेनाशास्त्रातिदेशोक्तेराकर
स्याशास्त्रोच्छेदापत्तेः न चैव सामर्थ्यान्मंत्राणां प्रयोगसमवेतस्मरणमिव विधीनां प्रधानविध्यपेक्षितांगज्ञानांगसमर्प
णमेव व्यापारत्वेनाध्यवसीयते समर्पणं च क्वचित्प्राप्तिः क्वचिन्नियमस्त्वपि न त एव हेतोर्लभ्यते एवं चानेन मंत्रेणेत
दर्थप्रकाशनद्वारेण कृतार्थोपकर्त्तव्यमिति शास्त्रार्थवत् व्रीहिभिर्यजेतेति विधिनापि कृतिः प्राप्तिनियमेन कृतोरु
पकर्त्तव्यमिति शास्त्रार्थोऽध्ययनविधिमूलक एव सर्वैरभ्युपेयः नियमश्चाग्नेययागत्वावच्छिन्नेहविः प्रकृतित्वेन
व्रीहय एवोपादेया इत्येवंरूपस्तदैतानेन विधिना सिध्यति यद्यत्रान्यव्रीहिपदे व्रीहित्वाकृत्यालोकदृष्टव्यक्तिलक्ष
णावेलायां स्वपरिच्छेद्यत्वयोग्यतासंबंधेन तदवयवा अपि लक्ष्यन्ते सति हि तेष्वपि प्रयोगापेक्षु व्रीहितंदुला एव न तु
षमेव वा लभ्यते न तु व्रीहयः न च तत्प्रयोगस्थानामाग्नेययागप्रयोगस्थानां यवप्रयोगस्थानामिव परिहृ
रतोऽपि नियमः अत्र किंचिद्धेतुमन्तं शास्त्रमस्ति अनंशत्वात्तु व्रीहिनियमासंभवाद्यवयवनियमसंभवात्तान्नियम

ननास्त्वपिस्त्वह्निविधेः प्रकारकत्वाय व्रीहिपदं लक्षणया व्रीहियवपरं कल्पयितुमुचितं प्रकरणावगतशेषिभा
वनां तासामनुरोधेन नियमात्मककार्यानुरोधेनाकृतलक्षणाकल्पनेसमर्थस्य गुणत्वव्यान्यकल्पनेति न्याय
स्य हि कृतलक्षणायां विषयाधिक्यकल्पकत्वेनाश्चर्यं आग्नेयादि प्रधानविधिरपि पुरोडाशद्रव्यकत्वेनाव
यवानेव साक्षादपेक्षते न त्रिधापरं जातिं यत्को व्यापेक्षेत न च साक्षान्नदपेक्षितत्वस्मारणेऽसंभवत्यन्यपेक्षावरवितः
अतो व्रीहित्वावच्छेदयोग्यवायव नियमपरं व्रीहिशास्त्रं न च वनन्मात्रपरमपि व्रीहितन्दुलनत्पिष्टात्मपव यत्र साभ
संभवस्तत्र प्रयोगेऽनन्यलभ्यव्रीहिनियमेनैव व्रीहिविधेः कृतत्वप्रकारित्वस्य वक्तुमुचितत्वात् आस्तवा तन्मा
त्रनियमपरं उभयथापि नियम्यावयवे श्रुतियम्यतावच्छेदकत्वेन व्रीहित्वादन्यत्किंचिद्रूपमवश्यमभ्युपेयं न
हि निरूढलक्षणया प्रतीयमानव्यक्तेरिव सांप्रतिकलक्षणया प्रतीयमानावयवानांशक्याकृत्यैवावच्छेद इति
शक्यं वक्तुं केनापि रूपेण तु भ्याकृत्यैव सांप्रतिकलक्षणया प्रतीयमानावयवानां शक्याकृत्यैवावच्छेद इति गुण

ष्कवलक्षणयोर्जातिमत्त्वो रूपस्यापि कार्यानिरूपणलक्षणायास्त्राद्वाबुध्यारोहानपेक्षत्वात् नह्यवयवानु
रूपं सकलव्रीह्यारंभकावयवेष्वनुवर्त्तनं पगाधवयवेभ्यो व्रीहित्वजातिगुणसंस्थानाद्यालकेकेषुचिन्नीवा
रावयवेषु संभवद्वृत्तिकमिति नियमतानवच्छेदकावच्छिन्नसकलावयवीलाभदशायां संभवति व्रीहि
शास्त्रस्य नीवारगतविकल्पनदवच्छिन्नावयवनियामकत्वं एवं च समनिरूपणे कन्यायेन व्रीहियवशास्त्र
बोधितमपूर्वसाधनत्वं स्वगतव्रीहिपदलक्षितमुद्दिश्य धर्मान्विदधद्विधिभिर्व्रीहिगतावयवा
नामिव नीवारगतावयवानामपि कथं च धर्माः प्राप्नुयुः नीवारगतावयवानामप्यवधानमेव व्रीहिशास्त्रं यदि
वयवगतविकल्पनतावयवानामुपादापयेत् तदा श्रुतिविनियोज्याः प्रोक्षणादयो लिंगाविनियोज्या
श्चव्रीहीणां मेधेति मंत्रादयो नीवारावयवेष्वपि वयवावयवेष्वपि भवेयुरेव यवशास्त्रादयोपि नेषु श्रुतिवि

त

नियोज्यानामसंभवलिंगकल्प्यश्रुतेः प्रोक्षणादिविधावपूर्वसाधनलक्षणाया एवानभ्युपगमात् साहि
प्रोक्षणादिशास्त्रेषु व्रीहिपदयुक्ताश्रुता न च वक्ता युक्ता कल्प्येति त्वा लक्षणांगीकरणमुचितं शक्यते चे
मंत्रप्रकाशितैरपूर्वं कुर्यादिति कल्प्यितश्रुतेर्व्रीहिशास्त्रे लैवैकवाक्यतया लिंगेन कल्पिताया विनैव ल
लक्षणाया मंत्रस्यापूर्वसंबंधलाभादवधानमनस्यैव अस्य लक्षणा न तथापि प्रयवशास्त्रोपादापितेषु
वेषु लिंगविनियोज्यानामसंभवः प्रधानत्रयवागन्नमपूर्वसाधनत्वं हि प्रकृतमपि विधिशुद्धदेशपन्नावच्छेदकत्वे
नाभिप्रेतं न न्यापकविधिविधेयत्वमेव न कर्मविधिश्रुतदेशपन्ने नियामकं यापकनया न्या विधाविषयत्व
मिव विधेयतया अनुमितिविषयत्वे मुख्य एव कुशलवनेलवनमंत्रविनियोगो न गौणे प्युलवास्यमंत्र
णलवनादाविति नात्राधिन्यायसहकृतेन समानप्रकरणस्थोपजीव्य व्रीहिशास्त्रमंत्रे न व्रीहिपदार्थैकत्वो

णोवनसहकृतेन तल्लिंगेनचव्रीहिशास्त्रविषयीकृतप्रयोगेष्ववृत्तिनियुज्यमानस्याव्रीहीणांमेधेतिर्मंत्रस्यक
ल्पितविधौव्रीहिशास्त्रबोधितमेवापूर्वसाधनत्वमुद्देश्यतावच्छेदकमितितद्विहितानांव्रीहीणांतत्प्रतिनिधि
भूतानानीवारयवादीनांमन्त्रमर्त्तृत्वेबोधितं नभवतिचयवशास्त्रप्रापितानांयवानांतत्प्रतिनिधिभूतानांवाव्री
हीणांमपि एतेनसोमप्रतिनिधिभूतेषुनैमित्तिकत्वेनोपात्तेषुन्यग्रोधस्तिभिन्यास्तुसोमधर्मालाभतद्विधिम्यः प्रा
प्राप्तीबोध्येतक्रन्याय्येनहिसोमस्यतत्प्रतिनिधेश्चसोमविधिज्ञापितमपूर्वसाधनत्वमुद्देश्यतावच्छेदकीकृत्य
धर्मविधयःप्रवर्तेतेन नैमित्तिकविधिबोधितं तस्मिंद्धस्तत्यामपूर्वसाधनत्वलक्षणापितनैमित्तिकप्रतिनिधौ
र्धर्मलाभात्तलाभव्यवस्थासंभवतीति यत्वान्वारंभणीयाविधावृत्तिप्रापादनं तदप्यसत् न्वारंभयोग्यतासंपा
दनद्वारेणदर्शपूर्णमासोभावयेदितितयोरेवमुख्योद्देश्यत्वांगीकारेणदर्शादिपदएवापूर्वसाधनलक्षणांगीकर
णात्तन्नवननयोरारंभनिरूपकत्वेनाप्यन्वयादावृत्त्यापत्तिः वाजपेयेनेष्ट्वाबृहस्पतिसवेनयजेतेत्यत्रोत्तरकाल

नाविशिष्टेन बृहस्पतिसवेन वाजपेयं भावयेदिति शेषित्वेनान्वितस्यापि वाजपेयस्याविशेषवाद्वयोत्तरकालता
निरूपकत्ववत्तयोरप्यारम्भनिरूपकत्वोपपत्तेः उत्तरकालतावदारम्भस्यापि संबन्धिकत्वेऽपि नान्यार्थोपस्थापितसं
बन्धिनमादाय पर्यवसानात् अन्यारम्भस्य दर्शपूर्णमासोऽत्र निष्टारत्वायोगेनापि तन्निरूपितत्वलाभाच्च पञ्चत्रिः
प्रथमामन्वाह त्रिरुत्तमामिति तदपि नापन्न एवं सामिधेन्योद्देशार्थाः प्रधानापूर्वलक्षणायां च प्रथमामुत्तमामिति प्रव
स्थितनिर्देशस्यानर्थक्यं प्रसज्यते अत एवानर्थक्यतदंगन्यायेन प्रथमोत्तमसंबन्धस्याप्यनियमापूर्वयोरेव प्रथ
मोत्तमशब्दाभ्यां लक्षणोद्भूमः नवप्रत्यूर्वं नियमादृष्टभेदाभावः इयमेव प्रथमेयमेव द्वितीयेत्यादिविभिन्ननि
यमानां हि निविविनियमसंबन्धभिन्नापूर्वजनकताया एवोचितत्वात् समुदायापूर्वभेदे भवदुक्तन्यायेन धर्म
भेदस्यैव तन्त्रे दे कल्पकत्वौचित्याच्च नातिनियमादृष्टस्य धर्मप्रयोजकत्वाभावः तस्मात्पुरुषार्थाः प्रागुप
पादनात् तदसत्वेऽपि निर्ज्ञातप्रकारतया धर्मग्राहित्वोपपत्तेः स्तत्कृगाकाधिकरणवार्त्तिकेन न्यायसुधायां

च्न्यायसङ्कोचकस्यादृष्टार्थप्रहरणार्थत्वप्रयुक्तानर्थक्यपरिहारायनियमादृष्टार्थत्वोपन्यासाच्च नचैवंश्रो
क्षणादिविधावपिसंनिकृष्टव्रीहिनियमादृष्टसाधनत्वस्यैवलक्षणस्यादितिशंक्यं व्रीहिशास्त्रजन्यादृष्टधी
विषयस्वर्गस्यप्रधानापूर्वसाधनत्वस्यैवासन्निबाधकेलक्षणोक्तिःस्यात् यद्येकस्तोत्रापूर्वसाधनत्वेनबृह
द्रथंतरयोर्धर्मसांकर्यंस्यादिति अत्रक्रमः आस्तांबृहद्रथंतरयोरेकस्तोत्रसाधनत्वं यद्यपितुनतदपूर्वसाध
नत्वमेवबृहद्रथंतरशब्दाभ्यांलक्ष्यते तथाप्यन्वारंभणीयायाःप्रारंभकालादर्शपूर्णमासार्थत्ववत्स्वस्वयमानसभि
व्याहारेणप्रस्तावास्पृष्टरथंतरभक्तिद्वारेवनिमीलनादीनांस्तोत्रापूर्वगर्भितत्वप्रतीतेर्न्नदृष्टतिप्रसक्तिः एवंबृ
हद्धर्माणांरथंतरेपि ननुरथंतरशब्दस्यापूर्वसाधनलक्षणायामासामदृश्यसाधारण्येप्रस्तावोपमुभयनिरूपित
एवधारस्यान् मैवं प्रथमबोधवेलायांरथंतरीयभक्तिविशेषस्यद्वारत्वेनिर्णीतेपश्चादानर्थक्यपरिहारायस

209

न्यापि रथंतरशब्दस्य लाक्षणिकत्वे बाधकाभावेन पूर्वविगतद्वारविशेषबाधायोगात् नैमिकानुरोधेन निमित्त
स्यैव द्वारविशेषानुरोधेन द्वारिशेषिलोपितत्वं कोव सिद्धत्वात् अन्यथा नित्यकाम्यविधिभेदेन नित्यकाम्या
पूर्वयोर्भेदावश्यंभावेनानारंभणीयविधौ दर्शपूर्णमासपदलक्षितहविर्विधापूर्वसाधननिरूपितारंभांगत्वे न वि
हितायास्तस्या नित्यापूर्वसाधनारंभविकीर्षायाऽनुष्ठितायाः काम्यापूर्वसाधनतदारंभविकीर्षायामावृत्तिः स्यात्
न च पूर्णमासारंभवेलायां दर्शपूर्वसाधनारंभवेलायां काम्यापूर्वसाधनारंभस्यविकीर्षया नियमे नास्ति येनोभ
योद्देशेन तंत्रेणानारंभणीयानुष्ठानं स्यात् अतस्तत्र दर्शपूर्णमासारंभत्वेन पश्चारंभस्य द्वारतोयनेन दैवका
म्यारंभापूर्वस्य पुनरनावृत्तिसिद्धनीतिनत्सिध्येदर्शपूर्णमासारंभत्वेनारंभस्य द्वारता सिद्धा द्विरवश्यं

रवश्यमपूर्वसाधनलक्षणातः पूर्वोपस्थितिरेवशरणीकरणीया तथाचतेनैवन्यायेनरर्थतत्रायप्रस्तावस्यद्वारंत्वा
न्नदृष्टमितिरथंतरधर्माणांप्रसक्तिः यद्वायथैवत्रिःप्रयमाभित्यादौव्यवस्थितनिर्देशानर्थक्यमपास्यधानापूर्वसा
धनलक्षणापरित्यज्यनियमापूर्वलक्षणांक्रीयते तथेहापितदंतरप्रस्तूयमानेदृष्टमितिप्रस्तूयमानइतिव्यवस्थि
तनिर्देशवलात् द्विभिन्ननियमापूर्वलक्षणयाधर्मव्यवस्थोपपादनीया यद्यपिवैकल्पिकव्रीहियवयोनियमा
पूर्वमेकमेवेत्याकरेपिकल्प्यनिरूपणस्यप्रसंगप्राप्ततासंगृहीतिसिद्धमेस्थापितं तथापिप्रकृतेव्यवस्थितधर्मवि
धन्यथानुपपत्याभिन्नमेवतत्कल्प्यते तस्मादपूर्वसाधनलक्षणानिर्दोषेतिहंतिविधौतदापादनेर्विरो
धीहिविधिनायवेषुहंतिनियमापादनात्तस्मिंश्च येवानामनुपपन्नत्वादुपात्तनियमप्रागतत्पाक्षिकत्वस्यनिय
नियमविधिलक्षणाघटकत्वेऽनुपात्तनियमफलकेव्रीहिविधावव्याप्तिरितिसिद्धं नचैवमनुपात्तनिय

नियम्यमेऽवपाक्षिकत्वं लक्षणघटकं स्यादिति शंक्यं हंति विधावप्याप्तेः नन्ववहननावदुपात्तविधेयगतपाक्षिकत्वविव
क्षा न वप्रथनविधावप्याप्तिः उपात्तविधेयप्रथनस्यैव नियम्यत्वसंभवात् तद्वीजं तस्यापि हस्तस्पर्शमेव प्रसरणसंभवे
न तदनुकूलव्यापारात्मनः पुनः कर्तृकप्रथनस्य नित्यप्राप्यभावात् उपपादितं वैतत् फलसाकर्यत्वं इतेनापि व्रीहिवि
धावप्याप्तिः तस्याप्युपात्तव्रीहिनियमपरत्वात् तथाहि श्रास्मिं व्रीहिभावे संस्कारवाक्यानां मंत्रवर्णस्य वा व्रीहिप्राप
णसामर्थ्ये श्रास्मिं तदभावे प्रोक्षणहं त्यादेर्यवसाधारण्याभावेः तथापि प्रत्यक्षश्रुतिविनियुक्ते यवावरुद्धे कर्मणि
कथमिव संस्कारवाक्यमंत्रवर्णाद्व्रीहिप्राप्तिः कल्प्यापि तु शक्यते न च यवानामपि साक्षाद्यागांगत्वात्तु पपत्या
जो च नेन पुरोडाशद्वारकयागांगत्वं कल्प्यमेवेति कथं तैः संस्कारवाक्यादिहेतुकव्रीहिप्राप्तिप्रतिबंधः कल्प्य
ता प्रतिबंध इति शंक्यं यं तऐंद्री विनियोजकश्रुतिलिंगयोर्लिंगश्रुतिकल्प्यकत्वेपि गेनेव श्रुत्याविनियोगा
सिद्धे कस्याश्चपि कल्पनाया अनपेक्षणाद्यथा श्रुतेः प्राबल्यं तथा संस्कारविधिवर्णाभ्यामिव यवश्रुत्या विनियोग

गसिद्धेन कापि कल्पनापेक्षत इति स्वीकार्यमवघातश्रुतेः प्राबल्यं नियोगोत्तरं समापतंतीति कल्पनान
विनियोजकस्य दौर्बल्यमावहति ऐंद्र्या इति श्रुतेर्गौणसामर्थ्यकल्पकत्वेन दौर्बल्यापत्तेः अतः प्रबलं च शास्त्र
प्रतिबद्धाभ्यां संस्कारविधिमंत्राभ्यां व्रीहिनियमशास्त्रे व्रीहिशास्त्रं स्वविषये सफलकमेव संभवतीति कथं हस्ता
दिनियमफलत्वेन वक्तुमुचितं किंच केनापि हेतुना कदाचिदपि प्रयोगविशेषे प्राप्तस्य प्रापणं कुर्वन्विधिर्नियमवि
धिर्नियमविधिरित्युच्यते यस्मिंश्च प्रयोगे सफलसंस्कारसहितप्रधानपर्याप्ता नीवारा भवेयुर्व्रीहयश्च प्र
धानमात्रपर्याप्ता भवेयुस्तत्र संस्कारविधिमंत्राभ्यां नैव व्रीह्युपादानं प्राप्नुयात् व्रीहिविध्यभावे हि नाभ्यां प्रा
प्नुवंतोपि व्रीहयः पुरोडाशार्थत्वेन प्राप्नुयुः तदर्थत्वेनैनापेक्षणात् ततश्च व्रीहीणां शेषकार्याणां च पु
रोडाशार्थत्वे तुल्ये सति बहूनां शेषकार्याणामनुरोधेनोक्तप्रयोगे नीवाराणामेवोपादानं प्राप्नुयात् सति
तु व्रीहिविधौ नेन यागांगत्वेन विहिता व्रीहयो यागप्रयुक्तार्थान्पुरोडाशद्वारेण यागांगं भवंति नैतावता पुरोडाश

स्यशेषाः एकहायन्यारुणत्वं अन्तः प्रधानांगस्येन व्रीहीणां कुम्भ्यादिसंस्कारेष्वोबलवत्त्वेन संस्कारानादत्वाद्व्री
हीणामेवयद्ग्रहणं प्राप्नोतिनस्त्रीह्यादिव्रीहीणामुक्तप्रयोगेष्वापणमनन्यलभ्यं व्रीहिविधेः फलं संभवतीति नविध्यंत
रविषयीभूतनहं नेर्यवेषु नियमनं व्रीहिविधेः फलत्वेन वक्तुमुचितं एवं सति कथं व्रीहिविधावव्याप्तिः वस्तुत
स्तु नियमः पाक्षिके सति वार्त्तिकोक्तलक्षणेऽनुपात्तमतिव्याप्त्याधवारकतया निष्फलमुपात्तादिपदं प्रक्षि
प्याप्याप्युपन्यासः केवलमुपहासा नियमार्थविधानव्याप्तेः सुसहशेषुद्वयोर्नरेषु सन्तु रवन्तसहशानां प्रता
कानां मत्यंताप्राप्तेः यद्यप्यपूर्वविधिलक्षणावसरोक्तन्यायेन पूर्तीन्द्रापाक्षिकत्वमुपपाद्येत न
तथापि हिरण्यगर्भः समवर्त्तताग्र इत्याघारमाघारयतीषेत्वेति चास्वाः छिनत्ति परि
धोपश्युंक्ति युजानोत्करे वाजिनमासादयतीति नियमविधिषव्याप्ति समानाना नाक

तत्र कार्ये विनियोगबलेनैव कल्प्यसामर्थ्यानामेतद्विधिविधेयानां विनियोगात्प्रागप्राप्तेः । अलक्ष्यायैवेन
इति चेत्सत्यं तु तथा तथापि येन नियम्यते सं नियम्यविधिरित्येतावतैव लक्षणेन निर्गृहीतस्य तिरोषवैयर्थ्यापत्तेः ।
अथैतद्द्व्याप्यविषयः पाक्षिकः स नियमविधिरित्युच्येत तथा सति तन्मुच्येत नेत्यादिषु वैकृतानि विधिघाति
व्याप्तेः तत्र रवेदिवशेन प्रकृताविव विकृतावप्यनिः पाक्षिकत्वावश्यंभावात् । अथ येन नियम्यते इत्येव लक्षणं
वार्त्तिकस्थाच पाक्षिकत्वोक्तिस्तत्तात्पर्यकैवेति चेत् किं तन्नियमनयद्विधिकर्तृकत्वेन व्यपदिश्यते अप्राप्तांश
पूरणमिति चेत् हंत सर्वेप्यःकामेष्योदर्शपूर्णमासो हि ह्यर्थंतरसामा [illegible]ः षडहस्य त्वात्तिव्याप्तेः । आद्यस्य
येतरफलांशपूरणार्थत्वाद्द्वितीयस्य तृतीयादिषु हृःस्तु वैरूपाद्यवरुद्धेषु प्राप्तांशपूरणार्थत्वात् । अथानिर्धारि
तेनाप्राप्तांशो विशेष्यते स्वर्गकामवाक्ये तु स्वर्गः प्राप्तः फलांतरमप्राप्तमिति निर्धारणान्नातिव्याप्तिः षडहवा
क्येपि षाडहिकयोर[illegible]र्हृह्यर्थंतरे प्राप्ते तृतीयादिषु प्राप्तेरनिर्धारणान्नातिव्याप्तिः हंतैवं केषुचिद्धि हि घुप्रा

प्तिः केषुचेन्निर्धारणाभावादुक्तविधौ लक्षणासंभवतीति चेत् एवमपि त्र्यश्वः शावो दक्षिणेत्यत्र विधौ प्राप्तत्वाद द
क्षिणाकार्ये विहितस्याश्वस्य सर्वर्त्विग्भ्यो देयतया प्राप्तस्येतरर्त्विग्भ्य आच्छिद्य ब्रह्मसंबंधं विदधाति स ब्रह्मणे देय इ
ति विधावव्याप्तिः प्रागस्माद्विधेः कश्चिदश्वांशो ब्रह्मणे देयः कश्चिन्नेति प्राप्त्यारनिर्द्धारणात् ननु षड्ढ्वाक्ये स ब्र
ह्मणे देय इति वाक्ये इष्टार्थत्वादोहुंवरतां विधिवन्नियमविधित्वमेवास्त्विति कथमतिव्याप्तिविषयत्वमिति चेतदि
तुल्यन्यायतया पूर्वोदाहृतानामाधारमवादिविधीनां नियमविधित्वमेवोचितमिति तेषु पक्षप्राप्तविषयत्वा
भावादव्याप्तिः नहि तत्तुदाहरणेषु विषयप्राप्तिकत्वं केनाप्युपपादयितुं शक्यं अतः कथं नियमविधिलक्षण
मिति चेन्न आह पक्ष इति पक्षे केचिदुद्देश्यसंपादनविषये यादृग्रूपे विधिपर्यवसानं तादृग्रूपं प्रशस्तार्थः अप्रा
प्तिः कर्त्तव्यतावगतीति अनाप्तिरकर्त्तव्यताप्रतीतिः विशिष्टमानानां तत्तन्निर्गतं साधनतारूपं दृष्टप्राप्तिप
र्यन्ति विधिः स्वपर्यवसानगोचरीभूततद्रूपविशिष्टविषयस्य कचिदुद्देश्ये किंचिदुद्देश्यसमये कर्त्तव्यत्वांगीकारेण

क्वचिदुद्देश्यसमये कर्त्तव्यत्वशंकायामज्ञानसाधनाऽऽक्षेपको नियमविधिरिति वाक्यार्थः उक्तविधपाक्षिकाक
कर्त्तव्यत्वशंकायां यत्कर्त्तृकस्याक्षेपस्यापतनेसंभवी नियमविधिरिति तु निष्कर्षः हंतिविधिनाऽहिंसैरपूर्वीय
वितुषीभावार्थत्वेन कर्त्तव्यत्वबोधजायत एव प्रेक्षावतामीदृशी शंका हंतिविधिनापि वितुषीभावसंभवे
क्वचित्प्रयोगेहंतेरकरणं किंन स्यादिति न च दृष्टेन नियमादृष्टहेतुनामेषस्याक्षिपनीति हंतिविधेर्नियमवि
धित्वमुपपन्नं यद्यपि स्वर्गकामोयजेतेत्यादिविधिनाऽऽपूर्वाक्षेपः क्रियते यद्यपि शाक्यत्वविषयेसंदेहात्पा
क्षिकर्त्तव्यत्वशंकापि संभवति तथापि न तस्याक्षेपतन इति न तत्रापि प्रसंगः यद्यपि वैत्वेतिछिन्नेत्री
त्यादौ विधौ दृष्टे पि विधेयमंत्रादेः स्वरूपेण समवेतार्थप्रकाशनादि दृष्टकार्यासमर्थत्वेन तादर्थ्यप्रती
तेर्न पाक्षिका कर्त्तव्यत्वशंकास्पदत्वं तथापि यादृग्रूपेण तत्रीत्यधाहारादिविशिष्टे विधेयेविधेयविधेः

भा०दी०
२१३

213

पर्यवसानं तादृग्रूपस्य तस्य तादर्थ्यप्रतीतेर्नो भवत्येव तादृशशंकास्पदत्वमिति तत्र लक्षणाप्रसंगशंकां वारयितुं मु
कार्थश्राद्धग्रहणानन्तरमेवमपि नियमादृष्टमनाक्षिपत्सु केषुचिन्नियमविधिषु तदाक्षेपप्रयुक्तस्य फललक्षणा स्या
न्नि: स्यादेव न तथा हि औदुंबरो यूपो भवतीति वैकृतेन विधिना नैव नियमापूर्वमनपेक्ष्यते खादिरता नियमेन
कृप्तनियमादृष्टं प्रति हेतुत्वाक्षेपानुपपत्तेः खादिरो यूपो भवतीति वैकृते विधिना तु न तत्साधनत्वमाक्षिप्य
ते कृप्तसाधनतोकस्य तस्यैव सर्वप्रयोगेषु फलोपधानमाक्षेपमात्रेणानुपपत्तेः तत्र हि द्विरात्रस्य ग्रहणेन
इत्यत्र नैव नियमादृष्टसंबंधाक्षेपोपि ग्रहणस्यैव कृत्स्नप्रयोगफलोपधानमित्याक्षेपमात्रेणानुपपत्तेः एवमिष्य
मनेवैकृते रथंतरं पृष्ठं भवतीति विधावपि तत्संबंधाक्षेपो भावो बोध्यः कृतो भार्यामुपेयादित्यस्यादृष्टसाम्यानु
मविघ्नतिहेतुत्वं नाक्षिप्यते ननरां नियमादृष्टं भवति प्रकरणस्याश्रुत्यावाय हेतुत्वाक्षेपपूर्वकं तत्परत्वस्य मात्रेणानुपपत्तेः

राम २१३

ब्राह्मणं प्रतिग्रह्यर्थं याजनादिनियमविधौ तु विधेयस्य न किंचित्प्रति पारार्थ्यमप्याक्षिप्यते उपायान्तरस्य प्रत्यवा
यहेतुत्वाक्षेपेण तदुपपत्तेः प्रतिग्रहसमर्थोपि प्रसंगं न त्ववर्जयेदिति शास्त्रावशेनाकरणस्य प्रत्यवायहेतुत्वा यो गा
त्र यत्नाकरे त्र पश्चात्तरमुक्तं रिक्थाद्यधिधनाभावेन वस्वरूपकन्नेग्रं धनार्जनं यदा भवति न दा भवति तदाक्रीयमाणो लप्रतिग्र
हो मुह पायेनितन्मोठि मात्रं वक्कु धनसंपन्नस्यानियमो पायैरर्जने प्रवृत्तस्य प्रत्यवायाभावापत्तेः व्यत्यये कर्मणां साम्यं
मित्यादिशास्त्रेण चना दृशार्जनस्य स्वस्तं न निमित्तजानिर्ह्री नत्वापादक प्रत्यवायहेतुत्वावगतेः एवं निषेधानां
विधादित्रैविध्यांगीकारेणानृतं वदेदित्यादिषु क्रत्वर्थपुरुषार्थनिषेधेषु नियमात्मकेषु नियमादृष्टाक्षेपवादि
रितलक्षणासंभवो दर्शयितव्यः क्रत्वर्थेषु स्यादिगोवर्जनस्य क्रत्वपूर्वहेतुत्वाक्षेपेण पुरुषार्थेषु च निषेधस्य
प्रत्यवायहेतुत्वाक्षेपेण तदुभयोपपत्तेः । अतो नियमादृष्टाक्षेपघटितलक्षणानुपपत्तिरिति चेन्सत्यं न तत्केलक्ष
णे नियमादृष्टप्रवेशोस्ति । आक्षेपसामान्यघटितस्यापि तस्य प्रसिद्धोदाहरणे दर्शितं दर्शयितुं परं तत्र संभवान्नियमाद

ष्टाक्षेपोऽसदात्मनः प्रवृत्तदाहृत न नियमोदाशहरणेष्वनुप्रवृत्तकारीत्येदाससिनावत्कश्चिदाक्षेपसंबोक्तविधपाक्षिक
कर्तृत्वशंकानिमित्तमेवेति संभवत्येव तेषु लक्षणानुगमः अनन्यत्वस्वादिशेयूपो भवतीत्यादिवैकृतविधिविधेयस्याला
दिरनादेर्निर्ज्ञातनियमार्थत्वस्साधनभावस्यापि प्रयाद्दश एवतत्संबंधः प्रागज्ञातस्याहरणक्षेपेण लक्षणं तत्रोपपादनी
यमिति स्वचनार्थोमूलेज्ञातार्थोविशङ्कः ननु यथैवान्वयव्यतिरेकसिद्धत्वादवेनुप्रात्वबोधो न हंति विधेः फलं तथा
हंति नियमोपि न तत्फलं हंतिप्रकाशनसमर्थस्यावरक्षोदिवः स्रुपल्लवध्मासमपि लिंगसर्वप्रकरणावगतं कर्त्रर्थत्वा
नुपपत्तिकल्पितविधिनैव तत्प्राप्तिसंभवात् नक्नादि हृ तृतीयेध्याये ग्रहणावेक्षणसमृज्ञरणप्रकाशकमंत्राणां प्रभ्वा
नुवाकसमाख्यासहकृतलिंगावगतस्य प्रक्षणो प्रयोगिग्रहणादिप्रकाशनार्थस्यानिर्वाह्यग्रहणादिनिय
मकल्पना यद्वा वारणो यज्ञावचरो वैकंकतो यज्ञावचर इति शास्त्रेण दर्शादियागसाधनत्वेनावगतोल्कूखलमु
सुसयोरनुपत्तिशिष्टद्रयां नरावरुद्धेष्वाग्नेयादिषु साक्षात्संभवत्साधनत्वयोकेन द्वारेण तन्निर्वाहइत्याकांक्षायां

पुरोडाशप्रकृतित्वाविहितव्रीहीणां वैतुष्योपायाकांक्षामालोचयतो हंतिमात्रसामर्थ्यं वालोचयतो नीत्तवत्येवं
बुद्धिः अन्नूखलमुसलाभ्यां हंतिद्वारेण क्रियानुपकुर्यादिति नवहंतेरनित्यत्वेन द्वारेण ताभ्यां नित्यवद्रुपकर्तुं शक्य
त इति तद्बलेनैवमवघातिर्हंतिनियमसिद्धिरिति न हंतिविधेर्नियमफलकत्वसंभवः किं तर्हि तत्प्रयोजनमिति चेन्न
रशनामंत्रविधिना गर्दभरशनाया इवामुनापि यव परिसंख्येव भवतु नवघातस्यापि नियमस्याभ्युदयशिरस्कं पुनर्वि
धानमेवोचितं -अनारभ्याधीतसादृश्यविधिवत्तन्न तु पारिसंख्याफलकत्वमिति शंकास्पदं रशनामंत्रविधेरपि
तथैवाभ्युदयशिरस्कपुनर्विध्यर्थत्वापत्तेः न चैवमपि हंतिस्वरूपस्य तन्नियमस्य वा यवेभ्यः परिसंख्यानेमक्रोडत्यत्र
किंतिपामकमित्यपि शंकास्पदं यत्कृतं ज्ञापितमालोच्य विधिः परिसंख्याविधित्वं प्रतिपद्यते तस्य स्वरूपकज्ञापक
त्पस्यादयं स्वरूपपरिसंख्याविधिः न चैवमपि लौकिकप्रमाणमवहंति स्वरूपज्ञापकं यदि तत्रान्यालोचनेनार्थ

यत

विधिः प्रवर्त्तेतेति तेनानियतप्राप्तस्य नियमपर एव स्यात् यतस्तु मंत्रलिंगकल्प्यविधिनानियमप्राप्तिमालोच्य प्रवर्त्तते अतए
व परिसंख्याफलो भवति ततश्च परिसंख्याफलत्वात्पादिकाप्राप्तिं कुर्वन्नाशङ्क्यते नियमप्राप्तिमालोच्य श्रूयमाणा परिसं
ख्या रशनामंत्रविधाविव बर्हिर्विधावपि नियमगोचरैव भवितुमर्हतीति स्यादेतत् नियमप्राप्तिमालोच्यैव परिसंख्यावि
धित्वं प्रतिपद्यते आलोच्यते चासौ स्वरूपप्राप्तिं तत्पूर्वभाविनीमपि तदानीं अन्यथा नियमस्यैव बुध्यमाने हेतुत्वे
चालोचने शङ्कोपात्तस्वरूपस्यैव परिसंख्यायुक्ता नाशङ्कोपात्तस्य नियमस्येति मैवं स्वरूपपरिसंख्यायां हि निवृत्तिर्नियमा
द्यर्थान्तरकल्पनेनापद्यते न तु नियमपरिसंख्यायां तु नियमातिदिष्टस्याकृतस्यैव गतत्वमिति लाघवात् स्वरूपपरिसंख्या
याभापद्यमानात्स्वरूपनियमो भयप्रापकमानबाधान्नियमापद्यमानस्य नियमप्रापकमानमात्रबाधस्योचितत्वाच्च अ
त एवाङ्गिरसां द्विरात्रे षोडशिपुत्तर इति वाक्ये रत्निकारमतेन परिसंख्याङ्गीकारपितन्त्रप्रोदकशाब्दवैकल्पिकषोड
शिस्वरूपपरिसंख्यामनङ्गीकृत्योत्तरेद्युर्द्विरात्रस्य गृह्यत इत्यनारभ्यवादप्राप्तनियमपरिसंख्यैवाङ्गीक्रियते ननु

हंतिविधेर्यवपरिसंख्यार्थत्वे प्रोक्षणविधेरपि तदर्थत्वमेव स्यात्तुल्यन्यायत्वात्तथा सति व्रीहिभिर्यजेतेत्यस्य वै
यर्थ्यापातः। इदं हि शास्त्रं न व्रीहिनियमपरं तस्यान्यलभ्यत्वात् किंतु प्रोक्षणहंतिशास्त्रगतव्रीहिपदयोः पूर्वसा
धनलक्षणापादनेन यवेषु प्रोक्षणहंत्योः शास्त्रस्य नियमफलं उपपादितं तावा पूर्वसाधनलक्षणाद्यस्मात् ॥ अ
तोन हंतिविधेः परिसंख्यार्थत्वं भवतु तद्धि समाख्यागोचरत्वापादनेन हंतावध्वर्युकर्तृकत्वप्रापणार्थत्वमस्येत्य
पि न शक्यं। मंत्रगतसमाख्ययाध्वर्युकर्तृकत्वेन निर्णीते हंतिमंत्रे ऽववेधास्य तु मपुरुषेणैव मंत्रोच्चारपि कर्तृ
त्वावगत्या तत्सामान्यात् तद्ध्यासमानकांडे हंतिविधेः पाठ्यान मध्ये हि मंत्रगते नाध्वर्युकर्तृकत्वस्य बाधः स्यादिति शंक्यं।
कातत्राम्नानस्य दुःखतासंपादनात्मकगुणविधानेन परिनार्थस्य मानांतरविधाने अप्रापकत्वादिति यदर्थ एव
हंतिविधिरिति निरवेद्य। व्रीहिविधेर्व्रीहिनियमपरस्यापि धागुपपादकत्वात्। अनीनैव नैव हंतिविधेर्नियमप
त्वेमित्याशयेनाह। किंत्विति समाधत्ते नियमइति। नमेव विहृणोति। स चेति। स्वयमाशयः। व्रीहीन वहंतीत्यस्य

नतावत्फलतः परिसंख्यार्थत्वसंभवति यवसाधारण्येन हंतिज्ञापकश्रुतिकल्पनामूलत्वमूतायाः अश्ववरक्ष इत्यादि
मंत्रस्य प्रयोगे नित्यवदाम्नानं यथैव नित्याकांक्षाया व्रीहिहंतिसंबंधबोधकश्रुतिदर्शनेप्यनुच्छेदात् । यदि स्वाभि
धानीयव्रीहयोपि संबंधबोधाद्यनुवर्त्तेरन् । नदेमामगृभ्णन्निति मंत्रीयं नित्यवदाम्नानके मर्थाकांक्षाया अश्वाभिधा
नासंबंधबोधकश्रुत्येवाववरक्षीय इति मंत्रीय नित्यवदानके मर्थाकांक्षाया व्रीहिसंबंधबोधकश्रुत्यामवेद्युच्छेदः
स्याद्यगर्दभाभिधान्याद्यवयवानामर्थान्निवृत्तिः नवैवमस्ति । अश्वपाक्षिकेपि व्रीहिहंतो प्रकाश्यत्वेन लब्धेमंत्रः कि
मर्थ इत्याकांक्षा निवृत्तेर्नित्यवदाम्नानस्यापि वचो घस्य पाक्षिकत्वेप्यकानुरोधेन पाक्षिकत्वस्योचितत्वात् संभवति य
वसाधारण्ये हंतिज्ञापकश्रुतिकल्पनोच्छेदेन फलतो परिसंख्येसु चेत । नहि संन्यायेपि हंतिविधावाक्षेपतः पक्षप्रा
प्तिर्हंतिप्रकाश्यत्वेन लब्धाः वरक्ष इति मंत्रस्योलूखलमुसलयोश्चके मर्थाकांक्षा प्रशमो न त्वेवं हंति नियमामवादार
त्वं नापेक्ष्यत इत्यत्र नियामकमस्ति । अभ्युदयेष्टिगतदधिपयसोः श्रुतानां धर्मज्ञापकन्यायेन कृतोपि द्रव्यमात्रा दुव

गत्वापूर्वसाकाङ्क्षभावस्य हारत्वोविज्ञ्यात् ॥ अयमंत्रस्यनित्यवदाम्नानान्यथानुपपत्त्यायवसाधारणेन हंतिप्रापकश्रुति
त्यनानामभ्युपेत्यहंतिविधौ शणहपरिसंख्येयेगौरवेन तत्रदोषत्रयापत्तिः । नुनोवरंअभ्युदयशिरस्कनियमांगाकरणमिति
प्रकारांतरणास्वेपपरिहारद्योतेनार्थवकाराभिन्नक्रमश्च । अनेनैवेति । आयमाशयः । यद्यपिमंत्रस्योल्लूखलमुसल
योर्व्यभिचारानुपपत्त्याहंतिनियमविधिरनुमीयते । तथापिश्रुतहंमिविधिनैवहंतिनियमः क्रीयतइतिशक्यतएववक्तुं
अनुमितविधिःश्रुतेनाद्भितत्वस्यात्रमानाभावात् । योमंत्रवचनादनुमितः सएवायमितिप्रत्यभिज्ञासंभवाच्च । कोहिधूमेसा
न्धूमेनपर्वतेवह्निमानुमीयते ततःपर्वतेस्वदृष्टधूमजननसमर्थवह्निप्रत्यक्षेणानुभवन्नेवमयानुमितःसएवा
यमितिप्रत्यभिजानीयात् । नन्वेवंमन्त्राधिकरणेनदर्थशास्त्रादिति पूर्वपक्षसूत्रावयवेन मंत्रलिंगप्राप्तविनियोगमात्रार्था
नांशास्त्राणांसिद्धांतिनंप्रतिप्रदानर्थक्यापादनंरूपनेयच्च सिद्धांतिनातेषांपरिसंख्याद्यर्थनयार्थत्वमुक्तं तदनुभयम
प्यनुपपन्नंमंत्रलिंगानुमितेः सहश्रुतानांभेदाभावेनाप्राप्तत्वाद्विनियोगपरत्वस्यैवसंभवादितिचेन्न ॥ लिंग

भा॰टी॰
२२०

217

घनुमेयानां लिंगादिविनियोज्यमंत्रादिगोचराणां श्रुतीनां नित्यानुमेयत्वेन प्रत्यक्षश्रुत्यभेदायोगात् । नहि अग्निरस्तो
रमेणाधूमेण वह्निमनुमाय ततः प्रवृत्ते तद्दिधक्षुर्न पश्यन्नपि कश्चित्स्वेक्षावान्प्रत्यक्षमभिजानीयात् ग्रामयानुमितः सएवाय
मिति ॥ न चैवमनवरक्षस्शनिमंत्रानुमेयाहंतिविधिरपिनित्यानुमेयत्वाच्छ्रुतादिन्न इति वाक्यं । लिंगादिविनियोज्यमंत्रादि
गोचिष्वननहत्याद्दिविषयाणां विधीनां कविदाम्नातानामेवमंत्राम्नानाघनुपपत्तिकल्प्यत्वस्य च कुत्रचिनत्वात् । ननुम
त्रसामर्थ्येनमंत्रविषयितत्वश्रुतिर्नित्यानुमेयैवानुमीयतेनच्छेषिविषाणीमुकविदाम्नातेवेत्यत्रनियामकमि
ति चेत् भ्रणु लिंगादिकल्प्यानां हि विनियोज्यमंत्रादिविषयाणां वश्रुतयो लाघवान्नित्यानुमेया एवस्वीक्रियंते । श्रा
म्नातानां हि स्वैरूपमत्वमनादिकालीनानेककर्तृकर्तृकाध्ययनविषयत्वेन कल्प्यमिति गौरवान्नित्यानुमेयानांनुसत्त
मात्रमिति लाघवं । अतिप्रकरणंवाम्नातविधिविहितांगेष्वाधिकसंख्यानां लिंगादिविनियोज्यानां विधायिकाः श्रुत
योऽनुपलभ्यमानाम्नातत्वेन संभावयितुमपि शक्यन्ते ईदृशावेदरूपस्यानमहिम्नेव च बलाबलाधिकरणादौ लिंगादि

२२०

मिनित्यानुमेयश्रुतिकल्पनयार्थमन्त्राधिकरणेन तदर्थशास्त्राणां परिसंख्यार्थत्ववर्णनं प्रसंगादुक्तं । यद्यप्युक्तरीत्या लिंगादि
विनियोज्यमन्त्रादिशेषिविषयश्रुतेरपि नित्यानुमेयत्वे लाघवं तु कल्प्यं । तथापीदृशश्रुतेरपि कल्प्यनद्रुविनं । तथा हि मंत्रगते
लिंगादिना प्रथमं मंत्रस्यैव विनियोजिकाश्रुतिरनुमीयते अनेन मंत्रेणेदं कुर्यादिति न तोमानानंतरानवगतविनियोगस्य
हंतेरुद्देश्यत्वानुपपत्त्याहंतिविधिः कल्प्यते । सर्वथा पदनित्यानुमेयस्यान्तैव मानानंतरंस्थात् स्वानपेक्षप्रमाजनमेकमेवहि
स्वप्रमान्मोनानंतरं । न तु नित्यानुमेयस्यानुमापकमनपेक्ष्यमानत्वमपि संभाव्यते । अतो हंतेर्मंत्रविनियोगस्य लिंगप्रमे
यत्ववत् हंतिनि नियोगस्य मंत्रविधिप्रमेयत्वमापद्येत हंतिविधेर्नित्यानुमेयत्वेन चैयद्विधिप्रमेयविनियोगर्थस्य
ततु न हि विधिविधेयभावनायामुद्देश्यत्वं संभवति । अतो यथोद्देश्यत्वानुपपत्त्याहंतिविधिः कल्प्यते नित्यानुमेयहं
तिविध्यनुमानेन तस्यास्तावदवस्थानं क्वचिदाम्नानस्यैव तस्यानुमानमनुचितं दृश्यते प्रतिप्रकरणं मंत्राद्याम्नानान्यथानु
पपत्तिमहिम्ना संभवत्साधिकविनियोगानां मंत्रादिशेषिणां विधयः ॥ तथा हि दर्शपूर्णमासयोस्तावद्वहषदुलवोरासा

दनान्यथानुपपन्नाः संवपति पिषाण्यूनि कुरुतादिभिर्मंत्रबलेन च संभवत्प्राप्तिके पिपेषणे विधिराम्नातः तंडुलान्पिनष्टी
ति। जैयंत्येवासंयौमीति मंत्रबलेन संभवत्प्राप्तिके च संवनेपि ष्टानि संयौमीति देवस्त्वा सविता श्रपयत्व विदहंतः श्रपय
न्तेति मंत्राभ्यां संभवत्प्राप्तिके श्रपणे कपालेष्वधिश्रयतीति। न चैषां यव परिसंख्यार्थत्वं संभवति। एषु श्रीह्यश्रवणान्न
नाप्यध्वर्युसंबंधश्चार्थत्वं संयौमीत्युत्तमपुरुषेण संयवने न तु स्वाध्यः पेषणश्रपणयोस्तु प्रैषावगतान्यकर्तृकत्वयोः
समाख्ययाऽध्वर्युकर्तृकत्वकल्पनायोगात्। प्रयोजककर्तृत्वं तु प्रैषमहिम्नैव सिद्धं॥ न च श्रपणविधेश्चरत्रेऽपि तंडुलेषु
वैहत्वं नियमनिवृत्तिफलत्वमपि श्रुतविधिन्यायेन मंत्रकल्प्यश्रपणविधिनापि न सिद्धं। तथा पशोः परिवीरसि युवा
सुवासाः परिवीत इति करणक्रियमाणानुवादिमंत्रबलेन संभवत्प्राप्तिके परिव्याणेऽध्रिगुप्रैषबलेन संभवत्प्रा
प्तिकयोः संज्ञपनविशसनयोः छागस्य वपाया इति मंत्रबलेन संभवत्प्राप्तिके पिपृच्छेकत्वे विधयोऽनन्यप्रयोजनाश्चा
म्नायंते। तथा सोमे पिग्वाने क्रीणामि सोमं ते क्रीणामीत्यूर्जस्वंतमिति मंत्राभ्यां संभवत्प्राप्तिके क्रये तुपमापागृहीतो
सोऽदग्धमुभ्यां त्वा जुष्टं रक्षामि। अथ पयाम। मित्रावरुणाभ्यां त्वा जुष्टं मीत्यादिमंत्रैः संभवत्प्राप्तिके पुरग्रहणेषु च विधयः

ऋयंते नवश्रनिष्ठकरणमाम्नातानामीदृशानेकविधीनां वैयर्थ्यशंकावर्जनं नवयज्ञेत्येकमभ्युदयशिरस्कप्राप्तिफलक-
त्वमपि युक्तं अनेकादृष्टकल्पनायोगात् प्राप्तस्याप्यभ्युदयशिरस्कविधिसंभवे वाविहितस्य विधानायोगेन कर्मान्तरकल्प-
नायाः काप्यनुदयापत्तेः ईदृशावेदप्रस्थानमहिम्नैव वाकरे तत्र तत्र संभवत्प्रयोजनानां तरणानामपि विधीनां मंत्रान्माम्नानान्य-
थानुपपत्तित्वमप्यविधिकार्थविधित्वमंगीकृत्य सिद्धान्तबलेन दृश्यते चतुरश्चतुरो मुष्टीन्निर्वपति। तत्र तावदग्नये जुष्टं
निर्वपामीति मंत्रेण संभवत्प्राप्तिकस्यापि निर्वापस्य विधिमंगीकृत्य चतुर्मुष्टिनिर्वापस्य पदार्थत्वात् नैवानुसमय इति
सिद्धान्तितं पर्वमे चतुःसंख्यामुष्टिपरिमाणयोश्च निर्वापांगत्वस्याप्यात्स प्रदृशाशारा वैचरौ प्रथमोपस्थितत्व चतुःसंख्यानु-
ग्रहः कार्य इत्युक्तेऽक्रं दशमे शक्यते चात्र मुष्ट्यनुवादे न चतुःसंख्याविधानं न हि मंत्रेण संभवत्प्राप्तिकस्य निर्वापस्य प्रा-
येण समभ्युद्धृता वैयर्थ्यशंका अभ्युदयशिरस्कत्वकल्पनापर्यन्तं व्याप्नोति न तु मुष्ट्यनुवादे न चतुःसंख्याविधिं वाक्य-
प्रयोजनत्वे स्वीकरोतीति संगच्छते एवं मंत्रानुमितनित्यानुमेयश्रुत्या निर्वापप्राप्त्यभ्युपगमे सिद्धान्तद्वयमप्यनुपपन्नं
स्यात् न वा प्राप्तमुष्ट्यनुवादासंभवे तु तत्पिशंकास्पदं पक्षप्राप्त्यनुवादेनापि गुणविधिसंभवात् सामान्यशास्त्रप्राप्तिन

दक्षिणहस्ताग्रेण परस्परसहितपंचांगुलिकर्तृकव्यापारप्रकाशकेनयच्छुंनांपंचेति मंत्रे निर्वापांनिर्वापांगतयावाधारितेनमु
ष्टेर्नित्यत्वाच्चिसंभवाच्च॥ तथाक्रमावगतो गामावामिवत्ते घृतपूर्णमास्यामिमावास्यायामिति वचोभ्यां यथावस्थापिताभिरत्तु
वाभ्याभिः संभवन्त्याग्निकयोरपि देवतयोरग्नीषोमावाज्यभागयोरजतीति वाक्ये विधिमंगीकृत्य दर्शमेसिद्धान्तितं। प्रथमाज्य
भागेन प्रधानदेवतासंस्कारको द्वितीयो पात्रवैरूप्यान्वयप्रसंगान्द इति शाकुने वात्रवकृतुं इनरेतरयुक्तयोर्देवतानां विधी
यत इति न हि तावच्छास्त्रविप्रयोजने संभवत्यभ्युदयशिरस्कत्वं च कृतुस्वितं न तत्र द्वयोरप्याज्यभागयोः संस्कारकर्मत्वं स्यादि
ति सिद्धान्तहानिः। एवमन्यत्राप्यूह्यं। अतएव शास्त्रसिद्धान्तवर्णनं कुर्वतामाचार्याणामेषएवाभिप्रायो लक्ष्यते यन्मंत्राम्ना
नान्यथानुपपत्त्या मंत्रशेषविधिविषयत्वेन कल्प्यमाना श्रुतिर्नित्यानुमेया किंतु क्वचिदाम्नातैव तथैव वेदप्रस्थानदर्श
नवितत्त्ववेदार्थनिर्णायकश्रुतैर्वेदप्रस्थानमनुसरत्स्वेवबैसार्थनिरूपणं कर्तुं। अतएव स्मृतिपादे वार्त्तिककारैः सर्वाचा
र्यप्रामाण्यप्रतिवाहार्थमाचाराः प्रमाणमिति पक्षे एवं श्रुतिः कल्प्येति पक्षे सप्रयादिति न्यायसुधायामुक्तं कतिपयाचारमूल
श्रुतिनामुपलंभोन्वेकाचारमूलमूलताने कश्रुतिकल्पनमिति वाभिप्रेतमिति। तथा विध्यन्तनाधिकरणे स्वपादिकश्लोकस्था

त्रीपाकादिविध्वंसनविध्वंसप्रायश्चित्तमाशंक्योक्तं । सत्यपि प्राप्तकर्मणामपि प्रत्यक्षप्रत्यक्षवेदविहितत्वे वैदिकत्वेनैव वैनामि-
त्तिककर्मनिरूपणोद्देशेन प्रवृत्तेस्त्रयी प्रवृत्तेरुद्देश्यानिरूपणत्वेन स्मृत्युद्देशत्वादृष्टादिविधानेऽपि वातिदेशइति । अतः सि-
द्धमेतन्मन्वाद्याम्नानाद्यनुपपत्त्याहं इति विध्यनुमानेऽपि नक्तं न विधेर्हि निनियमार्थत्वेनाधानं कविदाम्नानं विषयीकु-
र्वतानुमानेनास्येव विषयीकरणसंभवादिति । एतेनाकरणकारणनिमित्तप्रायश्चित्तविध्यो यथाक्रमं विधिनिषे-
धानुमापकत्वसंभवेऽपि संध्यावंदनादिविधिब्रह्महत्यादिनिषेधानां नैरर्थ्यनिरासो बोध्यः । यस्मिन्नेव हिनात्रायो धि-
करणे ग्रहणं वेत्त्रणसम्प्रज्ञरणमंत्रवर्ज्याज्ज्हदनादि कर्तव्यतानुमानमुक्तं । न त्रयदिलिंगादिभिर्मंत्रादिश्रु-
तयश्च प्रायश्चित्तविधिभिर्नित्यानुमेयाऽविधिनिषेधाश्चानुमापयेरन् । न तावन्नैरेव श्रुतिप्रत्यर्थाश्च विधिनिषेधाः सम-
स्त्याद्यर्थाऽएवं भवेयुः । न च तेषां कुशकाशावलंबनेनापि प्रयोजनान्तरं वक्तुं शक्यं । अतोत्रापि विधिनिषेधान प्रत्य-
क्षेमप्योभिन्नाः ॥ अनुमीयतइत्यंगीकृत्यैकार्थत्वमनुपपादनायमिति ॥ अथ परिसंख्यालक्षणेन त्रायत्रेति प्रदाम्भो

शेषिणौ विवक्षितौ ॥ उत न शेषोऽत्र शेषशेषिभावनिरूपकोऽपि तत्र उत निमित्तमुक्तौ । उत नाश्रयमूलौ । अथ विध्युपात्ता
नुपात्तौ । अथ ग्राह्यग्राहकत्वेनीयौ । नाद्यः । शेषत्वप्रायणीयासंनिष्ठत्वेन शेषशेषिभावपरिसंख्यायामव्याप्तेः । अनेकस्मिन्शेषप्राप्ति
मपेक्ष्य प्रवृत्तो विधिः परिसंख्येति हि लक्षणं तदाहरणप्राप्तिमपेक्ष्य प्रवृत्ते विधावेव संभवतीति न चोक्तविधिस्तादृशः । एकस्मिन्प्रा
यणीयारूपे शेषिण्यनेकशेषप्राप्तिमपेक्ष्यैव प्रवृत्तत्वात् न द्वितीयः तथैव दिशा सिद्धलक्षणस्य स्पष्टाभिधानाबाधत्वे दंडि
ड्डेषान्न्याहेति शेषत्वेनरपरिसंख्यायामव्याप्तेः । न तृतीयः । तथा सति हि शेषशेषिभावसंबंधेनानेकस्मिन्नेकप्राप्ति
मपेक्ष्य ह्ययं विधिः सार्थः स्यात् । अतः फलान्न वाञ्छित जीवनानां निमित्तत्वं परिसंबद्धेन शेषशेषिभावसंबंधेन । तथा ग्राह्य
एषाप्देर्ड्रवाग्रहाग्रहत्वं न द्व्याश्रयान्तरपरिसंख्यायामव्याप्तेः । अयं विधिर्हि श्रुत्या ग्रहणादिकाम्यगुणविधा
नग्रहाधाराग्रहणमाश्रयत्वेन प्राप्तिमपेक्ष्याधाराग्रहनिवृत्तिं करोतीति न शेषशेषिभावेन । न चतुर्थः पंचमो वा शेषांत
रशेषत्वेन परिसंख्यास्वव्याप्यापत्तेः । स्यात्त्वहि विध्वस्तथा सति सर्वोक्तोदाहरणानां संग्रहसंभवादिति चेन्न स्यात् तथापि

यद्दिरर्थं नरसामान्यसोमस्यादेर्दृद्वायवाग्रान्गृह्णानरइत्यादिनिपरिसंख्यायामव्याप्तिः अनेनाहिविधिनायास्तुरर्थं नरसा
मक्कास्तु एनाह ग्रीषु वा विकृतिषेदंद्वाग्नाथोथाव्याप्तिमपेक्ष्यारथं नरसामक विकृतिम्प्रसक्तस्यानिवृत्तिं कुर्वती परिसंख्यानु
मनुभवितुं तासां मध्ये नैन द्विधपात्रा कावित् दीक्षाः सोमस्य दक्षिणाः सोमस्येति परिसंख्याविध्योरप्यव्याप्तिः ज्योतिष्टो
मविकृतिषु नदंगाविकृतिषु वदीक्षादक्षिणास्पृष्टाप्तिमात्रा अप्रवृत्तविधिरंगविकृतिम्प्रसक्ता परिसंख्या कुर्यात्तासां
मध्ये काविदेन द्विध्युक्तौ अथोक्तेन परिसंख्यालक्षणवाक्ये गतान्यां नदन्याशाम्यां सर्वनामत्वेन निर्दिष्टत्वानि
र्दिष्टास्वभावान्यासामपि न निर्दिष्टत्वानि निर्दिष्टाः संभवति स्वनिर्देशाहस्याभ्याभिधानादेः सामान्यतो विशेषतो वा
प्यागनिर्देशात् किंतु यथासास्यैव नेतिस्त्रेसेनि सर्वनाम्नाथागनिर्दिष्टस्याप्यस्यादेर्विधिस्तेन नद्धिनानुकृति
शब्दार्थत्वेन बुद्धिस्थस्यतनन्तद्धितांतशब्दनिष्ठात्रिकालेप्रत्येकरूपेणापरामर्शः तथा निरूपणीयपरिसंख्या
लक्षणघटकव्याप्तिविषयतावच्छेदकीभूतन्ग्राह्यत्वव्यावर्त्तनीयाभ्यां बुद्धिस्थानामश्चाभिधानादानां गर्दभा

भिधान्यां च तन्त्रं तु दाहरणेपरिसंख्यात्वोपपादनकाले प्रत्येकरूपेण नाम्नां परामर्शः। ननश्च शाखाध्येयावर्त्तनीयेष्वाग्निम-
पक्षपवहन्नेत्वं परिसंख्यालक्षणं भवेदिति सप्तमपक्षोयुक्तः इति चेन्न न एवमपि श्वत्रहिवावपतीति परिसंख्यासामर्थ्यात्ः
न्नेनहि विधिनापवमानगतगायत्र्यादिभ्योऽन्यत्रावापपरिसंख्याक्रियते। एतद्विध्येसावेवन्याघस्तूक्रगायत्र्यादिषा
वापो नैव प्राप्नुयात्। किन्तु नहि न्नस्तोत्रीयस्वैव प्राप्नुयात्। तथाहि। अन्यस्तुतावत्साम्नामेवावापप्राप्तिर्वक्तव्या न वा क्रियो
पत्वात्। विवृद्धस्तोमे कन्नानुष्टुब्सामकगानपानेनैवस्तोमविवृद्धेः सामंजस्यात्तासामावापैरेव न प्रसक्तिः न तत्र गा-
गायत्र्यादिषु पेषध्यप्राकृतसाम्नां प्रकरणादंगत्वमवगतं तत्रापि तदीयानां योन्यत्र तद्ब्रकरणादंगत्वेवगते नैव
प्राकृतर्कानेषां साम्नामावापप्रसक्तिर्न तेरां गायत्र्यादिषु। यत्र त्वेगाम्नातानां त्वप्राकृतसाम्नां योन्यत्र वेनात्वरा-
ग्रंथगतप्रकरणणाक्रांत्वेनत्वेनावगताः तत्रातिदेशावगतांगभावास्तु प्राकृतर्क्ष्वप्राकृतसामप्रसक्तावपि
नगायत्र्यादिषु तत्प्रसक्तिः। अर्थं नेतु वाद्वायणइति न्यायेन माध्यंदिनाभवि पवमानान्तत्त्वयोरेवत्रैष्टुभजागत

योऽस्तत्प्रसक्तेः अत्र केचिदावपंतीति विधिनानुगाय अग्न्यादिभ्यो न्यत्र वा परिसंख्यायां कृतायां लिंगाद्यवगतस्तोत्रांगभा
वनिर्वाहाय यावश्यकर्तव्यस्यापरस्य परिशेषादेव गायत्र्यादिषु प्राप्तिरिति शास्त्रव्यापारस्य नायसाधारणीभावात् प्रसक्ति
मपेक्ष्य प्रवृत्तत्वाभावादुक्तविधाव्याप्तिः ननूक्तलक्षणेषु केषु चेन्निसंगच्छंते तथाहि शब्दं नाशयन्तीयासन्तिष्ठन
न्यत्र नावत्कीदृशी परिसंख्या भवतो भिप्रेता यस्यां प्रथमलक्षणाव्याप्तिरूपन्यस्ता न नावत्त्रदंतांगरीतिविधिर्मगीत
स्मृत्यहमेधायाज्ञमाज्ञविधिवत्फलतः परिसंख्या दशमिकाधिकरणविरोधात् न त्र्यहिनैनद्विधानानंदंतांगरीति
विधीयते वाक्यीयविधेरव्याख्यातात् किंतु शंयुवाकानंतरकालीनः संपूर्वकतिष्ठत्यर्थो विधीयत इति सिद्धांतिन
अत एव न शाब्दपरिसंख्यापि वाक्यीयविध्यपेक्षया दोषत्रयांगीकारस्योक्तत्वात् न वसंपूर्वकतिष्ठतिरेव
गांतरत्यागवाचीति श्रोत्रवैधा परिसंख्याऽत्र केचिदावपंतीतिवदित्यपि शंक्यं उदवसायसंस्थाप्येतान योक्त्यार्थत्वे
दृष्टश्रामननीयवद्वैमृष्टस्यापत्तेः संस्थिते संस्थिते हनीत्यादौ पञ्चकामतन्त्रयोगश्लोपादिभ्यो दोषवचोम्

लकेत्रक्यार्थसंस्थो ज्योतिष्टोम इत्यादिव्यवहारेव संस्थेर्वकतिष्ठेते: समाप्तिवाचित्वेन प्रसिद्धत्वाच्च। समभिव्याहृतपरमापूर्वोत्प
त्त्यैवावत्स्वेतरागप्रतीक्षस्य पयर्थात्मिकावारंभ वत्संकल्पविशेषात्मकावेत्तन्यदेतनस्य थापि नाबदत्वेनाप्राप्ताः शंप्रुवाके मा
लीन समाप्तेर्विधिरपूर्वविधिरेव वक्तुमुचितो न परिसंख्या इति विधोद्दलनादि निवृत्तेरिव हामात्तु गान्तरनिवृत्तेरान्त
र्गिकत्वादतः कथमत्राप्राप्तिः। यावदृशनादर्शविधौ: शेषांतरपरिसंख्योक्तिः सापप्पुक्तोयथैवादिव्यपूर्वविधिनि
यमविधिम्पां कथोरप्पुद्देश्यविधेययोः संबंधं बोधयन्नामपि विधेयप्राप्तिनियमात्वेव फलत्वेन स्वीक्रियते उपपादितं
चैनन्नथापरिसंख्याविधिनाउद्देश्यविधेययोः संबंधनिवृत्त्यनापि विधेयविवृत्तिरेव फलत्वेन स्वीकर्तुमुचितेति गर्द
भाभिधान्यादेर्मंत्रादिविधिरेव विधिफलत्वेन वक्तुमुचितो। न च द्वितीयलक्षणात्पाद्भिरपि। एकस्मिन्नार्दभाभिधान्याद
ने शेषणि मंत्रस्यावमनादेश्चानेकशेषस्यप्राप्तिसत्वेन यथाक्रमं तल्लक्षणासंभवात्। यावसायंजुहोतिवाग्वाएषाति
विध्योरप्राप्तिः। सापिनकाम्यास्तिहोत्रनियमार्थत्वेन संभवतो विधेः परिसंख्यार्थत्वायोगात्। इतिविधिनादल्ला
दिनिवृत्तेरिव निमित्तांतरनिवृत्तेरमुनानुषंगिकत्वेन संभवात्। अत्र एव्वाधारया गत्कृतीति विधि नैव सन्निहितेनात्र

नाकाम्यविधिष्वाराग्रहयोराश्रयत्वमित्रिसंभवेनवाग्वेन्याद्देरपिपरिसंख्यार्थत्वसंभवात् यथा च नैवानयोः परि
संख्यात्वं न योपपादितं फलसांकर्यस्वेष्टनेनापि यद्रथंतरसामासामः स्यादिति दीक्षाः सोमस्येति विध्योरव्याप्तिः
प्रकृतावेवसंभवन्प्रयोजनयोस्तयोर्विकृतिपरिसंख्यार्थत्वकल्पनायोगात् विकृतिपरिसंख्यायाश्चानुषंगिक
त्वसंभवात् तथाहि क्वचिद्वसंते देवाद्बृहद्रथंतरात्भिन्नर्त्विगन्नाभेस्तोत्रविधाविशिष्यते किं वितत्सामकष्टवित्रिशि
ष्टत्रिवृज्ज्योतिष्टोमप्रयोगं यदि कश्चित्कुर्यात्तस्मात्प्रयोगात्पाठप्राप्ताया ऐन्द्रवायववायव्याग्रतायाः परिसंख्यार्थं यदि
रथंतरेत्यादि विधिर्नैमित्तिकतां बोधयति अस्मिंश्च न प्रयोगगतज्योतिष्टोमप्रकृताविव विध्युपात्तायां रथंतरसा
मकत्वचक्रावपि पाठादैन्द्रवायवाग्रताप्राप्तिरिति कथमव्याप्तिः तथा दीक्षादक्षिणस्यांगप्रधानार्थत्वे कस्य चि
दारादुपकारिणः सोमांगस्य दीक्षाकाले कर्तव्यस्य देवादवभृथपर्यंते विस्मरणस्यावभृथोत्तरमनुष्ठानायाश्रा
वैष्णवेष्ट्यादि विधिना दीक्षासंपादनीयास्यात् श्चोपवसथ्ये वाहनि देवादप्रगानानां सोमर्त्विजां स्तुत्यारंभ

समयेसाग्निध्यावश्यंभाविना निर्णये सति देशस्य प्रयोज्यानां स्वतन्त्रर्त्विजामानन्तैर्द्वादशशतं देयं स्यात्। न तूभयनिर्दे
शे दीक्षादक्षिणस्योर्गार्थत्वनिवृत्तिः क्रीयते दीक्षाः सोमस्य दक्षिणाः सोमस्येति उपपादितं वैतन्फलसो कर्यत्वेऽने
न त्रसित्वसोमांगेषु द्रसोमाख्येविद्युपात्रेपि केषुचिन्नत्वाविरिति कथमप्याप्तिः॥ नाप्यत्रदेवावयं पत्राव्याप्तिः॥
यथा विश्वजिद्गुणगतीवं दक्षयोस्तुत्यैश्रिसाम्नोर्माध्यंदिनार्भवपवमानगतछंदो न्यतरमित्रं दक्षयोस्तु त्यत्र साम्नोः
ते तु गादरूपगाः इति स्यायेनान्यत्वयोरेवव्याप्तिः तथापि गायत्रीबृहत्यनुष्टुप्दक्षयोस्तु त्यत्र साम्नोवैरूपनानो
क विस्त्राऊतस्त्वंबापेक्षाक्षेःस्तत्वयोर्न व्याप्तिः। यथाम्नात साम्नोपथाप्राप्तस्तोत्रसाधनभावस्य शाखावगतस्यान्या
यवशेनान्यथात्वकल्पनायाश्चानौचित्यात्॥ यो निमित्तं दर्शं व संशयविशेषवशेन तदन्यथाभावस्यावश्यंभावात्
संतिवद्द्वादशाहांतर्गतदशरात्रस्य दशमेऽहनि ताहृशसाम्नां विधयः॥ आग्निर्गमवत्याभार्किमवत्युत्से धोमवति श
त्से धेनवे देवाः पशूनिदत्सेधनिषेधेन वर्यगरहन्नंतरोत्सेधनिषेधौ पज्ञायज्ञिय मिति। तत्राग्निगस्यत्वाद्दष्टये ति
गायत्रीयोनिः। आभीकस्योबानेआनमितिमायत्र्येव उत्सेधनिषेधयोस्तु बृहतीयोनिः पवस्वदेववीतयर

नि नचैषांपौनरुक्त्यशंकागोचरत्वग्रंथे ऽस्याङ्गः प्रकरणे पठिताः ॥ अत एवोहग्रंथे आजिगाभीकयोः प्राकृतगायत्र
त्रचे उत्सेधनिषेधयोश्च प्राकृतत्वादेतत्त्वं एवोहे दर्शितः ॥ न चैवं साम्नामाम्नामसंतप्यपि प्रबुवस्याप्येकस्मिं द्वचे नैत्रेष्टभजा
गनत्त्वयोः प्राप्तिः संभावयितुं शक्यते ॥ अथोच्यते न संशयविरहे शंगीकारे पि साम्नः स्तोत्रसाधनत्वायोनान्यंतेशत्त्वाबा
धः ॥ अंत्यत्त्वयोर्निवेशाभावे तु न त्र्यापकत्वापस्यात्यं न बाधः स्यात् नचैषद्बाधेनोपपत्त्या चत्वं न बाधः स्वीकर्तुमुचि
तः ॥ अतः संशयस्यापि संशयविलेशप्रसंगोऽत्यत्त्वयोरेषां तु साम्नां निवेशः स्यादिति तेन न स्यायवशेन शास्त्रगोच
रे बाधस्याप्यन्याय्यत्वात् ॥ अत एव पंचमे प्राकृलोकंपृणायास्तस्यासंपूरणादित्यधिकरणे लोकंपृणाच्छिद्रं
णेति मंत्रानुमेयस्यापि वित्यंतरे सावकाशस्यापि लोकंपृणेष्टकापूरणार्थत्वविधेरनुरोधेनानेनुवादस्य प्रणस्ति
न्याय्यं बाधित्वोयोनुवाक्यकांडपठितस्त्रत्यस्य प्राप्तलत्विविहितानां चित्रिण्यादीनां मध्यमायां चितौ प्राग्लोकंपृणा
याः निवेश उक्तः ॥ ननु मध्यमचितिमात्रे लोकंपृणोनेताः पापयतोन्यायस्यानुरोधेन पूरणार्थत्वविधिं चित्यंतरे
विषयं स्वीकृत्य लोकंपृणां तेन न निवेशः स्वीकृतः ॥ अतो ग्राह्यपवमानगतगात्र्यादिषु पास्ये कृदाविदावापप्राप्ति

रित्यनारभ्याधीयते। न्यायस्तु वा यपंनीतिविधिनोक्तगायत्र्यादिषु स्तोत्रांतरीयत्वं वा व्यपदेशान्निमात्रमालोच्य संभवन्ने
वस्तोत्रांतरीकपरिसंख्या रथादिमन्त्रणापरिसंख्यावत्। एवं च सकलोक्तदोषपरिहारेपि षष्ठलक्षणेषु संभावितो दू
हरणांतराख्यापकत्वमिथयायदिसन्नमभेवांक्रीयते अंगीक्रियतां ननु तत्रापि कश्चिद्दोषः इति चेत्। नैवं ग्राह्यत्वावर्त्ते
नीयेत्वाप्राप्नोति ग्रहत्वमात्रं लक्षणं विवक्षितं तु न था ग्रहविशेषणत्वेन नित्यत्वमपि लक्षणे निवेश्यते। अथवा
समुच्चितत्वं न द्विशेषणत्वेन ततो निवेश्यते। नाद्यः। ग्राह्यर्देन यावित्रं दलनादेश्च प्राप्नोमपेक्ष्य ग्रहत्वे न हंतिविधावति
व्याप्तिः। न द्वितीयः। पंचपंचनखा भक्ष्या इत्यत्राव्याप्तेः। शशादीनां श्वादीनां भक्षणे नित्यप्राप्त्यभावात्। तत्रीयेतु
यद्यपि नोक्तदोषाः हंतिविधौ ग्राह्यत्वावर्त्तनीययोः परस्परविरोधेन समुच्चित्य प्राप्त्यभावात्। शशादिश्वादिभक्ष
णयोश्च समुच्चित्य प्राप्तिसंभवात्। तथापि षड्हा भवंति चत्वारो भवंति शतोक्थ्यां भवति सर्वस्त्रिवृदिति विधिष्वति
व्याप्तिः। केषुचिदहःसु षड्हविधानं तः परेषु छंदोमविधानं द्वयेः समुच्चित्य प्राप्त्याछंदोमविधानं तद्विषयेपि प्राड्हा
यिकविधानं प्रावर्तोमाघवाक्यद्वयेन क्रीयते। शतसंख्याहर्गणेषु निदशकमाघोत्रमांक्षारंतिष्ठोमसस्थाम

यावत्त्रिवृत्स्तुतत्वम् अथ संस्थेत्येवं संस्थाद्वये समुच्चितप्राप्तेऽग्निष्टोमत्वविषये पूर्वसंस्थाप्रापणं मध्यमेन क्रियते ॥ अग्नि
हृदाद्येकाहे बहिष्पवमाने त्रिवृत्स्तोमः स्तोत्रान्तरेषु तु स्तोमान्तराणीत्येवमनेकस्तोमेषु समुच्चित्य प्राप्तेषु स्तोमां
तरविषयेऽपि त्रिवृत्स्तोमप्रापणमन्त्येन क्रियते । अतोऽप्राप्तप्रापकेष्वविलक्षणगमनादिति प्राप्तिः ॥ न चैवं विकल्प
वत्समुच्चयस्याप्यवान्तरकार्यैक्य एव वक्तुमुचितत्वात् सकृत्तोदाहरणेषु ग्रहभेदेन स्तोत्रभेदेनावान्तरकार्यभेदा
त् ॥ कथं समुच्चित्य प्राप्तिर्भवेदिति तु आकाशे तपशंक्यं ॥ अवान्तरकार्यभेदेऽपि अवान्तरकार्यैक्यमात्रेण समुच्चयोपपत्ते
रवश्यवक्तव्यत्वात् ॥ अन्यथाऽपि भागगवश्याजादीनामवान्तरकार्यभेदेनाप्यभागोपयजतां निगदहमेधाद्यस्य परि
संख्याविधावप्याप्तेः ॥ एवमनेकशेषाणां समुच्चित्य प्राप्तानित्याप्तिर्दर्शिता । अस्ति चानेकशोभितानामपि ताद
शप्राप्ताप्तिव्याप्तिः ॥ यथा सत्रलक्षणे दशमः सर्वत्र लक्षणे परिहरतीति इति ॥ स्यादा वाश्वसोमपवमसहविःशेषु ब्रल
नदिनवर्लिंजां समुच्चित्य प्राप्तानां समन्याम् लिंगान्तरविषयस्यापि त्र लसंबंधप्रापणार्थत्वाद्दोषां । एवमप्राप्तप्रा

प्रज्ञापकेषु नित्याग्निदर्शिनामप्रसक्तिपक्षप्राप्तविषयेष्वपि स्याद्यथा पत्नीसंयाजान्तान्यपहायानि संतिष्ठन्त इति ॥ वक्तुर्बुद्ध्यां
गृहीत्वानिषेधात् जेष्ठमदिति च ॥ आद्यविध्यभावे पत्नीसंयाजानामनन्तु परितनानां च कदाचित्समुच्चित्य प्राप्तिप्रस
क्तात् द्वितीयविध्यभावे प्रयाजानामितरेषां च जौहवाक्ये कदाचित्तत्प्राप्तत्वात् । अथ निवृत्तिफलकत्वमुक्तलक्षणा
धिकं योऽस्यते । अनन्तक विधिषु केषांचित्प्राप्तिफलकत्वा परेषां नियमफलकत्वान्नातिव्याप्तिः ॥ प्राप्त्यभाव
त्वयोश्चैकस्यैकजातीयेन संबंधेन प्राप्तत्वं विवक्षणीयं तथा सति शक्तितो न जुहोतीत्यत्र सत्यपि निवृत्तिफल
त्वे सत्याम अग्निहोत्रहोमस्य क्रत्वर्थहोमैः सहैकसोमप्रयोगान्तर्भावप्राप्तेर्नातिव्याप्तिरिति तन्नक्षारणार्थत्वान्नि
शेषवैयर्थ्यं । यद्यप्येवमपि न हिंस्यात्सर्वा भूतानीत्यादौ नातिव्याप्तिर्निवारणार्थहिंसादेः पुरुषार्थभोजनादि
भिः सह समुच्चित्य प्राप्तेरसत्त्वो हिंसादिनिवृत्त्यर्थत्वात् तथापि निवृत्तावत्त्वं ताज्ञाप्तेति विशेषणान्नान्वि
रत्निर्घटते हि रागतो हिंसायाश्च हिंसानिवृत्तेरपि पक्षे प्राप्तेः । न नौ पृष्ठी करोति नातिरात्रे षोडशिनं गृह्णाति

नीत्यादेस्तन्निवारणासंभवान्नन्वस्यां न भावि एवस्त्रीक्रियमाण इति चेन्न । एवमपि पुरुषार्थसंख्यावंदनादिभिः
सहाग्निहोत्रस्य समुच्चित्य प्राप्तिसंभवेन दीक्षितेन न जुहोतीत्यत्रापि तत्प्राप्तिनादवस्थानात् । संभवत्कादाचित्कप्राप्ति
कास्त्वादिमक्षणानि वृत्तिं कुर्वन्निविधावव्याप्तेश्च । अथ निवृत्तिफलकत्वमेव लक्षणं न तदुपलक्षणार्थं तत्र वाम
नवेतियान्निकं निषेधानुसर्वैव परिसंख्या एवेति न तेषु तत्प्राप्तिरिति चेन्न ॥ अग्निहोत्राद्यधिकरणनिवृत्तिफ
केऽग्निहोत्रं जुहोतीत्यादिविधावतिव्याप्तेः ॥ न च तत्र वान्यत्र प्राप्त इति क्रतोरंगो नोपि तत्परिहारः । गामगम
नाधिकरणेन सहाग्निहोत्राधिकरणस्य समुच्चित्य प्राप्तिसंभवात् ॥ अथाभावैकस्वभावनिवृत्तिफलत्वं विवक्ष्यते
तथा सति निषेधमुखप्रवृत्तपरिसंख्याविधावव्याप्तिः । तस्याभावरूपनिवृत्तिफलकत्वादिति परिसंख्यालक्षणमा
युक्तमिति ॥ ननु तत्र चान्यत्रेति शब्दाभ्यां ग्राह्यव्यावर्त्यं अभिधीयते इति तावदुक्तं प्राक् । ततश्च ग्राह्यस्य भावत्वेपि
प्राप्ते सति प्रवृत्त इति लक्षणं यस्मिन्विधौ नेयं न द्विधिनिरूपितमेव ग्राह्यत्वं व्यावर्त्यत्वमत्र प्रतीयते ऽभिन्नवेद

शमेवमस्तूदयोक्तिव्याख्यानं ॥ तत्र भास्यपदेन लक्ष्यमाणत्वं तत्राकांक्षाज्ञाप्यो यथाऽनन्तवाक्यार्थ एवोक्ते ॥ यावत्तत्पदेनव
नत्वलक्षणफलशास्त्रमनन्तनिवृत्तिप्रतियोग्यमिधीयते । एवं चस्य फलीभूतनिवृत्तिप्रतियोगिनि स्ववाक्यार्थे च प्राप्तेसति
प्रवृत्तशास्त्रं परिसंख्येति सिद्धेन्तः ततो न तावद पूर्वविधिषु नियमविधिषु वातिप्रसंगः ॥ तेषु स्वफलीभूतनिवृत्त्यप्रस
क्तेः ॥ अतश्च न तन्निवारणाय ऽनाधिकस्य निवृत्तिफलकत्वं ॥ एतेन द्विक्षा प्रयुक्तं ऽनन्वेष्यर्थापादनं दूरापास्तं ॥ ना
प्यपूर्वनिषेधेषु नियमनिषेधेष्वग्निहोत्रादिविधौ वातिप्रसंगः ॥ तत्र वाक्यार्थस्य तत्र द्विष्टानिष्टसाधनत्वात्मनः
श्री प्राप्तभावात् ॥ अस्ति च परिसंख्योदाहरणे ग्राह्यस्याभ्याभिधानीसंबंधादेनिवर्त्यस्य परशन्नांतरसंबंधादेः प्राप्तिरि
तिनाप्रसंगदोषोपि ॥ स्यातां वा पुंस्त्रीकार्यपजनेग्राह्यव्यावर्त्तनीययदाभिधेये ॥ तथापि समस्यानावर्त्त दुभय
प्राप्तिनिमित्तकत्वं शास्त्रप्रवृत्तेर्गम्यते ॥ परोद्देशप्रवृत्तेश्च परार्थत्वेन प्रसिद्धत्वेन स्वार्थविशेषात्मकत्वा
भावात्पर्यस्य तत्र वान्यतरवशात्प्रवृत्तमिति प्रवृत्तपदस्यानात्पर्यपरत्वाभ्युपगमेन तदुभयप्राप्तिनिरूपक

तात्पर्यकत्वं लक्षणं बोध्यं ॥ तन्निमित्तकत्वं च तन्निर्णेयत्वं न तु अग्राह्यग्रावस्तोभयग्राह्णि निर्णेयतात्पर्यक
त्वरूपेणोसिद्धेन तावदपूर्वनिषेधेषु नियमनिषेधेषु वातिप्रसंगः ॥ मदीयतात्पर्यस्य तत्तदर्जनाविषयस्या
वत्पप्राप्त्यधीननिर्णयत्वेपि ग्राह्यप्राप्तनिर्णयाभावात् ॥ नापि हंत्यादिविधिष्वप्राप्तिवीयतात्पर्यस्य नियम
गोचरस्य ग्राह्यहंत्यादिप्राप्तिकप्राप्त्याधीननिर्णयत्वेपि ग्रावक्लप्ताप्तनपेक्षत्वात्सन्त्या अपि दलनादिप्राप्ते हं
त्यादिपाक्षिकप्राप्तिसंपादनेनान्यथासिद्धेः ॥ अतो मापाहिपेषादितात्पर्यग्राह्यपाक्षिकप्राप्तिमात्रेणानियमपर
त्वाच्च ॥ नाविषद्दहोमवत्यग्निहोत्रं जुहोतीत्यादावतिप्रसंगः तदीयतात्पर्यस्य तत्तत्स्वापणाविषयस्य तत्तदप्रा
प्तिमात्राधीननिर्णेयत्वे न द्विविधप्राप्त्यनपेक्षत्वात् ॥ परिसंख्यास्तु विधिनिषेधेषु च ग्राह्यत्वाभिमतशशादि
भक्षणादेर्यावत्याभिमतश्वादिभक्षणादेश्च प्राप्त्यभावेश्रुतार्थतात्पर्यबाधेनाश्रुतनिवृत्तितात्पर्ययोगा
दस्त्येव द्विविधप्राप्तिनिर्णेयतात्पर्यकत्वं ॥ अतात्पर्यगोचरीभूतोपि वार्थोभिधानानुपपत्त्याहरणेन तात्पर्यगो

२२७

227

गोचरीभूतनिवृत्तिप्रतिपत्त्युपायत्वेन ज्ञाप्यते न तत्ताप्यते च पंचनखोदाहरणं इत्यन्यदेतत् ॥ अतः संभवत्येव परि
संख्यालक्षणमिति चेन्न ॥ अत्र ह्येवावयंतीन्यत्र द्विविधलक्षणस्याप्यव्याप्तेः ॥ तद्रूपस्यैवात्रांतरीयस्याधिक
रणकावापनिवृत्त्यात्मनोऽर्थस्यावाप्यभावात् । न हीदृशतात्पर्यनिर्णयस्य द्विविधज्ञाप्यनधीनत्वात् ॥ यद्यपि हि प
वमानन्तगायत्र्यादिष्वापोनप्राप्तः स्यात् । तथाप्येवकारसामर्थ्याद्वेदेव निवृत्तिपरत्वमस्येति न तथं वित्परिसंख्या
लक्षणोपपत्तिरित्यत आह ॥ उभयस्येति । यथोपरि संबंधो निषेधपत्वेनाभिप्रेतस्तदन्यतरतदन्यत्वोभयशङ्का
र्थः ॥ तादृशसंबंधनिरूपकत्वेन प्रतीतिश्च प्राप्तिः ॥ विधिफलभूतया व्याहृत्त्रपदव्याच्ययानिवृत्तिप्रतिपाद्यानि
यत्नैककालत्वमेव तादृशप्राप्तेः स्वनिमग्नप्राविवक्षितं न तु पूर्वकालतामात्रमिति ज्ञापनार्थोऽस्तु गच्छतु:
तदन्यतरतदन्यनिरूपिततादृशसंबंधसमकालनिवृत्तिप्रतीतिफलक इति वाक्यार्थः ॥ तादृशोभयनि
रूपिततादृशसंबंधावगाहि निवृत्तिप्रतीतिफलक इति तु निष्कर्षः ॥ मंत्रेण त्वाभिधानीमादधाति ग

राम

२२७

माधानीमित्येतादृशनीतेः परिसंख्याविधिफलभूतायाः सर्वत्र ताद्रूप्यसंभवान्नाव्याप्तिः ॥ नाप्यपूर्वनियमवि
धेष्वतिप्रसंगः यतस्तत्फलभूतानिवृत्तिप्रतियोगियोर्यसंबंधं निवर्त्यत्वेनावगाहते ॥ अवगाहत एव यद्यपि
तएतदन्यतरनिरूपितत्वेन तथापि न तदन्यतरान्यनिरूपितत्वेनावगाहते । अश्वनयनकर्तृभिन्नामान
येत्यादौ फलभूतानिवृत्तिप्रतीतिर्यद्यपि तदन्यतरान्यनिरूपितत्वेन तादृशसंबंधमवगाहते ॥ तथापि ता
सौ तदन्यतरनिरूपितोपि गोभिन्नामानयेत्यादौ फलभूतानिवृत्तिप्रतीतिर्यद्यपि तादृशोभयानिरूपित
संबंधमवगाहते तथापि तासौ तादृशः । यथा व्रीहीन् । दलनयोः संबंधो यादृशो निषेध्यस्तदन्यतरव्रीहि
णां तदन्यतरान्येन व्रीहिभिन्नासंबंधमवगाहमाना प्रतीतिर्यद्यपि व्रीहिविधेः फलभूता तथापि तासौ
दलननिवृत्तिप्रतीतिफलकः ॥ यद्यप्येष विधिरग्निहोत्रविधिश्च विधेयाधिकरणनिवृत्तिप्रतीतिफल
को भवत्येव तथापि यादृशोऽकरणपुरुषयोः संबंधो निषेध्यो मे वतादृशसंबंधं तदन्यतरतदन्यनिरूपि

मा॰दी॰

२२८

228

नत्वेन सावगाहते॥ अवगाहेतरूत्पकरणं पदकरणेन समुच्छित्यशाब्दं न दकरणं यदि विधेयपातं स्यात् ययोर्यदि
राः संबंधो निवर्त्तेइत्यत्रोद्देश्यभागे विधिविधेयोऽन्यत्वेन यथा निवृत्ति विवक्षितातां विधेयदलांतर्गत निवृत्तिपदेना
पि सैवोक्तेति बोध्यं यत्रोद्देश्यदलयोस्त्व निवर्त्तत्वं स्वफलीभूत निवृत्तित्रयोगित्वमेव बोध्यं॥ तेन दलन निवृत्ति
हेत्वकरणानिवृत्तिं वादापहति विधावति प्रसंगः॥ अथ भानयनकर्त्तर्मामाभानयेत्पत्रतु यथानयनूयत्रिरेके
वा निर्देशाद्यथार्थवनं तदापरिसंख्यैव। निर्देशाद्यथार्थवभमतानपनव्यक्तिभेदेतु नैव परिसंख्या। एकत्रोभयोः स
मुच्छित्यशाब्दापेक्ष निवृत्तिफलकत्वाभावात्॥ तादृश निवृत्तिफलकत्वस्यैवलक्षणावच्छेदकत्वात्। न चतत्रापि प्र
संगः॥ नत्फलमतायाः निवृत्तिप्रतीतेस्तवत्पातरनिरूपितसंबंधानवगाहित्वादिति सुधीभिरूह्यं॥ सामान्यवि
विशेषवृत्तावलवत्त्वापूर्वनियमविधिवत्तावलस्यापि लौकिकवेदसाधारण्यात् लौकिकपदेषु जातिवाचित्वा
दिनिविवेकवल्लौकिकविधिविषपूर्वविधित्वादिति विवेकोपिनानुचितत्वेन शंक्यः॥ अस्ति चात्रलेवावपंतीय

राम

तत्राप्युक्तलक्षणं पवमानगतगायत्र्यादिषु स्वाभावः कार्यः नान्यस्तोत्रीयायाश्चेति विधिफलं भूतप्रतीतेस्ता
द्रूप्यात् ननु नास्माद्वाक्यादुक्तविधप्रतीतिः संभवति तथाहि न तावदन्यस्तोत्रीयाधिकरणकाचापनिवृत्ति
त्वेन निवृत्तेरेवकारवाच्यत्वात्तादृशप्रतीतेर्निर्वाहः सर्वप्रयोगेषु एवकारस्य तादृशनिवृत्तित्वप्रकारकप्रतीतिजनकत्वाभाव
अथान्ययदेमात्रमेववाच्यं अन्यत्वस्य पवमानगायत्र्यादिनिरूपितत्वं अन्यत्वाश्रयस्य स्तोत्रीयात्मकत्वमावा
पनदधिकरणकत्वं सर्वमितदन्यलक्ष्यमिति चेन्न यतोन्यत्वस्य गायत्र्यादिनिरूपितत्वं समभिव्याहारलभ्यं
वाच्यं न च तत्संभवति गायत्र्यादीनां स्वपदोपात्तकारकोपसर्जनतया अन्यत्वस्य स्वपदोपात्तोर्थान्तरोपसर्जन
यामिथोन्वयायोग्यत्वात् अत एवान्यत्वाश्रयस्य स्तोत्रीयात्मकत्वमपि नान्यत्वलभ्यं यदि हि पवमानगतगा
यत्र्यादिनिरूपितमन्यत्वलभ्यं निमात्रीकृत्य किंचिदर्थं प्रतिपादयेदेवकारः तदा ताभिः सदृशे स्तोत्रान्तरीयपर्व
एवप्रतिपादयेत् समानाभिमतरूपेणेत्यप्रेतनरत्वादृष्टविषयाद्वारोक्तन्यायात् नाप्यधिकरणस्यात्रेतिसत्वस्तु

२२९

क्रस्यान्यपरान्वयः समभिव्याहृतत्वस्य संभवति अन्यथा नांशत्रयार्थान्वितस्यार्थबोधकत्वनियमात् अन्यविशि
ष्टव्यवच्छेदवाचिनैवकारेणोपसर्जनतयोपस्थापितस्यान्यपदार्थस्य समभ्यर्थान्वयायोग्यत्वाच्च ॥ यथैवकार
स्यान्यस्मिन्व्यवच्छेदवत्त्वशक्तिर्नतु विशिष्टे अत एवकारेण खलु प्रसक्तमनुपसन्नपिताधिकरणत्वेनैवकारोप
स्थापितान्यान्वयानुपगमाद्भूवन्याप्यापेन्याधिकरणकत्वलाभः यद्यप्येवकारसमभिव्याहारादन्यत्र प्राति
पदिकार्थस्य तु तथैवान्यो बोध्यस्तत्समभिव्याहारेणान्यत्र वैचित्र्येण प्रातिपदिकार्थस्य गुणपरस्तु तथैवैव
कारोपस्थापितान्योन्यान्वयासंभवात्पार्थत्वस्यापवमानगानगायत्र्यादिनिरूपितत्वलाभः यद्यानष्ट्रस्य बुद्धि
स्य धर्मप्रकारकबुद्धिजनकत्ववदेवकारकस्यापि बुद्धिस्थधर्मविशिष्टान्यत्वबोधकत्वान्नलाभः न च तु वै
वकार एव स्वबाच्येत्यन्यत्वे समभिव्याहृतगायत्र्यादिनिरूपितत्वस्य लक्षणया बोधकः एवकारस्तु तीय मुत
न्नि वैचित्र्याद्गुणपक्षकर्पत्वक्ष्योपस्थितिरविभासंभविनी अतः संभवन्तु क्रमणीतिनिर्वाहइति चेत् न भव

२२८

नुनाथत्कथंचिदेवमेवकारोपस्थापितेन्यत्वे पवमानगतगायत्र्यादिनिरूपितलाभः तथाविगायत्र्याद्यन्याधिकर
णकावापकर्त्तव्यतोपस्थितिमदेक्ष्यनेवकारस्यव्यवच्छेदबोधकत्वं संभवति कथंतर्ह्येवकाराद्व्यवच्छेदसिद्धि
रितिचेत् शृणु यथैवच्छ्वाद्धूपसर्गागमेनाऽनक्रीडादिव्यनीतिदर्शने विप्रहरतिविहरतीत्यादौ न ताउ
नक्रीडादेरूपसर्गार्थत्वंकल्प्यते अन्यथानांत्रकृत्यर्थान्वितस्वार्थबोधकतायाव्युत्पत्तिसिद्धायावाधापत्तेः
किंतुधातोरेवप्रसिद्धार्थत्यागेनमाऽनक्रीडादौप्रत्यादिद्योत्याशक्तिःस्वीक्रियते तथैवैवकारसमभिव्याहृ
तस्यपदस्यस्वार्थमात्रमोवरञ्जसिद्धित्यागेनस्वार्थान्ययोगव्यवच्छेदशक्तिरेवकारद्योत्यास्वीकार्याएवकारेणाव्यन
न्येवव्यवच्छेदमात्रंबोध्यते नवोक्तप्रमादिवत्द्योतकत्वेनैवोपस्थापितान्यार्थबोधकत्वमेवकारस्यस्यादित्यपिशं
क्यं उपसर्गपूर्वकक्रियायोगस्तिष्ठतिष्ठतिनपत्योर्मंत्रकरणावाय्यकरणाभिधेयत्वेद्योतयतोऽनात्मनेपदेनभावनाघर्य
बोधनात् ततश्चात्रस्वेवावपंनीमत्रेतदन्याधिकरणकावापोनकार्यइतिबोधोविनैवव्युत्पत्त्यंतरकल्प्य

नं विनैकस्य पदस्याविरम्य व्यापारस्तूपपन्नः एवं वैतनदधिकरणकावापप्रतीत्यनुदयात्संभवत्येवकारस्य नञो
वरविधिशक्तिप्रतिबंधकत्वव्यवहारः ननन्वैतन्निधिफलभूतायाः निवृत्तिप्रतीतेस्तादृशसंबंधाभावात् हित्वा
भावादस्यां परिसंख्यायां लक्षणाप्रवृत्तिरिति चेन्न एवकारसमभिव्याहृतपदस्य स्वार्थान्वयगोचरशक्तिरेका ए
वकारस्य तद्योतनशक्तिर्द्वितीयाऽन्यस्यैवव्यवच्छेदशक्तिस्तृतीयेति शक्तित्रयकल्पनेऽतिगौरवात् स्तोम
विवृद्धिप्रापकप्रमाणकावापस्यैवकारेणान्यव्यवच्छेदबोधने मीमांसामर्यादिकतया विकल्प्यापत्तेश्च
नहि किमेवकारान्न परिसंख्यासिद्धिरिति चेन्न सर्वोपपन्नसमस्तदोषपरिहारेण प्रकारान्तरसंभवात् तथा
हि एवकारेण क्षावन्योन्याभावबोधनापाय्यनेपुष्पवंतपदेन सैषा विशेषे शक्तेनावच्छेदकशक्त्यनावच्छेदकयोरभे
देवनशक्त्यनेकत्वशंकावसरः पदपदार्थान्वितार्थबोधनपरश्चैवकारस्तत्पदगततत्क्रमस्यार्थविषयक्रियार्थनिरू
निरूपितावेवतो प्रमाणान्ने यद्यपि प्रकृतिविभक्त्यार्थयोः संख्याविभक्त्यर्थक्रियान्वितार्थप्रतिपादकत्वमेवावसुमन्तेः

तथाप्यन्यार्थामपि विशेषणोपस्थितिमपेक्ष्य समं भवत्येवकारस्य तत्तत्प्रतियोगिविशिष्टान्यत्वबोधकत्वं चेत्रा
यान्यस्मै च देहि चैत्रादन्यस्माद्ब्राह्मणसमानमिनरछेनेनोत्पादो लोकवेदयोरन्यत्वबोधकशब्दमात्रे तथावि
शिष्टप्रतीतिजनकताया दृष्टत्वान्नाभिनवव्युत्पत्तावेवकारे कल्पनापत्तिः ससंबंधिकार्थबोधकपदमात्र
वैषम्यं विशिष्टधीजनकत्वमनुभूयते तुल्येपि ह्रि कयपदशास्त्रयोरेकहायन्युपसर्जनकप्रतीतिजनक
त्वे पदेकहायन्याः पदानंगत्वेनेन तत्तत्रयनस्य पदाप्रयुक्तत्वं तत्रेदमेव बीजं यत्पराथामेकहायन्युपस्थि
तिमपेक्ष्य पदशास्त्रस्य विशिष्टबोधजनकत्वं अतोन्यत्वबोधकमात्रेनाभिनवव्युत्पत्तिः कल्पनेनतरा
मेवकारे द्वाभ्यामपि तत्प्रतीतिभ्यामन्यत्वाभ्यामनुपस्थितान्यत्वेनैव धर्म्येकोभिरूढ लक्षणयोपस्था
प्यते सर्वान्यत्वप्रतियोग्यन्वयिनि विशेषणं चादिनिपातानां तदर्थवदेवकारार्थस्यापि धात्वर्थे नामार्थे
वासाक्षादन्वयबोधकाभावात् अतः पार्थायैव देहीत्यादौ पार्थसंप्रदानकेन तदन्यासंप्रदानकेदानं कुवि

निरोधः पार्थ एव धनुर्धर इत्यत्र प्रथमायाः अभिन्नार्थत्वे पार्थाभिन्नः पार्थाभिन्नाश्रयकधनुर्धर इति बोधः एवम
न्यत्रापूर्वं प्रकृतोदाहरणे वृत्ताय आद्यधिकरणकोत्पाद्याद्यन्यानधिकरणकावापश्चि कार्य इति प्रतीतेरु
क्तरीत्या सिद्धायाः प्रतीतेः नित्यपर्युदासनञ्प्रतीतितुल्यत्वान्न विकल्पावसरोपि नाहश्रुतान्त्या वान्त्यंताश्राप्नि
इत्निपर्यसायित्वेन विधिफलशङ्कि प्रतिबंधकत्वस्य व्यवहारोपि अस्तित्वं न स्यात् उक्तरीत्या लक्षणघटकतादृशान्त
याफलांतरनिरोधात्संभवत्येवकारस्यार्थान्तरयोगव्यवच्छेदसंबंधावगाहित्वमिति नाप्यान्निरित्यनुवदी
नापाति शशाद्यभक्षणे दोषस्य न त्विहत्येव प्रायश्चित्तस्य वादिभक्षणनिमित्तप्रायश्चित्तविधिनापेक्षित
स्य तन्निषेधस्य कल्पने गौरवादित्याशयः उक्तलक्षणमङ्गीकाम्यामपि न नियमपरत्वमित्याह पंचन
खेति अर्थं पंचनखपदमत्र न पंचनखत्वावच्छिन्नभेदवत्परं किन्तु पंचपदसमानाधिकरणेन पंचनख
पदेन शशकादिपरामर्शात्तद्भिन्नपरं भेदस्य चास्य निवाधके समानमित्याद्याविनरपदोक्तभेदवत्त्वे

जायानिषेधस्याभावाद्यागादिपरं भवति एवमग्रेऽपि तत्र श्वभ्रादिभक्षणस्य शशादिभक्षणस्य प्राप्तत्वेन नियु
क्त्यर्युगपत्प्राप्तेः शास्त्रफलम् तस्माद्धेतोः परिसंख्यालक्षणमस्तीत्याशयः पक्ष इत्यनंतरमप्राप्तीत्यकारश्ले
षः पाक्षिकाप्राप्तिः पाक्षिकाप्राप्तिकार्यत्वशंका नियमलक्षणघटकत्वोक्ता तस्मादेतद्विधिनात्वपर्यगावरति
वृत्ताव भावान्नियमलक्षणमात्रेत्याशयः उपपादितमेतदधस्तात् द्विविधेत्यनंतरं शाब्द्यार्था द्रव्यादिविधि
निरोषः माहात्म्यभेदः पवमानगायत्र्यादि प्रतियोगिकाधिकरणप्रतियोगिकश्च तस्यैवकारेणाभिधाना
दित्यर्थः अभावादिति तत्राभावत्वाविपदसत्वासत्वासत्वे एवं श्रोतलक्षणिकपरिसंख्यायाभेदके
इत्याशयः एषत्वनवधारणं ध्वन्यते तत्र तत्र श्रौत्यात्रिदोषपरिहारार्थं तस्यांत्रेदोषाभावस्य स्फुटत्वात्तर्कि
तुफलतः परिसंख्यायां त्रैदोष्यपरिहारार्थं तथाहि प्रत्यक्षस्य श्रुत्याऽश्वाभिधान्यंगत्वेनावगतस्य मंत्रस्य के
मर्थिकां काम्निहृत्रिसत्यांशनाद्यपि विनियोजकश्रुतिकल्पनाप्रतिबंधाने वाश्वाभिधानीयां मंत्रविनि

मा०
२३२

232

योगोमानांतरसिद्धोस्ति येनश्रुतेनतस्मिंस्तात्पर्यग्रहो येन नापिगर्दभाभिधान्यांमंत्रविनियोगोमानुसिद्धो
येनतन्निमित्तावश्रुतार्थां तात्पर्यकल्पेन ज्ञापकश्रुतिकल्पनाप्रतिबंधादेव वचनशक्तेर्बाधोपि फलेतुविधि
तलोप्यमानेप्रत्यक्षानुमेयश्रुतिभ्यामश्वाभिधान्यांमंत्रप्राप्तिसंभवेतुल्येपियदनुमेयश्रुतिप्रतिबंधेनत्वरमाण
याप्रत्यक्षश्रुत्याश्वाभिधान्यांगत्वबोधनेकृतेनगर्दभाभिधान्याअनुमेयश्रुत्यामंत्रप्राप्तिर्माभूदित्येवमर्थ
मितिनिर्णयात्फलतःपरिसंख्यासिद्धिः ननुयद्येवंनगर्दभाभिधान्यामंत्रप्राप्तिंनबोधयेत् नैवतस्या
साम्निवृत्तिःसिध्येत् मंत्रस्याश्वाभिधान्यादानांगत्वेनकेनसर्थ्याकांक्षानिर्वृत्तावपिगर्दभाभिधादानेप्यस्मार
काकांक्षासत्वेनमंत्रस्यतादर्थ्यापत्तेः नवाक्षेपलभ्येनोपदृष्टादिनास्मारकेणापिगर्दभाभिधान्या
दानीयाकांक्षोपशमसंभवान्नमंत्रस्यतादर्थ्यापत्तिरितिशंक्यं नियमसंभवेऽनियमस्यान्याय्यत्वात्

अस्त्वेयदिगर्द्दभाभिधान्यादाने स्मारकत्वेनाक्लृप्तापूर्वसंबंधानामुपस्थानादीनां स्वीकारात्क्लृप्तापूर्वसंबंधमंत्र
स्वीकारे लाघवाच्च उक्तं हि तृतीये आग्नेय्याग्नीध्रमुपतिष्ठत इति वचनं स्तोत्राद्यंगत्वेन विनियुक्तामपि पृथक्
नाग्नेयीं विनियुङ्क्ते न त्वप्रकृतां तस्याः पूर्वसंबंधद्वारसंबंधे वा बाध्यमाने लिंगेरवादिति न च वचनस्याश्वा
भिधानीमंत्रसंबंधबोधकत्वेपि तदतिरिक्तसंभवत्प्राप्तिकतद्बाधनप्रयुक्तवैयर्थ्यानुपपत्त्यैव गर्दभाभिधान्यां
मंत्रनिवृत्तिः शंक्या तथा सति पंचपंचनखा भक्ष्या इत्यत्रापि त्रैदोष्याभावापत्तेः शशादिभक्षणबोधकत्वा
परित्यागेपि तस्य वैयर्थ्यानुपपत्त्यैव श्वादिभक्षणनिवृत्तिसिद्धेः। किमिति श्रुतिहान्यश्रुतकल्पने स्वी
कार्ये तस्मात्केनापि मानेनासंभवत्प्राप्तिकस्यार्थस्य निवृत्तिबोधकवचनं विना वैयर्थ्यानुपपत्तिमात्रेण
न निवृत्तिरिति स्वीकार्यं तथा सत्युक्तरीत्या गर्दभाभिधान्यां संभवत्प्राप्तिकमंत्रनिवृत्तिसिद्धेश्रुत

वचनेनैवलैंगिकविनियोगंबाधित्वाश्रुतिविवृत्तिपरेणाभवितव्यं ततश्चानिवार्य्यत्रैदोष्यंप्रसजति मेवं गर्द्दभाभिधा
दानस्यसत्वामपिस्मारकाकांक्षायामन्यपिवमंत्रस्य क्लृप्ता पूर्वसंबंधत्वमंत्रस्यतादर्थ्यानापत्तेः तथाहि हि
रण्यगर्भः समवर्त्ततागृइत्याधारमाधारयतीत्याधारसामान्येविनियुक्तस्यमंत्रस्यकमाधाराकांक्षासत्वेपिप्रा
जापत्यात्याधारस्यवृद्धकृतावविवक्षितावप्यनियतोपायाक्षेपकत्वप्रयोजकस्मारकाकांक्षासत्वेपिप्रधा
रस्यवोद्दकशाखमंत्रेणनैराकांक्ष्यसंभवेपिहिरण्यगर्भमंत्रस्यपूर्वस्मिन्प्राजापत्येयोग्यया उत्तरस्मिन्नैंद्रवायो
ग्यतायाः स्फुरत्वेपिनियमादृष्टकल्पनागौरवभयादेवपूर्वस्मिन्प्रवृत्तिर्हिरण्यगर्भमंत्रस्यनांगत्वमाश्रीयते श्रा
भिप्रेतेऽन्यापि वचनव्यक्तिः प्रदर्शिता प्रदर्शनीया वा भवतेति चेत् उभयोरभिधायित्वे याव
वचनव्यक्तिः केवलविध्यभिधायित्वे पितस्याः एवस्वीकारात् घातकस्यापि नञो वृशप्रोज्झार्य
त्वात् किंच विरोधिमात्रे कृप्रशक्त्यैव नञो निवर्त्तनाप्रतीतिरुच्यते निवर्त्तनात्वेन प्रतीत्यै
शक्यंतरं वा स्वीक्रियते नाद्यो निर्वर्तनात्वेन प्रतिपत्त्यभावेऽपंमां निवर्त्तयतीति व्यवहारास
म्भवापत्तेः यथैव हि तदन्यथा विनापि न ज्ञानदन्यत्वप्रकारक एव बोधो जन्यत एवं तद्विरो
धित्वाविनापि तद्विरोधित्वप्रकारक एव बोधो जनयितुमुचितः एतेन विधिसमभिव्याहृते
ष्वनञः कृप्रशक्त्यैव निवर्त्तनाभिधायित्वमिति भवदेवीयो द्वितीयो विप्रकारो निरस्तः

भा॰

२९९

299

वाचकद्योतकत्वाभ्यां प्रसिद्धयोर्विधिनञोर्वैपरीत्यकल्पनायाः अन्याय्यत्वाच्च यस्य यद्वाचक
त्वमविवक्षितं स्वार्थक्रमस्यासमभिव्याहृतं तत्समभिव्याहारस्य तत्र द्योतकत्वात् न द्वितीयः यतः
प्रवर्तनावन्निवर्तनायाः अपि धात्वर्थानुरक्तभावनायां विषयत्वमवश्यमभ्युपेयं एकविषय
त्वेनैव विरोधनिर्वाहात् विधिवन्निषेधस्यापि वाक्यार्थभावनाविषय एवेति न्यायसुधोक्तेश्च
नञश्चावश्यकत्वेप्यशक्यं नरे विषयाविषयिणोः समानाभिधानश्रुत्यान्वयलाभाय विधा
वेव नञर्थीकार्यं ननु वाक्यीयनदं तदन्वयापादकोनञि शंक्यं नरस्वीकार उचितः अतो
नञश्चेत्यादि गमयंतीत्यंतो ग्रंथः ॥ ९ ॥ इति चेत् मैवं पक्षापि विरोधिबोधकत्वं नञोन

तस्वाविकं तद्दसादृश्यमभावश्चनदनुत्वंनदल्पता अशाशास्त्वं विरोधश्चनञर्थाः षट्प्र
कीर्त्तितादृत्तिवाक्येनिदिष्टसादृश्याद्यर्थानिरवद्विरोधस्याप्यभावघटितत्वेनलाघवाद्भावेगो
चरज्ञूपशक्ते:प्रतीतिनिर्वाहे शक्यंतरानाक्षेपात् अग्रिमग्रंथविरोधाच्च तथापिप्रकृतनि
षेधगतनञोनिवर्त्तनाभिधायित्वाभिप्रायेणासंगच्छतएवग्रंथः यथाहिपंकजपदानंतरंज्ञा
यमानपद्मत्वप्रकारकप्रतीतेःपंकजशब्दादिगतरूढशक्त्यालक्षणयावाऽनिर्वाहात्तन्निर्वाहार्थं
शक्तिःकल्प्यते एवंनिषेधवाक्यश्रवणानंतरंज्ञायमानायानिवर्त्तनात्वेननिवर्त्तनाप्रतीतेः
रूढशक्त्यालक्षणयावाऽनिर्वाहात्संभवादेवनञ्पदेशक्त्यंतरंकल्पनीयं नहिविरोधानिवर्त्तना
त्वमभावघटितंयेनतद्देवप्रतीतिनिर्वाहःशक्येन निवृत्तेरपिविजातीयपत्वात्मकत्वात्

तत्त्वशक्यत्वं तत्त्वं न लिङ्गादिनिष्ठं तत्र हि न लिङ्गाद्येव शक्यतानवच्छेदकं विधिवाक्यगतलिङोऽपि निव
र्त्तनाश्रयत्वापत्तेः द्योतकनञस्तत्राभावान्वयासंभवात् इति चेन्न तर्हि नञ्विशिष्टलिङ्त्वं शक्यतावच्छेदकं
ब्रूहि सुतरां हरतित्वमिव क्रीडायाः न हि शक्यतान्तरगतनशक्तेः शक्यतावच्छेदकत्वं द्योतकत्वान्नवाक्यनिर्व
र्त्तनं तथास्त्विति चेन्न माकुर्वित्यादेः तथाप्रतीत्यनापत्तिः अथाभाववाचकपदविशिष्टप्रवर्त्तना
वाचिप्रत्ययत्वेन निवर्त्तनाबोधित्वं अभावप्रवर्त्तनेति शाब्द्यां निवर्त्तनाप्रतीतिनिवारणायाभ
येति प्रत्ययेति च ग्रहणमिति चेन्न पो यद्वाचानसमनद्विपरिनाभिधायीति विरुद्धयोः प्रव
र्त्तनाबाधित्वनिवर्त्तनाबाधित्वयोः सामानाधिकरण्येनावच्छेद्यावच्छेदकभावासंभवात् श्री
रादित्याद्यनुरोधेन विरोधानभ्युपगमे विधिसामान्यतो विरोधिप्रतीतिजनकत्वेन कॢप्तेन

न एव विरोधिविशेषनिवर्त्तनायां शक्तिकल्पनौचित्यात् प्रत्ययेन सामान्यसंबंधः क्लृप्तस्यैव
तेन विशेषसंबंधः स्वीकार्य इति न्यायस्याग्रे घुमुपतिष्ठते पुरावाचःश्च वदतो निर्विवादितिवेद्व्या
कच निर्णयायोक्तस्य लौकिकपदार्थसंबंधारणेऽपि तुल्यत्वात् नञो द्योतकत्वे पृथक्त्व
व्यवहारः स्यात् नहि विहरतीत्यादौ व्यादेः पृथक्पदत्वव्यवहारोऽस्ति न च तत्संगतेऽपि स्वा
वकस्य शक्तं पदमिति लोकप्रसिद्धविषयत्वात् अर्थश्च न्यायस्यानिपदिकत्वाद्यसंभवेन
ननः स्तुवाद्यनुत्पत्तेरस्तु श्रिडंतं पदमिति शास्त्रपरिभाषाऽन्यविषयत्वात् नञो निवर्त्तना
वाचित्वे तु लिङादेर्द्योतकत्वे तु न पृथक्पदत्वप्रसिद्धिविरोधः कृत्वाद्यभिधायित्वेन तन्नि
र्वाहात् किंच नञ्विशिष्टलिङो निवर्त्तनाभिधायित्वमंगीकृत्य नञो द्योतकत्ववदतोऽप

पागुलिंदध्यान्नेनेतिवाक्यप्रयोगः कदापि न स्यात् निवर्त्तनानुवादस्य केवलनञर्थविधा
नस्याचासंभवात् नञलिङादेर्द्योतकत्वेऽपि दोषसाम्यं भावनानुवादप्रतीतेर्नान्तरीयक
तयाऽनुवादभागोच्चारिणस्यापि द्योतकत्वोपपत्तेः दृश्यते हि दध्नाजुहोतीत्यत्र वनाप्रतीते
विधिभागनिर्द्देशस्यापि लिङोऽनुवादभागनान्तरीयकतयोच्चारणं मीमांसकानां प्र
त्यङ्होतीतिदध्नेति अन्तोयद्यपिवादीनां प्रकृतिप्रत्ययबन्धवं च स्वादिरं वेति नियतं पौ
र्वापर्येणोच्चारणदर्शनानुद्देश्यतया विधेयतया चान्वयस्तत्र णार्थासमर्पकत्वाच्च द्योतक
त्वेन पृथक्पदत्वाभावः स्वीक्रियते तन्नञो नैषवक्तुं शक्यः अत्राह्मणेरन्यत्रत्वा नञ्गामित्य
नयेत्यस्य पचतिक्रियान्वितिरित्यत्र निरित्यस्येव नञ्तरत्वेनालोचनेनोऽन्नरपदार्थप्राधान्यबाधः ३०१

उपपादयिष्यते त्वेन प्रकारांतरेणावसरे अतो न ज एव निवर्त्तनावाचित्वं एवं च खपुष्पं नास्ती
त्यादिवाक्यगतनास्तीतिपदाभिप्रायो दृष्टांतग्रंथोपि संगच्छते नह्यत्र खपुष्पाभावो ज्ञाप्यत
इति निराकांक्षं वक्तुं अस्मन्नतिप्रयोगिकाभावानभ्युपगमात् किंतु अलीकापरपर्यायमसदेव
ज्ञाप्यते नत्र शब्दजन्यप्रतीतिविषयत्वस्याप्यस्याभ्युपपत्त्वात् न च निषेधेषु प्रवर्त्तनायालि
ङर्थत्वोक्तिः कथमित्यपि समाधत्तं स्वगतद्वेषस्यैव हननाद्यनुकूलस्य प्रवर्त्तनात्वेनानु
वादसंभवात् यं मां द्वेषजननेनानिष्टकारित्वादिप्रत्ययोहं न नेप्रवर्त्तयतीति तं मामेष निव
र्त्तयतीति प्रतीतेः न च प्रवर्त्तनायाः परगामित्वमपि लिङादिवाच्यकोटिनिक्षिप्तं येन स्व
गतद्वेषादेः प्रवर्त्तनात्वेन ततः प्रतीतिर्नोपपद्येत प्रवर्त्तनायाः प्रतीतेर्मानान्तरलभ्यत्वस्य

मा·
३०२

302

ज्ञागुपपादनात् ॥ अनुवादकस्य सुतरां तदधीनत्वात् उक्तं च वार्त्तिके प्रत्ययसंबंधानुगृहीत
शक्तिरसावमात्राभिधानादस्याधिकलक्ष्यव्यापारानन्तविध्यर्थमपि देवाद्यर्थप्रज्ञप्रतिषि
ध्युपरितार्थ इति अत एवाकृत्याधिकरणे निपातानां द्योतकत्वोक्तिसंभवद्योतकत्वं निपा
तानन्तरविषयत्वेन नेया यद्यानात्र निवर्त्तना प्रतीति वेलायामनुवाद्यत्वेन प्रतीत्ये प्रवर्त्तना
या लिङ्र्थत्वोपन्यासः किंतु परे यथा भूतलं घटो न भूतले घटो नेत्यादौ भेदसंसर्गाभाव
प्रतीत्योर्व्यवस्थायै याह नञ्समभिव्याहारेण्य योक्ता दात्म्यसंसर्गाभावं बोधयति नञ्सहित
त्वाद्दशस्तदन्यतरधर्मि प्रतियोगिकं भेदं संसर्गाभावं च यथाक्रमं बोधयतीति व्युत्पत्तिमं
गीकृत्य नकिंतिनयमाभावांगीकारेण वदंति भूतलं घट इति समभिव्याहारस्तादात्म्यबोधक इति

तथायादृशसमभिव्याहारः प्रवर्त्तनांयज्ञावशं बोधयतिनत्वाहि तस्मादृशस्त्रज्ञेवशं निवर्त्तनां
बोधयतीतियुक्तमित्यंगीकृत्योक्तं किन्तु तत्र भावाभ्युपगमेनैषप्रवर्त्तनायालिङर्थत्वोपपा
सत्यनिबोध्यं प्रकारान्तरेणापिनिषेधेऽपिप्रवर्त्तनानुवादसंभवं वक्ष्यामः न च लिङर्थनिवर्त्तना
याश्चापिसमानाभिधानश्रुत्याविषयलाभः ब्राह्मणकर्मकहननावच्छिन्नायाएवभावना
याविषयत्वात् तथा तस्या अप्रतीतेः न च नयथमेर्थनिवर्त्तनायाविषयलाभोपिसर्वथावा
च्यीयः यस्य पदान्तरेणापियेनार्थेनावच्छिन्नार्थबोधत्वनियमः न ञ्जः तस्मादवच्छिन्नार्थबोधः
श्रौतएवेतिसर्वाधिकरणाद्याकरग्रंथेप्रसिद्धत्वात् श्रुतएवश्रौतेति न कल्लंजंसक्षयेन्नदी
क्षितोनज्जुनातिरात्रेषोडशिनंगृह्णातीत्यत्रयद्यपिकाविन्निषेध्यस्यानन्यवायहेतुत्वप

रत्र क्रतुफलप्रतिबंधकमन्यत्र तदंतरेणैवाभावस्य क्रतुफलजनकत्वमिति वैषम्यमस्ति त
थापि तस्य मानांतरसहकृतेन निवर्त्तनीयेवाक्षेपफलस्य त्वान्नास्माकमिष्टसाधनतां विधिवादि
नामिव कश्चिद्भ्युत्पत्ति वैचित्र्यकल्पने गौरवमित्याशयः ननु भवतु निषेधश्रुति वर्त्यावा
क्यार्थत्वं तन्निर्वाहस्तु न ञोलिङ्थाभावप्रवर्त्तनाभावप्रसिद्धयाक्षिप्यामेव संभवति
तथाहि यजेतेत्यादौ भावनाख्यातजन्याकृत्यपरपर्यायिभावनात्मक प्रवृत्तिप्रतीतिम
पेक्ष्यानुकूलव्यापारमात्रशक्तेन लिङादिना प्रवर्त्तनाप्रतीतिः क्रियत इति प्रागुक्तं आ
ख्यातमिहिमावच्छिन्नधात्वर्थविधिना प्रवृत्तिरिति सुव्यक्ते धात्वर्थप्रतियोगिक नञमिहि
ताभावावच्छिन्ना च निवृत्तिरिति न तत्र विनैव शक्यंतर निवर्त्तनाप्रतीतिः संभवतीत्यत

आह एवं चेति चएवार्थे निवर्त्तनागोचरशक्त्यंतरे सत्येवेत्यर्थः कर्त्तव्यताविध्यन्वयिकृति
विषयतानतस्यावाक्यार्थत्वंवाकृतान्यूर्यविषयत्वमितियावत् भवतुकर्त्तव्यताप्रतिपा
दकत्वेनैकार्थत्वं कृत्यवच्छेदकभेदादेवतयोर्भेदोभवेदित्याह नचेति प्रतिषेधादेवक
र्त्तव्यार्थप्रतीत्युपपत्तेर्नेश्रेनेत्यस्यप्रतिषेधभूतस्यैवतस्यप्रतीतिमित्यनेनैकवाक्यत्वोप
पत्तेः चातुर्थिकंप्रतिषेधत्वपरित्यागेनसंकल्पेलक्षणाश्रयणंनोपपद्येत उपपद्येत
वार्थवादश्रूयेषुनकलंक्षयेदित्यादिसूत्रेषाठन्यायनिरस्तमपिविश्वजिन्न्यायेनकाम्यत्वं
परोपर्जनत्वेनोपस्थितस्यप्रकृत्यर्थस्यनञर्थेप्रसञ्जनत्वेकल्पनेनिर्हेतुकोऽश्रुत्युपात्तवि
रोधश्चापद्येतेत्याशयः नाहकश्चेनोपाधिकत्वं कल्पेति यद्यपि ऋध्यादिभेदःपरस्पा

भाद्दी
२०४
304

पिकर्थं विंस्तु वचनस्तथापि न्यायसिद्धमिष्टानिष्टप्राप्तिपरिहारफलत्वेन विधिनिषेधयोरभि
न्नफलत्वं विधिनिषेधयोर्नान्यं तं भेदं विना संभवतीत्याशयेनेदं निषेधस्थलीयनञो विध्य
न्वयेन क्वचिपरीतार्थबोधकत्वं परसम्मत्याऽऽशङ्कयति यन्मतनञ इति नचेष्टसाधनत्वाभावबोधक एव
नञ् न त्वनेकुतो न स्यादिति शंक्यं प्रत्यक्षसिद्धस्य कलंजभक्षणादिगतेष्टसाधनत्वस्याभा
वबोधनासंभवात् नापीष्टएव प्रतिपक्षबोधकत्वं कुतोऽपन्यस्तमिति शंक्यं तस्यापदार्थत्वे
नापरपदार्थान्वियानर्हत्वात् ननु कलंजभक्षणाभावस्येष्टसाधनत्वमबलिङ्गोच्यतां इष्टं च
नित्यविध्यावृपिप्रन्यायपरिहारस्तत्साधनत्वं च नदभावप्रयोजकाभावप्रतियोगित्वात्मकं तु
बलवदभावस्याऽत्त आह सर्वथापि विनिप्राधान्याद्धात्वेव प्रतिपन्नयार्थभावनायाएव प्राधान्य

२०४

नियमात् अयमाशयः कृतिसाध्येष्टसाधनत्वं विध्यर्थ इति तावत्परैर्यागादिधात्वर्थविशेष्यक
त्वप्रकारकबोधस्य विधावभ्युपगमान्निषेधस्थले भावविशेष्यकत्वप्रकारकोबोधो वाच्यः
न च शक्यो वक्तुं अभावे यागादिवत् कृतिसाध्यत्वासंभवात् इष्टसाधनत्वमात्रं विध्यर्थ इति
पक्षे तु यागकृतिरिष्टसाधनमित्येव विधौ बोधः स्वीकार्यः धात्वर्थगतप्रकारतानिरूपित
विशेष्यतासंबंधेन प्रतीतौ भावनात्वावच्छिन्नायाः ख्यातजन्योपस्थितिः कारणमिति व्युत्प
त्तेर्लङादिषु क्लृप्तायाः लिङादिष्वपि सा निर्बाधमनुसरणीयत्वात् ननु तथा तद्वदेव नञ
र्थेऽपि लक्षणाद्यन्वयः अतः कथं लक्षणाभावे इष्टसाधनमिति बोधः स्यात् यदि च सा
शाक्यशेषनिषेधानां विश्वजिन्न्यायेन काम्यत्वं स्यादिति धात्वर्थेति उपलक्षणमेतत्

यतोऽस्ति तृतीयमपि पर्युदासनिमित्तमाकारप्रसिद्धं तथाहि न दीक्षितस्यान्नमश्नीयादिति न
स्मादीक्षितस्याविज्ञातस्याक्रीतराजकस्यान्नमभोज्यं भवतीशाखाभेदेनाम्नातस्य वाक्यद्वयस्य
दीक्षितान्नभोजननिषेधार्थत्वप्रतीतोऽतुल्यायामपि क्रीतराजकोभोज्यान्नः संस्थितेऽग्नीषोमीय
दीक्षितस्यान्नमश्नीयादिति शास्त्रीयावधिद्वयस्य केवलनिषेधान्वयासंभवाद्राजक्रयावधिनिषे
ध एकेन शास्त्रेणाथर्ववैदिकेन बोध्यते अपरेण त्वग्नीषोमीयसंस्थावधिरभोजन
संकल्पविधिः पर्युदासाश्रयणेनेति विरोधिकरणवार्त्तिके उक्तं अत्रावधिद्वयसंकीर्तनानु
पपत्तिरेव पर्युदासनिमित्तत्वेन प्रतीयते अतः पर्युदासनिमित्ते द्वैविध्यानियमो न संगच्छते न चापद
नापद्विषयत्वेनापि वाक्यद्वयव्यवस्थाया वार्त्तिककृदुक्तत्वान्नेयं व्यवस्था वार्त्तिककृत्संमते
ति वक्तुं शक्यं पूर्वोपन्यस्ताया एतस्याः शास्त्रीयतुल्यफल्गुनाबाधापादकतया वार्त्तिककृदनं

मिश्रत्वस्यान्यायसुधायामुपन्यासात् नचतस्यैवनञोमित्युपक्रमादेव पर्युदासइतिनियमः चातुर्मा
स्यव्रतान्युपेयादित्युपक्रम्यापिनेषुनमध्वश्नीयान्नमांसमश्नीयादित्यादिष्वपिनञमुपगमस्यावश्य
कत्वात् नचोपक्रमविरोधादेव पर्युदासस्त्वन्यापिनिर्यंतुमशक्यत्वात् एकादश्यांनभुंजीतपक्षयोरु
भयोरपि त्वनस्थयतिधर्मोऽयमित्यत्रोपसंहारगतधर्मपदानुरोधेनपूर्वोद्दिष्टमाद्गिणापर्युदासाश्र
यणात् हृसःग्राह कः गृहीतोधर्मोभवेदपिनपुनःस्वतंत्रोनिषेधस्तथाभवतीतिश्रेयःसाधनत्व
रूपधर्मस्याक्रत्वर्थनिषेधेषुस्वतंत्रेबोधेऽसंभवइतिधर्मपदानुरोधेनपर्युदासआश्रयणीयइति
तदाशयः अतः कथमुपक्रमविरोधस्यैवपर्युदासनिमित्तत्वं अथोपग्रहणमुपलक्षणार्थं
पर्युदासमंतरेणानुपपद्यमानपदांतरेणैकवाक्यतामात्रंनिमित्तत्वेनविवक्षितमितिचेत् न

स्यैकवाक्यत्वेनैव पर्युदासनिमित्तत्वेन वक्तुमुचितानि विकल्पप्रसक्तेः पृथङ्निमित्तत्वोपन्यासः संगच्छ
ते तथा हि यजतिषु येयजामहं करोति नानूयाजेष्वित्यत्र यदि नञ् समासान्तदायजतिष्वनूयाजेषि
ति विरुद्धविभक्तिरहितानाम्पां नाममम्पां तावदेतेषु बाधः स्यात् नीलो घट इतिवत् यथा भेदबोधकः
समभिव्याहारस्तत्र श्रूयमाणो नञ् भेदमेव बोधयति यथा न नीलो घट इतिवत् एवं च नानूयाजे
ष्विति नञोऽनुपपत्ति सिद्धभेदबोधवाक्यत्वाश्रयणेनैकवाक्यत्वे संभवति न पदद्वयानुषङ्गकल्प
नापूर्वकं नानूयाजेषु येयजामह इति पृथग्वाक्यकल्पनमुचितं मित्येकवाक्यतानुरोधेनैवेहा
पि पर्युदासस्य सिद्धिः न चेह विकल्पप्रसक्तिः दधिप्रज्वालनं स्यादातव्यं कौण्डिन्यायन दाने ब्राह्मणमित्याने
न विशेषशास्त्रेण सामान्यशास्त्रस्य बाधापत्तेः न चेहापि कौण्डिन्यभेदबोधकत्वं नञः ऽऽकां एवं नावरुणद्धि तान्

नहि महतो राज्ञस्तत्र राजनि महद्रूढेदश्वनातिवन्न महतां राज्ञ इत्यत्रापि तस्मिन्महद्रूढेदश्वती
ति जायेत् नचैकोनद्वाविंतिवाद्विरूढविभक्तिरूपदसमपि द्यारेपि नञो भेदकत्वमस्त्विति श
क्यं तथा सति द्वितीयस्य दानव्यामित्यस्य वैयर्थ्यापत्तेः यदि चेह शास्त्रसामान्यविशेषविषयेपि
विकल्पापत्तिस्तदा रात्रौ श्राद्धं न कुर्वीत न दीक्षितो जुहोति अयज्ञिया वै माषा इति निषेधस्यापि
कथं न विकल्पापत्तिः न च नेषु पर्युदासोभ्युपगम्यते तेन च संभवति रात्रीतरकाले श्राद्धकर्त्त
ताज्ञानेपि रात्रिश्राद्धे दोषाभावापत्तेः दीक्षितान्यस्य होमकर्त्तव्यताज्ञाने दीक्षितेन कृतेपि
होमे कृतो वै गुण्याभावापत्तेः माषभिन्नस्य यज्ञसाधनत्वावगमेपि माषाणां प्रतिनिषिद्धत्वे वै
गुण्याभावापत्तेः तस्मादनुयाजेषु न विकल्पप्रसक्तिर्यत्र यजामहस्य सामान्यशास्त्रस्यानुयाजे

भा
३०७
307

त्तरविषयेऽप्रसक्त्यभावान्निषेधानुपपत्तिरिति चेन्न साक्षिदं मंत्रवत्परं पराया नंमो मांसकवचः य
तोऽनुयाज्ञे नर विषयत्वापि सामान्यशास्त्रस्यान्हृयाज्ञसाधारण्येन तात्पर्यभ्रमादनुयाज्ञे प्रप्रस
क्तस्यैवयज्ञामहस्य संभवत्येव निषेधः नहि निषेधो वास्तवप्राप्तिमेवापेक्षते किन्तु देवबुद्धि निषेध
स्यापि तादृशप्राप्तिसापेक्षत्वात् । न च शास्त्रीयनिषेधो भ्रान्तिप्राप्तिप्राप्तस्य न संभवतीति
राज्ञास्ति स्वीकृतत्वकुंडगोलकयोः श्राद्धभोजनस्य भ्रान्तिप्राप्तिविषयत्वं कैश्चित्स्मृति
व्याख्यातृभिः न च सवर्णेभ्यः सवर्णास्तु जायन्ते ऽ सज्ञानयुक्तिशास्त्राद्ब्राह्मणाद्ब्राह्मण्यां
व्यभिचारोत्पन्नयोरपि तयोर्ब्राह्मण्यात्वास्त्वत एव श्राद्धभोजनेऽप्रसंगोस्त्वाति वाच्यं विज्ञास्वेषु
विधिस्मृतेष्विति वाक्यशेषात्तूढायामेव सवर्णायां सवर्णोत्पत्तिश्रुतीतेः स्वीकृतस्य भ्रान्तिप्राप्त

पर्युदासोऽपि प्रवराध्यायविधिः यथैक एव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते तावत्समानगोत्रत्वं भृग्वंगिर-
सांगणादिति अत्रापि विवाहप्रयोजकसमानगोत्रत्वलक्षणं भृग्वंगिरोगणविशिष्टत्वं बोध्यते
संति च द्विविधा भृग्वंगिरोगणाः सप्तर्ष्यपत्यभूता जामदग्न्यादयः केवलाश्च हरितादयः तत्र स-
प्तानां सप्तर्षीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमित्याचक्षत इति गोत्रलक्षणाक्रान्ते प्राद्यगणे
षु सत्यामपि समानगोत्रत्वप्रसक्तौ न पर्युदासस्य तद्विषयत्वं न त्प्रयोजनभूतायां विवाहसि-
द्धौ जामदग्न्यानां सर्वेषामविवाह्यत्वादिशास्त्रान्तरेण प्रतिषेधात्पर्युदासवैयर्थ्यापत्तेः
द्वितीयगणेषु तु पर्युदासप्रयोजनं संभवति भृग्वंगिरोगणेषु पंचप्रवरिणां प्रवरत्रयसाम्ये न त्रिप्रवरि-
णां प्रवरद्वयसाम्येन वैसमानप्रवरत्वमिति नियमेनैकर्षेर्प्यनुवृत्तौ समानप्रवरतयाशास्त्रान्तरेण

णवानिवाहाप्राप्तिर्बंधात् तथापि न तेषु समानगोत्वप्रसक्तिः सप्तम्या न पञ्चसु तेषु गोत्वलक्षणा
भावात् अतोऽप्राप्तिप्रसक्तस्यैव तेषु पर्युदासो वाच्यः अस्तु तथाप्राप्तिप्रसक्तेर्ययजामहान्निषेधवे
नानूयाजेष्वित्यस्य अतो नात्र विकल्पप्रसक्तिः सत्यामपि तस्यां न तोपक्षोकरोतीतिवत्पर्युदासा
श्रयणं युक्तं अन्यथा विकल्पप्रसक्तेः हेतुस्त्वकल्प्यत्वे किमिति तत्रापि पर्युदासो नाश्रीयते दर्शप्रक
रणपठितस्य न तोपक्षोकरोतेस्य प्राकृतोऽतिदेशेनैकवाक्यतानसंभवतीति न पर्युदासत्वमिति
चेत् हंत यद्यतिरेकेण पर्युदासव्यतिरेकः सैकवाक्यत्वे पर्युदासस्य निमित्तत्वेन वक्तुं युक्तिता न
व्यभिचारिणीति विकल्पप्रसक्तिः यदि च तत्कृत्याऽनुपपन्नत्वं पर्युदासस्याश्रयणे तर्हि व्रीहियव
योरपि विकल्पप्रसंगाच्च वाक्येय वपदं गौण्या वृत्त्या व्रीहिषु यवयवसादृश्यविधिपरं किमिति नाश्री

पत्ते वैपरीत्यस्यापि संभवेन किंचिन्निगमकमिति वाच्यं व्रीहीणां मेदस्तु मनस्यमान इति मंत्रस्य नित्य
वत्पाठ एव कथं च स्वीकृतेपि पर्युदासे विकल्पपरिहारः नो हि निषेध एव प्राप्तिमपेक्षते न पर्युदास
इति वक्तुं शक्यं तथा सति नमोऽप्यध्वरस्य पर्युदासत्वापत्तेः अतो नेदं पर्युदासनिमित्तं द्वैविध्यं
संभवतीत्याशंकां क्रमेण निराकर्तुमाह तदभावरूपादिना एवकारेण न दीक्षितस्यान्नमश्नीया
दित्यत्र पर्युदासेपि नातिरिक्तं कारणमिति निरूपितं स्वीकृतमाह विरोधाधिकरण एव तन्नि
मित्तत्वेन विकल्पप्रसक्तिः उपपादितं च न्यायसुधायां कयोत्तरमर्थप्राप्तदीक्षितान्नभोजन
निषेधपूर्वं च प्रतिषेधगतस्याक्रीतराजकस्येति विशेषणस्यानर्थक्यापत्तेः शास्त्रानुज्ञातन्तु
निषेधस्याभ्युपगमनीयत्वाद्विकल्पप्रसक्तिरिति ननु स्वीकृतेपि पर्युदासे विकल्पः स्यादेव

अशितव्यं वपायां कृतायामित्येतेनैवापि ब्राह्मणगतत्वाच्छास्त्रस्याग्नीषोमीयसंस्थावधि शास्त्रविमर्शु
हासां च स्यादिति चेदुक्तिर्न नः परिहृतत्वात्तावद्राजन्यस्य निरूपितो विकल्पः पर्युदासेन न च कश्चिद्दोषः
परिहर्तुमशक्योऽस्ति नापि परिहर्त्तुं न शक्योऽपि परिहार्य्यः कः पुनर्निषेधपर्युदासयोर्भेद इत्याशंक्या
ह पर्युदास इति अत्रोत्तरत्वेनाव्यवहितोच्चारितत्वं नदीक्षितस्यान्नमश्नीयादिति अत्र नञो व्यवहि
तथात्वमस्य नञ्यस्यापि पर्युदासत्वात् अतो व्यवहिताव्यवहितसाधारणोऽन्तरोच्चारितनञक्रियार्थ
कपदमुत्तरपदत्वाद्देनशाब्देन विवक्षितं तेन निषेधे पर्युदासलक्षणप्रसंगः नेक्षेतनानृपाज्ञे
क्षितत्वाद्युदाहरणगतोऽन्तर्गतदर्शनमनुष्ठानस्यैवेदं वक्तव्यं नस्त्वाप्ता वार्थकपदान्वयः पर्युदास इति वोभ्यं
नेनान्यत्र प्रसक्तेंगिरसां गणादित्वादेः सिद्धपर्युदासस्य नामधेयग्रहः नापि दीक्षितो न जुहोतीत्या

सूत्रकाराद्यभिमतस्साध्यपर्युदासस्य इत्याशाविन्यादिनामद्यश्रीयादेकादश्यांनभुंजीतेत्यादि
संग्रहः अनएवनस्यव्रतमितीतिकरणेः प्रकारार्थः उपक्रमादितिवोपलक्षणं अनुष्ठेयार्थ
कपदसमभिव्याहारादित्यर्थः उपसंहारगतं हि पर्युदासनिमित्तं भूयस्त्वेनशास्त्रांतरसंवादेन
चानुगृहीतमेवोपक्रमेलक्षणयापर्युदासमापादयितुमलंधा विलंबं च उपक्रमगतंतुवेदाधि
करणन्यायेननिरपेक्षमेवतत्रालंक्षोत्सर्गिकं वेत्यभिप्रायेणपरमसकृदुपक्रमोपन्यासः
चैवंतस्यपर्यायोपिविकल्पस्यस्यपर्युदासनिततत्वं तथावसरेवक्ष्यामः क्रतुर्थोर्थइति आकरणीतिमनु
स्मृत्येदं वस्तुतोद्वतशास्त्रस्यसंकल्पश्रवणाद्यः तथासत्येवकेशान्निवृत्तेपीतस्मशूलिवापपी
नाधः शयीतेत्याद्यनिषेधवाक्येषुकल्पस्तत्रस्मृतिव्याख्यानेणासंकल्पलक्षणोक्तिर्निबंधान

अभिधानादिति तल्लाभादित्यर्थः साकांक्षत्वेन अपरिपूर्णत्वेन ननु तस्य ज्ञातमित्यपरिपूर्णत्वेनैवानु
छेद्यविशेषः कल्प्यो ऽत आह किंचेति नामधात्वनुयोगिनोऽस्त्वनुपायत्वान्नामयोगिनो न तस्याव
बोध्यमर्थमाह वदन्तीति अब्राह्मणाधर्मविवित्यत्र क्रमेणान्वयमात्रं वदतां नियोजना ननु
ब्राह्मणइति पदाद्ब्राह्मणान्यइति प्रतीत्या श्रयणे पूर्वपदार्थप्राधान्येन समासे समाश्रितं स्या
त् नैवेन धर्कं केवलं तत्र तत्पुरुषसमासस्यापि लिंगसंख्यानन्वयप्रसंगात् अनेकमित्येक
वचनानुपपत्तेश्च अत्र सर्व इत्यादिवदसर्व इत्यादावपि गुणभूतस्यापि सर्वादेः सर्वनामसंज्ञा
भावेन तत्प्रयुक्तस्मैस्मादित्यत्र कार्यस्यासंभवापत्तेश्च अतो नञ आरोपितार्थत्वमाश्रित्यो
त्तरपदार्थप्राधान्याश्रयणेनारोपितो ब्राह्मणोऽन्यथार्थो वक्तुमुचित इति वेत्र त्वयारोपितमि

हरजतं वस्तुतस्तु रजतमेतदिति प्रयोगानुपपत्त्यापत्तेः न तस्मिन्नेव वाक्ये वस्तुतस्त्वारोपितं
रजतमेतदिति प्रयोगः संभवति किंवारोपितत्वाधिकं ब्राह्मण्येष्वनारोपितब्राह्मण्येषु च
ब्राह्मणेभिन्नेषु संनिहितेषु अब्राह्मणानामनपेतुकेषु ब्राह्मण्यारोपश्चासीन्नेषामेवान
यनं सिद्धमन्यान्येषां कृते संबंधनं नेष्टेवारोपस्य स्फुटत्वेनोपलक्षणेनत्वप्रतीतेः किंवा ब्राह्म
ण इत्यत्र नत्वाकमारोपितत्वं प्रतिकाविधव्यक्ति विशेष्यतया प्रतीतेन न सर्वाः अथवा
ब्राह्मणत्वजातिः नाद्यः यतस्तथा सति न व्यक्ति प्रतियोगिक एव भेदः प्रतीयेत नान्यव्य
क्ति प्रतियोगिकः न द्वितीयः अब्राह्मणे शाब्दस्य नित्यवत्कुत्र नित्यवत्कुत्रवनांतप्रापत्तेः
न तृतीयः निष्कृष्टब्राह्मणत्वविशेष्यकपरीतावेव पर्यवसितता स्याद्ब्राह्मणशाब्दस्य क्षति

311

यादिपदसामानाधिकरण्योऽसंभवापत्तेः । आरोपितत्वविशिष्टज्ञानिप्रकारिकस्यामारोपा
धिष्ठानभूतक्षत्रियादिविशेष्यकायांप्रतीतावेषपर्यवस्यतीति चेन्न । अभावत्वाविना
नआरोपितत्वलक्षणाब्राह्मणपदेन निष्कृष्टज्ञातेर्लक्षणा क्षत्रियस्य च लक्षणेति ल
क्षणाद्वयापत्तेः । अनेकमित्येकवचनानुपपत्तिश्च तादवस्थ्याच्च एकत्वारोपाबाधिष्ठानत्वेहि
द्वयोर्बहूनां वा स्यात्तत्रैकवचनोपपत्तिः । अतः पूर्वपदार्थप्राधान्याश्रयणेन ब्राह्मण
न्य इत्येवार्थो वक्तुचितः न च तथा सति नञ्समासे लिंगसंख्यान्वयानुपपत्तिः केवलस्य न
ञोऽसत्त्वभूतार्थाभिधायित्वेऽपि समासांतर्गतस्य सत्त्वभूतार्थाभिधायित्वम विष्यतीति महा
भाष्यकैयटाभ्यामेवनापरिहारात् । अनेकमित्यत्रत्वनिर्द्धारितविशेष्यकत्वेनैकनेकवच्चे

३२१

मित्यनेकृताभवतास्तुपेयं उक्तन्यायात् किंप्रधानोयंसमासः उत्तरपदार्थप्रधान इति भाष्य
स्यपरिकोषित्तरपदार्थप्राधान्यविधित्वाश्रयणेन त्वपरिहृतापरिहृतनसमस्तानुपपत्तिपरि
हारः यथा हि विशेष्यार्थकस्याप्यप्रथमादेः प्रथमानिर्दिष्टं समास उपसर्जनमिति पारिभाषि
कोपसर्जनत्ववशेनोपसर्जनं पूर्वमिति तथा विशेषणार्थकस्यापि नञ्समासोत्तरपदस्यपा
रिभाषिकप्राधान्यवशेन संभवत्येवातः स्मिन्नित्यादि न त्वप्राधान्यपरिभाषाकल्पनमवदा
ष इति शंक्यं निर्विभागपदत्वत्वादिभिः परैरपि पूर्वोत्तरपदार्थप्राधान्योक्तेः पारिभाषिक
त्वस्यैववाच्यत्वात् पक्षायथोक्तकेवलनिष्ठनेगतिनिवृत्त्यर्थकत्वेपिप्रतिष्ठनेदस्तत्रप्र
प्राह्यत्वानिन शक्तिकेन नैनैवगतिबोधात् तथैव नञो घोनकत्वाश्रयणे प्रास्त्रणपदेने

312

बह्वाह्मणान्याय इति श्रुतीनेः संभवति निर्वाह इति नास्माकमेतत्स्वतीति निर्वाहाय पूर्वपदार्थप्रा
धान्यमेवत्र्यादरणीयं दर्शितं चास्य पक्षस्य महाभाष्याभिप्रेतत्वं कैयटेनास्मिंश्च पक्षे ऽब्रा
ह्मणशब्दो ऽन्यमात्रं वदति अधर्मशब्दो विरोधिमात्रं वदतीति फलितो यां ऽपरन्यत्वं प्रसंगाच्चिंतया
स्मरणमिति न दन्धेत्यादिशंकावादिदर्शितेति हृदि स्मरणमित्यर्थः अविधेयावादिति विध्ययोग
त्वादित्यर्थः नान्यूयाजेष्विति यथाभाष्यं करोत्यंतवाक्योदाहरणेनैतत्सूचितं नेचात्रानुषंग
प्रसक्ति नापि पदैकवाक्यत्वसंभव इति तथाहि भाष्ये एषसमद्गदेशाय ज्ञे षेन्द्वापत इति वाक्यं
पेयज्ञामह विधायकत्वानोदाहृता नान्यूयाजेषु येयजामहं करोतीति वाक्यं निषेधकत्वेनो
दाहृतं न्यायस्तु धाकृतस्वभृतिभिरपि दाशमिकाधिकरणे शशरं दर्शयाद्भिरिस्यमेवत्राक्यं ३१२

पर्युदासहत्तं एवं चोत्तरवाक्य एवाज्ञानस्य करीत्यस्य कुतः क्वानुषंगः कथं वा वाक्यत्वः करोती
ति भिन्नक्रियापर्यवसितयोः पदैकवाक्यत्वं असति च तस्मिन् कथं श्रुत्यन्तरबलेन पर्युदास
लाभः सत्ता वैकवाक्यत्वतन्मूलकपर्युदासयोरननुयाजेषु यज्ञेषु सत्त्वदर्शनाद्यायतत्त्व इति शा
स्त्रेणाश्रावयेत्यादेरप्यनुयाजेषु निवृत्त्यापत्तिः यजतिषु येयजामहं करोतीति वाक्ये नैव सह
मयैकवाक्यत्वमनुपपन्नस्तन्नानत एष पर्यनुयोगः संभवतीति चेत् कस्यांश्च शाखायामनुपलब्धमी
दृशं वाक्यमापुच्छता मीमांसकम्मन्येनापृष्टत्वमिति चेत् किं तदीयाकरसूत्रान्तं नाश्रौषीः यथै
वर्हिर्योदीक्षितो न यदग्नीषोमीयं पशुमालभेतेति वाक्यविषयत्वेनोदाहृत्याग्नीषोमीयेन पशु
नायजेतेति वाक्यं न्यासस्सिद्धमादाय विचारो दृश्यते न चैवमप्युदाहरणाधिकरणकारकमेव वा

313

क्यद्वयमुदाहृत्य येयजामहे इति वाक्यद्वयेन निषेधपर्युदासविचारसिद्धे येयजामहमात्रज्ञाप
कत्वेन कॢप्तिं न्यायजन्यां करोत्वंतं वाक्यमादाय विचारो दृश्यते न चेदृशवाक्यमादाय ता
त्विकवाक्यानुसारिन्यायोपन्यासो विदुषमुचितः भवतु वा साधीयानेष वाक्यपाठः कथं तु यु
त्पत्तिलभ्यः पर्युदासः न हि सुंदरे गृहे यं न तिष्ठतीत्युक्तेऽवश्यमसुंदरे गृहे तिष्ठतीत्येव बोधो
भवतीति केनापि स्वीकर्तुं शक्यं न न वा सिद्धापीदृशप्रयोगात् अस्तु वा पर्युदासस्य लभ्य
त्विलस्यत्वं तथाप्यनुयाजभेदविशिष्टान्यागानुद्दिश्य येयजामहविधावुद्देश्यविशेषण
स्यानुयाजभेदस्याविवक्षा न वानुयाजभेदस्यैवोद्देश्यतावच्छेदक इति शक्यं वक्तुं नारिष्टहो
मादिष्वेयेयजामहप्रसक्तेः एतेन मीमांसकैकदेशिनोपि पर्युदासहेतुत्वेनैकवाक्यतामव

एकवाक्यतामेवयेमन्यंते तेत्यद्विपदैकवाक्यतां तथामन्येरन् तदा निरस्ताः किंत्तउपात्तवंतीत्य
त्रात्र शब्देन वा तुमर्थस्यानुद्दिश्य विहितोऽन्तरवेदिर्नवैश्वदेवे उत्तरवेदिमुपवपंतीति नशुनासी
रीयस्तेनाम्नोमाघोऽन्नमपवंत्यां पर्युदस्यतइति साप्तमिकाधिकरणे भाष्यवार्त्तिके चोक्तं
नत्रपदैकवाक्यतायामुद्देश्यविशेषणद्वयाविवक्षानिमित्तं वाक्यभेदद्वयमापद्येत वहव
श्चग्रंथास्तन्मतेतुपर्यन्नामवेयुः तथाहि नानूयाजेष्विति पर्युदासविषयाधिकरणस्यावि
षयांतरेन होतारं वृणीन इत्यत्रातिदेशिकहोतृवरणपर्युदासत्वेनाभिमनेति देशेनैव
सह पदैकवाक्यता वाच्या न त्वसौ संभवति आम्नानयोः समीपाम्नानमंतरेण पदैकवाक्य
तासंभवात् अन्यथाहरम्यस्यापिस्तावकत्वे नैकवाक्यत्वापत्तेः आपद्यतामितिचेन्न

जायमानो वै ब्राह्मणस्त्रिभिरिति वाक्यशेषवशेन सोमे ब्राह्मणमात्राधिकारापत्तेः एवं ज्यायस्त्वधा
रूनमतेन प्रथमयज्ञे वृहज्ज्यादित्यग्निमुहंजतीति च्छुनारम्भेवादपर्युदासे पुनारम्भवादेन सहप
दैकवाक्यत्वानुपपत्तिर्दर्शिता नवमेव पार्थसारथिप्रभृतीनातीनामिह पर्युदासानंगीकारे वीज
मितिशंक्यं न त्र्यवीजांतरस्यानुपदं वक्ष्यमाणत्वात् किंच संक्रांत्यामुपवासं च कृष्णैकादशवास
रे चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृही नादिषु नारदीदिवाक्येषु शयनीबोधनीमध्ये या कृष्णैका
दशी भवेत् सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचनेति भविष्योत्तरवचनेन प्राप्तस्य गृहि
णां कृष्णैकादश्युपवासस्य पुत्रवद्भिन्नविषयत्वेन पर्युदासो बाध्यन इति हेमाद्रिणोक्तं न त्वेक
थं नेषां तस्य च पदैकवाक्यतोपपत्तिः भिन्नग्रंथगतत्वात् भिन्नविभक्तेन दृष्टह्नि दृष्टह

भिन्नविभक्त्यंनग्रहेहिगृहस्थपद्योपेतत्वाच्च नद्युपपन्नौवातुल्यन्यायतयास्वीकार्यस्यवंद्रस
येपरागनिमित्तोपवासेपिपुत्रवत्पुदासस्यत्राप्युक्तेनतस्यापकेरेवग्राक्येसहैकवाक्यता
स्यात् संतिहि अपरेविष्णुदेवेवचंद्रसूर्यग्रहेतथा अहोरात्रोषितस्नात्वासर्वपापैःप्रमुच्य
तइत्यादीनिविष्ण्वादिवचनानितादृशानिहेमाद्रिणोदाहृतानि ननुसूर्यग्रस्तास्तइत्याद्युप
वासंज्ञापवासंज्ञापयप्रोक्तासूर्यग्रहेतुनाश्नीयाद्दाघंयामथवानुष्ठ्यामिति अत्र विमुक्तास्तंगतयोः
दृष्ट्वास्नात्वापरेहनीति दृढगोनममास्यवबोध्यां मास्कृतामामेकवाक्यतेतिवत्तन्न त
थासतितात्म्यांशोपितोपवासस्यपुत्रिगृहिणास्वीकारेबाधकाभावेन हेमाद्रिणैवपुत्रि
गृहिणउपवासनिषेधवर्जनेनतद्वाक्यद्वयप्राप्तितोपवासस्यापपन्नशंकाशाधरशिनाय

भाद्र॰
३१५
315

अनन्तसमाधानायसमायाक्केसंगवेश्रीयाच्छारदेसंगवादधृत्त्वादिस्मार्त्तेविवनस्यवेधसंकोच
बोधकस्यपुत्रिगृहिविषयत्वमुक्तेनदभयमप्यनुपपन्नंस्यात् यदित्तुहोमानुवादेनदध्या
दिगुणविधिवदुपवासानुवादेनपर्युदासविधिमाश्रित्योपवासज्ञापकत्वेनवाक्यैकवाता
श्राश्रीयतेनदानुवादस्यग्राहृादर्थाच्चप्राप्तोपवासविषयत्वसंभवाद्धक्यतेनद्वुभयमुप्प
पपादयितुं अथैकवाक्यतामेवपर्युदासहेतुत्वेनस्वीकुर्महइतिचेन्न यद्यपिहियद्यजा
मुहूर्ताप्रापकविधिनासहनान्वयाज्जेष्ठित्यस्यसंनिधिपाठोस्ति तथापिवाक्यैकवाक्येनापू
कोलाभोयदर्थंपर्युदासः कल्प्यते नतावत्पदैकवाक्यतायामिवानेकतात्पर्यकल्पनागौ
रवपरिहारः अन्यैकवाक्यतायागौरवतात्पर्यभेदकल्पनायाश्चावश्यकत्वात् अस्तुतमहा

३१५

वर्णाश्रमस्या नर

वाक्यार्थगोचरस्यान्यवाक्यान्वयेनान्यार्थस्य कल्पने गौरवाधिक्यात् नववेयं यज्ञामहविधिः प्र
करणे न याश्रितः येन प्रकरणानुग्रहायापि समाश्रीयेत मार्हस्यैकवाक्यतायाः पर्युदासहे
तुत्वं कथं तु विकल्पप्रसक्तिः कथं च तथा पर्युदाससिद्धिरित्याशंक्य विकल्पप्रसक्तिमु
पपादयितुं तथा हीत्यादिना शाप्तमिति श्यत्रानिर्निषेधस्येष्टसाधनत्वप्रतीतिः प्रकर्षश्च
तस्याः प्रमात्वं प्रवृत्तिफलत्वेन वप्रतीयमानत्वं प्रतिषेधस्यानन्तरं वैदिकस्यातिशेषः यद्वि
षयेष्टसाधनत्वप्रमायां पुरुषीयफलोपहितावगताभवति न निषेध एव तदधिकारिको वैदि
कः संभवीनीत्यर्थः प्रमात्वापेक्षामुपपादयति श्यत एवेति वेदपुराणेतिहासेषु लोकांत
रस्थानामिंमिंद्राक्षीणां यज्ञानुष्ठानमश्वमेधादंतरिक्षघुलोकाधिकरणकत्वयनं तेषां श्रेयः

साधनमितियेऽभ्याम्यंतितद्दर्शनेनरत्नाद्दशावचयनस्येंद्रादिप्रवृत्तिविषयभावंसंभावयंति तत्कुमाप
नयनेनसंभवत्प्रतिषेधत्वस्यापिनांतरिक्षइत्यादेरर्थः प्रतिषेधत्वानंगीकारः सप्रमारूपापिं विना
निषेधानुपपत्तेरेव अन्यथानस्यानित्यानुवादत्वेनस्यादित्यर्थः प्रवृत्तिफलोपहितत्वापेक्षामुप
पादयति अतएवेति पुरुषइत्यनंतरं हननेष्टसाधनताप्रमावानपीति शेषः प्रमाणेति अनि
ष्टेति स्यानिष्टानुबंधित्वस्यनिर्णयजननेनेत्याशयः पुंसेतिप्रवृत्तिः प्रमाणान्नतनोनिवर्त्यत इत्यर्थः
यथाऽहि सिद्धविध्यत्रैवर्णिकाधिसमर्थत्वप्रमाणप्याः क्रतुविधयोनच तुर्थप्रति प्रवर्तंते वि
धाक्षेपायासमगोरवत्सयात् नथाऽनिष्टानुबंधित्वसंशयेनाप्रवर्तमानंप्रतितन्निश्चयज
जननेनसंभवत्प्रामाण्यानोनिषेधानांनानिष्टानुबंधित्वनिश्चयेनप्रवृत्त्यांप्रतिपदंतिरूपिता

तन्निश्चयबाधेऽत्यंतानिष्टस्यानिष्टानुबंधित्वस्य ज्ञाप्यलेवगौरवातिशयादित्याशयः बोधकत्वमि

त्यनंतरमपियुक्तमितिशेषः अपश्वतंत्रत्वेवतत्सत्त्वेनोभनियमप्रत्वंस्यादित्याशयः भवत्वेवंरूप

सपक्षत्वं निषेधानांतथापिहननिषेधइष्टविषयेपजामहनिषेधेपिनविकल्पप्रसक्तिरतआह साबेति

भ्रांतिरनुष्ठानुबंधित्वभ्रांतिः इष्टसाधनत्वस्येष्टसाधनत्वज्ञापकस्येत्यादिः तस्यात्स्यनबाधेहिसत्यपनु

पाजरूपेष्टसाधनत्वज्ञाप्ये भ्रांतित्वंवाच्यं तथासतिपूर्वोक्तज्ञाप्यज्ञाभावेनिषेधएवदुःस्थितः स्यादि

त्याशयः कौडिन्यदृष्टांतेनपूर्वशंकितंसामान्यनिषेधबाधंनिरस्यति नवेति निषेधस्य वैदिकनि

षेधस्येत्यर्थः इतिशाङ्कः प्रकारघाती विधेरिष्टसाधनत्वज्ञमितेरित्यर्थः अयमाशयः वेदवाक्या

नांसर्वदासर्वपुरुषान्प्रत्येकरूप्येणैवप्रामाण्यंवक्तव्यं ग्रहणधारणाध्ययनविधिस्पान्तथैवापि

मा०
३२७
317

त्रणात् एषा वानाहितान्मेरिष्टिर्यद्यत्तुहोतारः स्येत ज्ञो वरषाष्ठन्यायाच्च निषेधनिरूपणावसरो
कन्यायाद्वक्ष्यमाणन्यायेन च नञभावेऽनुवादतया प्रतीतपदार्थमध्ये कस्यापि सन्निधिनञ्जितत्वश्चोप
बंधेन निषेधान्तयारूपविषयताऽसंभवाच्च नानुयाजेषु येयजामहं कुर्यान्नेतिवचनस्य च क्ति निषेधप
रतेवाच्या ननु नञभावेऽनुयाजेषु येयजामहं करोतीति वचनस्योपसंहारार्थं स्यात् तत्र चानुयाजो
द्देशेन येयजामहस्याग्नेयोद्देशेन च तद्वाकरणस्यैव विधेयत्वात् सन्निधिनञ्जितनिषेधत्वमिति चेन्न
न समानशास्त्रीयेऽपसंहारविधाव तावतात्पर्यविषयस्याप्युद्देश्यविधेयभावस्य शास्त्रान्तर तात्पर्य
प्रतीतस्तु प्रापमात्रतयोपन्यासात् नञभावेनाक्तितस्य वास्तवोद्देश्यविधेयभावस्यैवसन्निधिनञ्जि
देश्यनिषेधभावनियामकत्वात् अतउक्तविधएववाक्यार्थो वाच्यः ॥ शावाक्यार्थबोधश्चकु

३२७

यदित्यंतावांतरवाक्यार्थप्रसिध्यधीनः अप्रसिद्धस्यानुवाद्यत्वयोगात् न च विशिष्टानुवादे वा
क्यभेदवशेन येयजामहमात्रस्य निषेध्यत्वात्तावांतरवाक्यार्थप्रसिध्यपेक्षेतिशंक्यं नैमित्तिकवै
दिकत्वेन निमित्ताभ्युदानेकृत्वपूर्वसाधनत्वात्मकविशेषसिद्धिवैदिकनिशेधवशेन निषेध्यस्य
कृत्वपूर्वसाधनत्वात्मकविशेषसिद्धेरन्यथांऽपरस्थेति वाक्यपाडिने ष्ट्याद्यपूर्वसाधनस्यैव येयजा
महपदेनानूयाजापूर्वसाधनत्वोपहितस्यैव येजामहस्य विवक्षापांनतत्प्रसिध्यपेक्षया त्राक्त्य
कृत्वात् नत्र निषेधप्रवृत्तेः प्राकृसामान्योशास्त्रतात्पर्यभ्रमोऽथ न तत्प्रसिद्धिमादायप्रवृत्तेनापिनि
षेधेन पदशास्त्रेणाहवनीयशास्त्रस्य पदहोमान्यविषयत्वमिवसामान्यशास्त्रस्यानुयाजान्यविष
यत्वं पदाद्यापनेन दायेजामहस्य समर्गस्यते तोऽप्रसिद्धेरन्यान्तश्च न तत्प्रसिद्धेरशंक्यत्वादप्रसिद्धस्य

वान्तु वाह्यल्ययोगात्कथमुक्तविधबवनध्यत्वाश्रयणेन निषेधप्रामाण्यमवतिष्ठेत न हि शशविषा
णभ्रमदशायां घटशाविज्ञानेन कार्मुकं कुर्यादिति संभवस्य हृत्ति कोऽपि निषेधस्तद्बाधदशायांश्च
भ्रितुमुत्सहत इति मृगतृष्णादर्शने बालोचनायं प्रनो निषेधेनैकत्वप्रामाण्ये करूपानिर्वाह्यसामान्य
शास्त्रस्यानुग्राहकत्वामहं संसर्गप्रामाण्यमनुमन्तव्यं न चैवं स्मृतिष्वपि प्राप्तिः प्राप्तस्य निषेधपर्युदासौ
नस्यातामिति शंक्यं एकरूपप्रामाण्यशून्यवाक्यानां तासु व्यवकुलत्वमुपलब्धः यथैवत्र व्यवव्यतिरेके
मूलकानि पत्रानुकूल्येदंपतो निर्विकल्पगस्तत्र वर्द्धनशन्यादिवाक्यानि प्रत्ययाद्यालोचनाकुशलान्प्रति
प्रामाण्यमनुभवन्त्यपि तदालोचनकुशलान्प्रति न प्रामाण्यमनुभवन्ति प्रामाण्यमनुभूय बाधदशायामना
नुभवेयुस्तदानस्त्वतिः न त्ववेदवाक्यस्यैवंविधता न त्वेकरूपप्रामाण्यपेव प्रामाण्यस्य वरं कुरुतुवितलान्

तथा यदि कानिश्चितमेव प्रामाणिप्राप्तदशायां २

न्यथैर्षगुणविधिशेषउत्पत्तिविधिशेषनित्यानुवादस्तन्नियमस्योच्छेदापत्तेः पुरुषभेदेन कालभेदेन
चोत्पत्तिवैचित्र्यस्यानिवार्यत्वात् नचैवं दीक्षितो न जुहोतीत्यादावपि विकल्पापत्तिस्तन्निरासस्या
नुपदं वक्ष्यमाणत्वादिति फलितमाह एवं चेति भवतु विकल्प इत्याशंक्य तस्य दूषकतावीजमाह
सचेति भावाभाववाचिनोर्नञ्यजत्योराक्षेपाः कथं संबंध इत्याशंक्याह नञनुयाजेति नतोपशोके
रोतीत्यत्र प्रयोजनासंभवेन पर्युदासाभावं प्रकृते समर्थयितुं प्रकृते वाक्यार्थशोधनपूर्वकं पर्युदास
प्रयोजनमाह सुत्रेचेति यथायेजामहेयज्ञसामान्यानुवादेन विहितस्तथाय्याजऽभागो विहितोऽस्यानं
नदानन्दिधेर्विशृपसमर्पणायपश्चुवर्जमिति पर्युदासस्याश्रयेत नचैवं उपदेशाविधेर्दर्शपूर्णमासमा
त्रविषयत्वात् अतिदेशस्य चतन्नान्धिकृतिविश्रान्तत्वात् नचवनार्षेयं वृणीतेत्यत्रवदाज्यभागवर्जमपि शो कुर्या

भाट्टा

दित्यतिदेशविषयसमर्पणस्यैव पर्युदासदाश्रयणे संभवः तथा सति तेनोपशोकरोतीत्यस्य तु पा
शुकातिदेशप्रवृत्तस्य तु तत्र प्रवृत्त्यापत्तेः अस्तु न तर्हीति चेन्न शास्त्रीकाज्यभागविधिमात्रं न्यायमसाधा
रण्येनाज्यभागोपस्थितिमपेक्ष्य प्रवृत्तं तेन ताविति पदेन पुरोक्तस्याप्यशास्त्रस्य समस्तोपदेशप्रवृत्तस्य तु त
स्माद्विवापाशुकातिदेशोत्तरप्रवृत्तस्य संभवात् न च निषेधस्यापि प्राप्तिसापेक्षत्वात् पाशुकातिदेशोत्तरप्र
वृत्तित्वं तु न्याय्यमिति शंक्यं पशुसत्त्वे तेनोन कुर्यादिति पश्चात्तुवादेनाज्यभागवर्जनमंगत्वेन बोध्यन्तोऽस्य
प्राप्तिर्हि पशुप्राप्तिमात्रसापेक्षत्वात् माविप्राप्तिसंभवेन तु प्रयोजनत्वात् पर्युदासपक्षे त्वतिदे
शविषयसमर्पणनिर्वाहाय प्रत्यक्षेणोन हि कुर्यान्निदाज्यभागवर्जमित्येवं वचनव्यक्तेरुक्तत्वात् त
न स्यात्प्राप्तिस्त्वातिदेशसापेक्षत्वादित्याशयः पर्युदासाश्रयणे वा कथं न विकल्पः इत्याशंक्याह ए

वंचैवेति शास्त्र इति शास्त्रानीत्यर्थः नचैवं नसोमेध्वर इत्यत्रापि पर्युदासापत्तिः पर्युदासस्थले वाक्यार्थ
बोधनिर्वाहाय शाक्तिस्तद्वशास्त्रानपेक्षत्वेपि प्रयोजनवत्वनिर्वाहाय तद्व्यतिरेके पर्युदसनीयगोचर
संभावितशास्त्रापेक्षत्वात् इह च तदभावात् नन्वेवं व्रीहियववि कल्पपरिहाराय यवशास्त्रेपि यवशास्त्र
व्रीहिशून्ययवसाध्यविधानार्थः स्यात् समापत्तं त्वापि गौणी पर्युदासस्थलीयलक्षणावद्दोष इत्याह
लक्षणयेति वाक्यस्यानन्तरं स्वार्थ इति पूरणीयं नानूयाजेष्विति निषेधादिविषयकामहनिदृष्टिरनु
याजेषु तात्पर्यणाश्रयते नचलक्षणया पर्युदासाश्रयणे साम्यमुपेत आपाक्षिकत्वसिद्ध्यावस्तुतरां
तन्निर्वाहात् अतस्तात्पर्यविषयतयाऽनीयमानार्थगोचरशास्त्रमाप्यसिद्धत्वं गुणायालक्षणायाद्वे
दोषमाश्रयेत्यर्थ इति न्यायेन वेदानुमतत्वाद्दोषत्वं पवशास्त्रे पवानां नित्यवत्साधननानात्वेण

इतीयते गौणीवाश्रीयमाणानां बाधेनैवेति नञो व्रज्ञामात्यप्रसिध्यननुगुणोयास्तस्याबेदाननु
मतत्वाद्दोषत्वमित्याशयः न च शास्त्रबाधवेलायामवोध्यायां फलत्वेनार्थात्सिध्यत्यामविनिवृत्तौ
नानूयाजेष्वित्यस्य कथं प्रामाण्योपपत्तिरिति शंकां हंत्यादि विधेर्नियमादावि वतात्पर्यविषयो
त्वेन तस्यांशामाण्योपपत्तेः न्यायसुधाकारोक्तं परिहारमाह नन्वात्रेति नह्येषणीयसंज्ञदायम
नमाह अन्ये त्विति हृष्यइतिसंकोचवर्नरूप्यतः नेनेत्यर्थः विशेषं प्रति पारार्थ्यज्ञापनात्मकइत्या
शयः अभ्युदयनिफलेत्यात्मप्रमाणांतरत्वरूपभेदाभावइत्यर्थः मात्रत्राशशोभिन्नक्रमस्त्वार्थवाची
च विधानमात्रादिति यद्विसंकल्पःसामान्यतःफलसाधनत्वेन विहितस्य निह पापश्रयार्थत्वे
न विधीयते न तदासंभवे ह्यपि तत्संकोचः नचैवमस्ति इहैवसंकल्पगोचरे विधिवत्तु प्रयांगीकरणा
दित्याशयः प्रमुनविधेरुपसंहारविधित्वाभाव एव विरोध इत्याह विध्यभावइति ननु पर्युदास

नस्वयमेवविज्ञायविशेषविधिसमर्पणान्नविधिरपेक्ष्यतेऽतः अनोप्यविवक्षितोऽत आह नचात्रेति
नास्तीत्यविवक्षितत्वमित्यर्थः फलाभावादविवक्षाञ्जमानपक्षद्वयादिवत्पर्युदासस्यतद्युक्तिविधानक
त्वेनेत्यर्थः अत्रहीति समर्पकत्वम्पर्यन्तरंरतिसत्यमितिशेषः पारार्थ्यबोधनेविमर्केरिवोपसंहा
रेविधिसहकारित्वेनैवविशेषोपस्थापकपदस्यामित्रबिंदादिप्रकरणस्यवाप्रामाण्यंनतुस्वातंत्र्ये
णपारार्थ्यत्विती निमूलकत्वादुपसंहारस्येत्याशयः विधिविरोध इति पर्युदासोहिस्वाक्षिप्रमाणावि
कल्पपरिहारेणनित्यवन्निवृत्तिफलकोवाच्यः नचैषपर्युदासस्तथावक्तुंशक्योतेव्रतस्यविधिवि
रोधादितिभावः अत एवेति अनेनैवप्रकारेणानर्थकविरोधादितिनिर्पवर्यतेनान्वेति अनश्चेति
वाभिन्नक्रमः अत्रचेति यथात्रपर्युदासकल्पनानिमित्तेसत्यपितदनुपपत्तेनिषेधस्तथाक्तेऽपि
स्यापिपर्युदासस्यक्कचिदनुपपत्तेनिषेध एवयथासंहृत्रसवत्सरममनुष्याणामसंभवादितिको

नीसूत्रे व्याख्यानं वत्तथाककर्कार्वार्थैरित्याशयः यत्रेत्यनंतरं क्वचिदर्थ इति शेषः तूपलक्षणं चैतेन तु श
पार्थविकल्पापादको पि यत्र निषेधस्तत्रापि न जिनिषेधस्यानर्थहेतुत्वं निषेधस्यानावश्यकत्वा
ज्ञानप्रयुक्तत्वात् अत एवाह यत्रेति प्राप्तिश्चरागतः स्वस्य प्रयोजनकथनमात्रेण दीक्षितो न जुहो
तीत्यादौ विकल्पापत्तिं निराकरोति दीक्षितस्येति ननु यावज्जीवमग्निहोत्रं जुहुयादित्यादेर्दीक्षितो
रविषयत्वेन संकोचे प्राप्त्यभावान्निषेधानुपपत्तिः स्वसंकोचे मानाभावाच्छास्त्रप्राप्त्यां तु निकवाधाया
गादवर्जनीयाविकल्पापत्तिरिति चेन्न स्यादेवं यदि यद्दीक्षितो न जुहोतीति वचनं यत्ति
रात्रीयेत्तेन न चैवं यद्दीक्षितो नेति होममात्रप्राप्तिसापेक्षयावचनश्रुतेराश्रयणात् तथाहि
नञ्भावे यद्विधाहेयोग्यं स्यात्पितस्मिन्न नघच्छेदोपबंधेनानुवाधकोदितिशिष्टतयाशंकादर्शै

घितुमिति नञ्भावेन स्वक्षोपबंधेन यथा विधेयं भवति तथा सति तस्मिंस्तच्छक्षोपबंधेन निषेध्यतां
प्रतिपद्यते विधेयतात्मिकोयाऽवनिषेध्यतात्मिकाया अपि विषयतायास्तद्वपबंधादिनाऽर्थविशे
षेऽनुभवसिद्धत्वात् यदि च दीक्षितोऽजुहोतीति स्यात्तदा याचञ्जाव विधिनापि होमं प्रति दीक्षावि
शिष्टकर्तृगुणभावाशापत्तेर्होमोद्देशेन दीक्षित एव विधेयः स्यात् अतः सति नञि यजुर्होतीति
होममात्रानुवादेन न दीक्षितो नैत्यंमस एव निषेध्यत्वेन वक्तुमुचितः तथा च होमशास्त्रिमात्रेण
प्रपन्नत्वादसत्यामपि याचञ्जाविधिना दीक्षितकर्तृकहोमशास्त्रो नानुपपत्तिर्निषेधस्य अस
तिवास्मिन्दीक्षितं प्रतिहोमशास्त्रिसंभवात् पुरुदासशास्त्रिवत्प्रयोजनसंभवः अत एव सोत्रः पुरु
दासव्यवहारः न च दीक्षितत्वेन रूपेण पुरुषस्य वाऽनुपाजत्वेन रूपेणानुपजानामपि संबंधाशास्त्र

भा
३२२

322

र्नन्तुयाजेष्वित्यत्रापि यदनुयाजेषु येयजामहं करोतीत्यनुवादानुपपत्तिशंक्यं यज्ञेषु येयजा
महः कर्तव्य इति विधेः अनुदृश्यसमाख्यानुयाजत्वेनानुयाजशेषित्वाप्राप्तिसंभवात् अग्निहो
त्रं जुहुयादिति विधेस्तु कर्तृविधेयत्वे सत्यपि दीक्षितकर्तृकत्वेन दीक्षितकर्तृकत्वाप्राप्तेः
न च नत्वेन दीक्षितकर्तृकत्वाप्राप्तावपि दीक्षाकालीनहोमप्राप्तिमात्रेण यद्दीक्षितो जुहो
तीत्यनुवादः किं न स्यादिति शंक्यं नञभावे प्रतीतावपि त्वं क्षोऽस्य विषयतायाः अत्र तन्निबा
धके त्यागस्याप्यन्यायत्वात् न दीक्षायाः उपलक्षणत्वसंभवोऽस्ति तस्मात् यावज्जीवविधेर्दीक्षिते
तरविषयत्वेन संकोचेऽपि यज्जुहोतीति न दीक्षितो नेति निषेधस्यानुपपत्तिः पक्षान्तरे वसंकोचो
न वशास्त्रप्राप्तस्य बाधप्रसंगः यदि हि यावज्जीवविधिकृतो दीक्षाकालीनहोमप्राप्तिमा

३२२

दायय दीक्षितो जुहोतीति नेति निषेधेन तस्य विधिर्दीक्षेतरकालावच्छिन्नजीवनमिनित्तत्वप
रतया संकोचः क्रियेत तदादीक्षाकालीनहोमाकरणान्न प्रत्यवायः तत्करणाच्चान पापस्य
प्रसंगेव सिध्येत ननु तत्करणाज्ज्योतिष्टोमवैगुण्यं उपजीव्यपाप्रसर्थमवश्यालोचनाय विधिसं
कोचे नैव निषेधस्य प्रयोजनं वक्तव्याभेदकरणेन कृत्वंगतत्कृत्यनातु स्यात् तथा च तत्करण
पापबाधापत्तिः अतो यो होमस्तं दीक्षितो न कुर्यादिति केवकोप्यत्रि सिद्धहोमस्य च रूपानुवाद
न तद्वर्जनरूपनिवृत्तेः समीहितसाधनानुबंधबोधकशास्त्रेण न हि द्वेशेषाकांक्षा पांक तु विधे
कवाक्यतांशाप्य वर्जनस्यापूर्वहेतुत्वं बोधयता प्रतियोगिनस्तस्य प्रतिबंधकत्वमापाद्यते
ननु विधेयंतत्संकोचः न मरणान्न बाधः न चैवं स्वकरणे प्रत्यवायपत्त्यायात्तद्दीक्षितो होमान्निवर्ते

निवर्त्तेति निःशंकं हिंसागोचरस्यास्योक्तन्यायेन ज्योतिष्टोमफलकामस्य प्रत्यवायमभ्युपगम्यापि
निवृत्त्युपपत्तेः महाभाष्यकारोक्तकूपखननन्यायेन वा तन्नस्यापि प्रत्यवायस्य प्रधानापूर्वेणा
भिभवेनाभ्युपगमात् ननु क्रत्वर्थहिंसाविधिना पुरुषार्थनिषेधस्यैवं क्रत्वर्थनिषेधेन पुरुषा
र्थहिंसाविधेरपि संकोचः एवं क्रतोर्नाभ्युपगम्यत इति चेत् न यतो निषेधस्य प्राप्त्यपेक्षायां
रागप्राप्त्योपपन्नस्यास्वत एव शास्त्रीयहिंसायामप्रवृत्तिं वदामो न तु विधिना तत्संकोचं ब्रूमः
इहापि यदि यावज्जीवविधिरकरणनिषेधबाधकः स्यात् तेनैव न्यायेन शास्त्रीयमकरणे नाविष
यीकुर्यात् करणविधिः स्वयं कथमकरणसंकोचं गच्छेत् अतो यथैकस्मिन्नपूर्वे पूर्वाङ्गेनैक
कामस्यानेककाम्येष्टिसंनिपाते तु युगपदनुष्ठानासंभवात्तत्फलत्व एवाकृष्टकामस्तत्तोन्य

323

त्र न प्रवर्त्तेत तस्यैव तानान्यशास्त्राविषयत्वः फलतो बाधो व्यवह्रियते तथा ज्योतिष्टोमफलार्थी
यदि नाग्निहोत्रे प्रवर्त्तेत नैतावता यावज्जीवविधेः कथमपि बाधव्यवहार उचितमर्हति कथं शा
स्त्रबाधनिमित्तविकल्पप्रसक्तिः । अमुनैवाशयेनोक्तं तुल्यार्थत्वाभावेनेति यो यावज्जीवविधि
स्तात्पर्यविषयः करणस्य प्रत्ययवाच्यहेतुत्वं स नैव प्रतिषेधस्य विषयो निषेधस्तेनेत्याशयः
विधेरनुवादकोटिनिक्षेपाभावेन पर्युदासतुल्यत्वात् सोत्र व्यवहारोपपत्तिः । एतेन यच्छ्राद्धं रात्रौ
न कुर्वीत यो यजेत स्तं माषैर्न कुर्वीतेति केवलं श्राद्धं पक्षं वानूपराह्णत्रिमाषयोर्यज्ञाङ्गत्वशास्त्रा
नपेक्षत्वमात्रेण तुल्यन्यायत्वोपपत्तेः । नन्वेवमपि न प्रथमयज्ञप्रसंख्यादित्यत्र नातीयसिद्धां
तो न संगच्छते । तथा हि वाक्यपादे संख्यायुक्तं क्रतोः प्रकरणात् स्यादित्यधिकरणेन प्रथमयज्ञे

प्रहं ज्यादि द्वितीये तृतीये वा प्रहं ज्यादिस्तु दाहृत्य चिंतितं किं प्रथमयज्ञेनोद्देशेन ज्योतिष्टोम एव द्विस्तु
नदीयसर्वप्रयोगे पुरुषवर्णो निषिध्यते उत नदीयप्रथमप्रयोगमुद्दिश्य तत्रैव सन्निधानादिति तत्र य
एतेनाग्निष्टुतित्यादिशास्त्रेण ज्योतिष्टोमे प्रथमयज्ञपदप्रवृत्तिनिमित्तावेगमात्रद्वाक्यशेषे चैवावप्रथ
मो यज्ञो यज्ञानां यज्ज्योतिष्टोम इति प्रथमयज्ञशब्दः शब्दस्य ज्योतिष्टोम एव दृष्टप्रयोगत्वाद्यज्ञशब्द
स्य च प्रयोगे लक्षणापत्तेः प्रथमप्रवृत्तिनिमित्तावि नः प्रथमशब्दस्य प्रयोगगोचरलक्षणायाश्च एव
शब्दस्य रथंतरादिष्विव वेदद्वैतत्वोपात्तदोषत्वात् प्रकरणानुग्रहालाभाच्च ज्योतिष्टोम एव प्र
वर्णनिषेधः ननु नारभ्याधीतस्य वृतीनि विहितप्रवर्ग्यस्य प्रकृत्याप्रतिनिषेधे कथं प्रकरणानु
ग्रहः पुरस्तादुपसदांप्रवर्ग्येण प्रचरंतीति क्रमस्त्रेण यत्रोपसदस्तत्रासाविप्रवग्गनेस्तासां

ज्योतिष्टोम एवोपदेशात्स्वीकृतो वाधिकृतत्वादिति न्यायेन ज्योतिष्टोमप्रकरणोत्पन्नविशेषवि
धेः समतिनिषेधस्यापि तत्रावुपदेशात् कौशीतकिब्राह्मणेन स्वीकरणे एव प्रवर्ग्योऽस्तीति विधेर्नि
षेधस्य च बाधात् । न च एवोपसंहारागत्वशंकापि निरस्ता तस्माज्ज्योतिष्टोमस्य सर्वप्रयोगेषु निषे
धप्रवृत्तिरित्याशंक्य सिद्धान्तितं प्रथमयज्ञस्याप्रवृत्तेः प्रवृत्तिर्वा विकल्पात्प्रयोगे नैव प्रयोगे प्रवृत्तेर्नेतु
स्यात् न त्वनुरोधेन वाजपेयन्याययज्ञशब्देन लक्षणेति न्यायादस्मिन्प्रयोगवाचित्वाद्द्वितीयतृतीय
राष्ट्रसामे ह च पूर्वेण प्रथमयज्ञशब्दस्य प्रयोगवाचित्वावसायात् प्रथमप्रयोग एव प्रवर्ग्यनिषेध
इति एवं सिद्धस्याग्निष्टोमप्रकरणकौषीतिने त्रिरीयान्काजानुवाकस्य कागतिरित्याशंकायामाह ॥
द्वितीयादिप्रयोगेषु समामानयशास्त्रेणैव प्रवर्ग्यप्राप्तेः प्रथमप्रयोगविषयमेवेतत्तत्र नतावद

स्यनिरवकाशत्वान्निषेधस्य विकृतिः प्रथमप्रयोगविषयत्वं ॥ अग्निष्टोमसंस्थविकृतिषु तु अतिदेश
प्राप्तनिषेधबाधेन सावकाशत्वसंभवात् य एजेनेति शास्त्रावगतप्रथमयज्ञत्वस्य ज्योतिष्टो
मादन्यत्रासंभवाच्च ॥ अथोच्येनाग्निष्टोमसंस्थप्रथमप्रयोगविषयेण तद्विधिबलादतिरात्रसं
स्थप्रथमप्रयोगविषये निषेधोऽस्तु ॥ अस्ति हि तस्यापि विधिः तस्मात्तु प्रथमं यज्ञमानोऽतिरा
त्रेण यजेतेति चेत् न निषेधस्य प्रकृति प्रथमप्रयोगद्वयविषयत्वे संभवति विधेः अप्रकृति
विकृति अग्निष्टोमसाधारणोपमितिविधिप्राबल्याश्रयणे तु निषेधस्यैव संकोचात्मकबा
धाश्रयणे नियामकाभावात् तस्मादग्निष्टोमपृथक्प्रयोगेन प्रथमयज्ञ इति निषेधाद्ग्नि
ष्टोमे प्रवृत्तौ कोऽतिप्रसङ्गः समवाद्विकल्पः ॥ अतिरात्रे तु निषेधप्रवृत्तेरग्निष्टोमत्वेन चप्रति

प्रसक्तत्वात्प्राप्तेर्नित्यमकरणं अथ यस्त्वर्जं तं तीत्यनारभ्योत्पन्नस्यापूर्वार्थस्याग्निष्टोमग्रहणं क्रौलि
विनियोगोक्तः तस्य च नानूयाजेष्विति न्यायेन प्रथमयाजवर्जमिति पर्युदासादग्निष्टोमापूर्व
मप्रयोगेपि नित्येन तन्न क्तोक्षितिकिरणस्वाम्नानवत् वसापुरस्तादुपसद इति वचसा वोक्तन्यायेना
ग्निष्टोमसंस्थस्यापो निष्टोमास्यापूर्वस्य क्रत्वर्थत्वसिद्धेरुक्तत्वात् एतेन साध्वदस्यन्यायेनानारभ्यवा
दोपसंहारार्थत्वमग्निष्टोमवाक्यस्याप्रत्युक्तं न च पर्युदासोपि संभवति संख्याग्निष्टोमवाक्य
शेषः स्यादनारभ्यवादश्शेषो वा नाद्यः पर्युदासस्याग्निष्टोमवाक्यशेषत्वे सति अग्निष्टोमवाक्य
स्यापर्युदस्तप्रतिप्रसवत्वस्याप्यसंभवेनोक्तरीत्योपसंहाराविनियोगस्याप्यसंभवोर्थत्वेन च
सामान्यग्रहणानारभ्यवादस्यानधिकारार्थत्वस्यानर्थक्योपत्तेः न द्वितीयः नवाक्यं पर्युदा

करणमेवा २

३२६

326

सोनारम्भवादस्य प्रकृतावुभयोपदेशत्वेन स्थितत्वात् स्यातिरात्रे दशमाद्यन्यायेनोपकारपदार्थदृष्टमा
वेन शास्त्रस्य शेषः स्यात् उपदेशत्वेनाग्निष्टोमातिरात्रसाधारणस्य वा तत्वे सति नातिरात्रमात्रवि
विषयस्य वा तत्वेन प्रकृतिमात्रविषयस्य वा नाद्यः प्रकृतो बाधिकृतत्वादिति न्यायेनैकोभि
नक्तिप्रकरणपाठेन वा प्रकृतिनिविष्टस्य न प्रथमयज्ञस्यैकथं विदपि तत्रैव प्रयोजनसंब
वेसन्फलकर्पस्य कल्पनायोगात् एतेन निषेधविधयाप्यतिविषयत्वमस्य प्रत्युक्तं न द्वितीयः
पूर्वोक्तन्यायेन प्रकृतिप्रविष्टस्य यस्य संहननीत्यस्यातिरात्रधारणेन तदाप्याद्यदि संस्थाः
समानविधाना भवेयुः निरस्तं तु नासां समानविधानत्वं न तृतीये न तृतीयः चतिरात्रावां

३२६

वांतरप्रकरणपाठाभावेऽतिरात्रमात्रविषयत्वस्याप्यशक्यवचनत्वात् न चतुर्थः तथासत्य
नारभ्यवादपर्युदासस्याग्निष्टोमप्रथमप्रयोगमात्रविषयत्वादग्निष्टोमेग्रहणक्लृप्तिप्रस
क्तेनमात्रविषयस्यात् तत्रयदिपर्युदासकशास्त्रनित्यमकरणमुक्तेनप्रतिप्रसवोप्यर्थःस्यात् इति
प्रसवत्वेननित्यकरणेवापर्युदासवैयर्थ्यमितिप्रसक्तभयानुरोधेनविकल्पापत्तेः किं पर्युदा
सेन यथाकृतः यस्माद्विकल्पः द्विकल्पादिभाङ्गिः पर्युदासश्चाश्रितः सत्तस्मिन्सत्यप्यापन्न
इति बूहंशास्त्रस्वरसत्वम्पः प्रतिषेधस्यैवाश्रित इति अन्तेग्निष्टोमप्रयोगेनिषेधप्रतिप्रसवाभ्यां
विकल्पेपिसुतिरात्रेऽग्निष्टोमसंस्थानिमित्तप्रतिप्रसवाननिर्देशान्नित्यमकरणमिति एवम
ग्निष्टोमप्रथमप्रयोगेवगतेवैकल्पिककरणंकामंत्वयान्वयानेः श्रोश्रियः स्यान्तस्यपक्षं ऽपा

दितिवचनादनूद्यानविषयमन्येषांनित्यमकरणमितिवार्त्तिककारीयःपंथाः ॥ अत्र न्याय
सुधाकारः नञश्च यमयज्ञऽत्वस्य प्रतिषेधत्वेनानूयाजेष्विति न्यायेन सामान्यशास्त्रस्या
पि प्रापकविधेर्निषेधेन समबलत्वात्प्रतिप्रसवं विनैवाग्निष्टोमे विकल्पसिद्धिः प्रतिप्रस
वानर्थक्यमतिरात्रेपि प्रतिषेधमात्रमहिम्ना विकल्पप्रसक्तिश्च ॥ अतः पर्युदास एवाय
मनारम्भवादशेषः नच सपर्युदासेन ते नेद्धितायादि प्रयोगगतकर्त्तव्यतामात्रज्ञापणा
दग्निष्टोमवाक्यान्यथाप्रयोगे नित्यकर्त्तव्यतापत्तिः ॥ अन्यत्र पर्युदासस्याकर्त्तव्यता
ज्ञापकत्वेपि प्रतिप्रसवानर्थक्यभयेनेहैव पर्युदासस्याकर्त्तव्यताज्ञापकत्वाश्रयणा
त ॥ अत एव पर्युदासेपि प्रतिषेधोक्तिर्वार्त्तिककारीयासंगच्छते ॥ अतोग्निष्टोमप्रथ

मप्रयोगे पर्युदासप्रतिषेधसंभवसामर्थ्याद्विकल्पः सोऽप्यनूद्यान श्रोत्रियविषयः अन्येषां तत्र
सर्वेषामतिरात्रसंस्थप्रथमप्रयोगे तु नित्यमकरणमित्याह ननु पर्युदासस्य प्रतिषेधवद्
कर्तव्यतोक्त्यर्थत्वे कथं तेनातिरात्रेऽपि विकल्पपरिहारः प्रतिप्रसवस्याननिर्देशेऽपि तेना
कर्तव्यतायामग्रहीनतात्पर्यकस्य पर्युदासस्य नामिकेकेधात्वाक्षुगोभ्वर इति यायेन विकल्
नो विपरीततात्पर्यकत्वासंभवादिति चेत् हंत किं नालोचितोऽन्यायस्तु धात्वर्थः नञ्
हस्याकर्तव्यतोक्तौ तात्पर्याभावेऽपि नञः स्वसामर्थ्याद् कर्तव्यत्वप्रतीतेः प्रतिषेधाक्षि
प्तंप्रकारादेः प्रसक्तेर्निकर्तव्यतायास्तात्पर्याविषयत्वे कथमनवस्थितीतिः पर्युदासादि
ति चेत् इत्यप्याभिधानामादतेइनिशास्त्रादर्शमाभिधान्यांमंत्रनिष्टत्तिशतीनिवदिति

ब्रूमः ज्ञापकशास्त्रजनितबंधसंकोचकृतविशेषसत्वेपि तात्पर्याविषयीभूतनिवृत्तिश्रुतीनेः
शास्त्रफलत्वस्योभयत्रसाम्यात् न च शास्त्रतादर्थ्यतात्पर्ययोरभेदात्तत्परस्य कथं तदर्थता
परपर्यायेन फलत्वमपीति शक्यं न्यायसुधाकृता कित्याद्यानां तात्पर्यस्य तादर्थ्यातिरेकात्
कथमन्यथा नञ्सिद्ध्यधिकरणादौ तात्पर्यारिचृत्तेः शास्त्रत्वनियामकत्वं वदता नैनैवार्थिकमं
त्रनिवृत्त्यर्थं ज्ञानादानमंत्रविधेः स्वीक्रियेत ननु पर्युदासेपि स्यर्थान्तरात्कर्तव्यत्वप्रतीतिः
संभवत्येव यतोऽनुयाजेषु येयजामहं कर्तव्यं मन्त्रमुक्तं भवत्यर्थादीदृशी बुद्धिः अनुयाजे
न येयजामहः कर्तव्य इति अतोऽकर्तव्यतायां तात्पर्याभावे कथं पर्युदासान्तरवैलक्ष
ण्योक्तिर्न्यायसुधाकृतः संगच्छत इति चेत् न च शास्त्रान्तरसंकोचार्थपर्युदासान्तरेऽकर्त

यतनाश्नीतिरानुषंगिकी प्रकृते पर्युदासेनुफलमिति चेत् लक्षणायापपत्तेः न च ब्रह्मास्त्वावाम
स्यार्थानर्थिक निवृत्तिश्चनीति विकल्पमापादयति गर्दभाभिधानीमं त्रविकल्पापत्तेः अत
उपचारहृत्याश्च प्रतिषेधत्वेन ग्रहवर्जीयमाणे पर्युदासमाश्रित्यैव संभवति सिद्धांत इति न्या
यसुधाकारिणां पंथाः मिश्रास्तु प्रतिषेधाद्विकल्पप्रसक्तिमनुपपन्नस्यैव प्रतिषेधश्रुति
प्रसक्ताभ्यां विकल्पः सोप्यनूद्यानव्याख्यानेनूद्योदाहृतानाद्यवस्थितविषयोनूद्यानस्यापि
त्वंकरणमन्येषामकरणमित्याहुः कथमेनदुपपद्यत इति चेत् शृणु यथाष्टादशांगत्वे
नावगतानां एकादशिन्याः अंगत्वेन प्रायणीयोदयनीययोरैकादशिना नालभेरन्निति वा
क्येन प्रायणीयोदयनीयमदेशात् एवविधीयते अत एव विकल्पितसाहित्यात्तदुभयत्र

विभज्यैकादशिनानामनुष्ठानमित्युक्तं दशमे न यथा न प्रथमयज्ञे प्रवृञ्ज्यादित्यत्र नञ्भावेता
वज्ज्योतिष्टोमांगत्वेन प्राप्तस्य प्रवर्ग्यस्य प्रथमोद्देशत्वेन विधीयते यद्यपि नञ्भावे विधेयतया प्र
तीयते न तस्यैव नञा निषेध्यत्वमुचितमिति पूर्वोक्तन्यायेन निषेध एवायं न तु प्रवर्ग्यनिषेधः
शास्त्रप्राप्तस्य निषेधाभावान्न विकल्पप्रसक्तिः ॥ अमुनैवाशयेनाह भवदेवः यथा प्रथमेक
प्रयोगविषयः प्रतिषेधस्तदान ऽन सामान्यविधिबाधेनैव निषेधो व्यवस्थितविषय ए
व विकल्पः प्रथमप्रयोगेऽनुष्ठानं द्वितीयादावनुष्ठानमिति प्रतिषेध इति प्रसक्ताभ्यां तु
विकल्पप्रसक्तिर्वाच्या अनूद्यानवाक्योपसंहृताग्निष्टोमवाक्यस्य त्वनूद्यानविषयत्वो
क्तिर्वार्तिककारीभंङ्ग्या व्याख्येये निमिश्राणां पंथाः सर्वेष्वनेपथानः सिद्धांतसंरक्षणा

पश्चाद्वृत्तानां तु बुद्धिमत्ता स्वीकर्तुमुचिता तथा हि सिद्धोपि निषेधो विकल्पापादकत्वेनना
नूयाजेष्वित्यादौ येनर्स्वीक्रियते नैरपेक्ष्यं ज्योतिष्टोमप्रवृत्तेन क्रोन्यस्य विकल्पापादकत्वनिप्रस
क्तत्वं किमित्याशंक्य ततः श्रुत्या अर्थे न हि किमेतत्कारोत्विति चेन्न अनूयाजवाक्यादनूयाजकर्तृ
कत्वेन प्राप्तप्रवर्ग्यस्याग्निष्टोमनिमित्तत्वबोधकत्वं तु अनूयाजवाक्यं तु पाश्चात्यंजनीतिसामा
न्यविधेर्न प्रथमयज्ञ इत्यनेन द्वितीयाद्विप्रयोगविषयतां नानस्यानूयाजविषयताप्राप
कं भवतु सर्वशास्त्राणां परस्परानालोचनेनान्यत्रिशास्त्रालोचनयैव प्रवृत्तेर्नोत्पत्तित्यात्
अग्निष्टोमवाक्ये च निमित्तसंबंधप्रतिप्रसवोभयापेक्षया निमित्तसंबंधमात्रबोधनेला
घवात् अनूयाजवाक्यादननूयाजकर्तृकक्रतोर्ज्योतिःसंबंधायाः प्रवर्ग्यनिवृत्तेरनूयाज

कर्त्तृकंनिमित्तरहितप्रयोगेपिज्ञापणेनलाघवाच्च ॥ अधिकारिप्रावर्त्तनस्वभावनिमित्त
समर्पणस्यशास्त्राधिकारिज्ञाप्तिमपेक्ष्यग्रहीतोविज्ञात् ॥ एतेनयत्केश्चित्त्रिधस्यविकल्प
प्रसंजकत्वंस्वीकृत्यसिद्धान्तरक्षणायोक्तं ॥ अग्निष्टोमप्रकरणकीतिवचनंप्रथमप्रयो
गेवैकल्पिकत्वेनावगतस्यप्रवर्ग्यस्यातिरात्रप्रथमप्रयोगात्परिसंख्यार्थं इतीयादिप्र
योगेऽत्यंताप्राप्तिनिरन्तिप्रापणात्प्राप्तिनिवृत्तिकेप्रथमप्रयोगनिवृत्तिनियमनेनियम
विधिवल्लाघवात् सामान्यप्रवृत्तस्यापिविधेर्हैरण्यगर्भमंत्रविधिगोचरस्याशामिकन्या
येनलाघववशेनविशेषविषयत्वसंभवात् नवैयंपरिसंख्यात्रिदोषा रशनामंत्रविधि
नालैंगिकश्रुतिकल्पनायाऽवानेनापिविधिनाऽतिरात्रप्रथमप्रयोगेयस्त्वहंजतीत्य

स्यातिदेशकल्पनाऽप्रतिबंधादिति तन्निरस्तं गृहीत्वा द्वितीयादिप्रयोगे लाघवसाम्या

त् न होतारं वृणीत इति निवृत्त्यपर्युदासेन शक्यपरिहारस्य विकल्पस्य विना कारणमभ्युपग

मायोगाच्च सर्वप्रयोगसर्वपदार्थसाधारणातिदेशस्य प्रथमप्रयोगगतप्रवर्ग्यमात्रबाधक

शास्त्रेणाप्रतिबंधायोगाच्चेति संकोचेनाप्यप्राप्तबाधव्यवहारविशेषशास्त्रादिना सामान्य

शास्त्रबाधस्याप्यप्राप्तबाधत्वापत्तेः अतः पूर्वोक्तन्यायद्वैविध्येन पर्युदासं निषेधं वा स्वीकृ

त्य प्रथमप्रयोगमात्रे नित्यप्रवर्ग्याकरणमेवाभिमतं स्वीकर्तुं द्वितीयादिप्रयोगेषु त्वग्निष्टोम

संस्थे नूचानस्य नित्यं करणं अनूचानस्य तत्रेतरसंस्थे द्वितीयादिप्रयोगेषु सर्वेषां नि

त्यमकरणमिति नियमव्यवस्था स्वीकार्येति चेन्न द्वितीयादिप्रयोगे विकल्पप्राप्त्यभावेन द्वि

भाट्टा०
३३१
331

कविकल्पवाचिनः काममित्यस्यानुवादत्वासंभवात् दृश्यते हि कामं यमस्मै कामयेत तानस्मै द
दद्यानामित्यापस्तंबादिवाक्यं श्राद्धवस्त्राणानां क्षूर्तप्रभृतीनां काममित्यस्य बलादेव विकल्पो
क्तिः न चानूचानवाक्ये विकल्पो विधीयत इति युक्तं प्राप्तप्रवर्ग्यानूचानसंबंधस्य विकल्पस्य
च विधाने वाक्यभेदात् न चानूचानकर्तृकप्रवर्ग्यानुवादेनेह विकल्पो विधीयतामिति शंक्यं
विशिष्टानुवादे वाक्यभेदात् अत एवाग्निष्टोमवाक्ये यद्यप्यनूचानवाक्योत्तरं प्रवर्त्तते तथा
प्यनूचानवाक्ये विकल्पानुवादनिर्वाहाय न प्रथमयज्ञ इत्यस्य विकल्पापादकमेव
प्रतिषेधत्वं स्वीकृत्य नित्यसिद्धवैकल्पिककरणानुवादेनानूचानसंबंधविधिपरमनूचा
नसंबंधिपरमनूचानवाक्यं स्वीकार्यं यज्ञप्रथमप्रयोगे नूचानकर्तृकं वैकल्पिकं करणं॥ ३३१

ष्टाद्युपस्थितस्याग्निष्टोमनिमित्तप्रथमप्रयोगेनूत्नानस्यावैकल्पिकं करणं तत्रान्येषामतिरा
त्रप्रथमप्रयोगे सर्वेषां नित्यमकरणमिति यानुवार्त्तिकेनूत्नानवाक्योदाहरणानंतरमपि
अग्निष्टोमवाक्यस्य विकल्पकारित्वप्रतिप्रसवत्वोक्तिः सा पूर्वामुपगतप्रयोगस्य यो वाक्योपल
क्षणत्वेनाभिधानं एतेन श्रीकरोपन्यस्तपर्युदासनिराकरणाय न प्रथमयज्ञ इति निषेधस्य
नैमित्तिकनिषेधत्वेन विकल्पानापादकत्वोक्तिर्नयविवेकस्याभिरस्ता तत्करीत्या विक
ल्पापादकनिषेधस्यैव शास्त्रानुमतत्वादित्यनवद्यं अनुतस्येति तद्वेति बोधाशास्त्रं प्राशस्त्य
नानमित्यनंतरोक्तयो अप्राशस्त्यस्यानुज्ञानस्य च संग्रहाय स्वर्गादिकर्मकभावनासमभि
व्याहारेणमनुष्ययागादिगतस्य स्वर्गादीष्टसाधनत्वस्य घटादिवल्लोकगम्यस्य च कार्यत्वस्या

न्यत्वरूपत्वान्न विपर्ययत्वमुचितं उचितं तु प्रवर्त्तनाया अस्वतादृक्का पूर्वोक्तेन यथात्रेत्याशयेनाह

स एवेति दूषितमपि दोषांतराभिधानायानुवदति यदि वेति न्यायसुधाकृन्मतमुपपादयितुमा

रचयति स एवेति यद्धर्मावच्छिन्ने यस्य शाब्दस्य शक्तिग्रहो ज्ञानं तद्धर्मप्रकारकबोधनेन शाब्देन

जनितेऽस्मिन्निति तद्धर्माश्रयप्रसिद्धपदार्थानां विशेषत्वानुपपत्तेः समत्याप्रसिद्धयुक्तिमाश्रि

त्यैव बोधः पर्यवस्यति इत्यपूर्वात्मककार्यविधायकत्वादिमते लोकव्युत्पत्तिसिद्धं न्यायं प्रेरणाविध

र्थं योजयति तथापीत्यादिना तत्रैव शाब्दिकं योजयति अयमेव चेति मिश्रमतमाह अस्मा

न्ये त्विति तस्यापीष्टसाधनतांज्ञानस्येति विशेषः यत्तु प्रेरणावादिभिरुच्यते ज्ञाने इष्टसाधनतावा

पि न प्रवर्त्तते प्रेरणाज्ञानात्तु प्रवर्त्तत इति तद्वैपरीत्यमपि संभवतीत्याशयेनाह अन्ये त्विति स्मा

३३२

332

वश्यकत्वादिति ज्ञानायाः समीहितसाधनतायाः प्रवर्त्तनात्वस्य परेणाप्यवश्यांगीकार्यत्वादि
ति भावः स्थैर्यं विशेषरूपेणाक्षेपस्यास्वमतेप्यपरिहार्यत्वात् एवं चेति ननु प्रतिकूलमेतत्
अर्थं मां प्रवर्त्तयतीति यस्याः प्रतीतेः प्रसादेन प्रवर्त्तनाया वाच्यत्वसिद्धिः तया यथा लोके प्र
वर्त्तनायाः पुन्निष्ठत्वसिद्धिस्तथा तथैव वेदे तस्याः शब्दनिष्ठत्वसिद्धिरिति चेत् न लोके प्रवर्त्त
नायाः शब्दनिष्ठत्वाभावेपि न च्छ्रक्षो मां प्रवर्त्तयतीति वत् वेदेपि शब्दनिष्ठत्वमन्तरेणैव तथाप्रती
त्युपपत्तेः वैदिकलिङ्बोधितत्वविशिष्टस्य यागादेः स्वर्गादीष्टसाधनताश्रयत्वेन लिङोप्याश्र
यकोटिनिक्षिप्ततयाप्युपपत्तेश्च नन्वेवमपि यागो मां प्रवर्त्तयतीति व्यवहारः स्यादिष्टसाधन
तारूपप्रवर्त्तनाया यागाश्रितत्वादित्याशंक्याह किं चेति वरमिति नैमित्तिकं दृष्टान्तमित्रा

नुसरणं कार्यं ननु निमित्तमस्तीति नैमित्तिकापादनं निमित्तान्तराभावादपि नडुपपन्नेरिति
विषयाः इंद्रियाणि स्वस्मिन्प्रवर्तयंतीति वदिष्टसाधनत्वेनावगतो यागः स्वस्मिन्पुरुषं प्रवर्तय-
तीति संभवत्येवं व्यवहार इति असंभवत्परिहारैकदेशाभ्युपगमो नैकदेशाभ्युपगमो घटते इ-
त्याशयः नन्वर्थप्रतीत्युत्तरे योलिङादिगतो योऽभिधाख्यो व्यापारः असावपि समभिहितसाध-
नत्ववदावश्यकोऽवश्यं कथमस्यैव प्रवर्तनात्वेन लिङ्वाच्यत्वं न स्वीक्रियते एवं चाभिधाभावेनामाङ्-
रिति वार्त्तिकमञ्जरी नानुपपन्नं भवेत् अभिधाशब्दस्य प्रसिद्धार्थस्वीकरणात् कोऽसौ व्यापार
इति चेत् शक्तिरिति केचित् परे त्वाहुः योऽयमागन्तुकं धर्मं ज्ञाप्यकापयिपर्याप्तो भवतीति स त-
द्व्यापारः ज्ञातस्वशाब्दार्थप्रतीत्येव पर्याप्तः अतो ज्ञानमेव व्यापारः न च ज्ञाने कर्माभूतस्य

ज्ञानात्मिकायामभिधायां कथं कर्तृत्वेन करणत्वेन वा व्यवहार इति शंक्यं एकस्यामपि क्रि
यायां तत्तत्फलावच्छेदत्वेन तत्तद्व्यापाराभिधेयत्वाया: कर्तृकर्मादिवैविध्यस्यैकत्रापि संभवात्
इह दृश्यते घटघमनादिक्रियायां कर्मणोपि पुरुषो द्वैधीभावाख्यफलावच्छेदत्वविशिष्टं त्वभि
धेयत्वायोगे तस्यां करणत्वं स्यात् अविवक्षायां कर्तृत्वं च तथैकस्यामपि ज्ञानक्रियायां शब्द
कस्यार्थप्रतिपत्तिप्रवृत्तिभवनाख्यफलावच्छेदेन यथासंख्यं ज्ञानान्यभिदधाति भावय
तीति लक्षणतत्तद्व्यापाराभिधेयत्वायां शब्दार्थप्रवृत्तीनां कर्मत्वं शब्दस्यैव कर्मत्वकर्तृत्वकरण
त्वानि वचनानुपपन्नानीति ॥ अस्मद्वंश्यास्त्र पवित्रितशिष्यभावनाप्रतिपादनमेव शब्दव्यापार: प्रव
र्तनात्वेन लिङ्वाच्य: उक्तोप्ययमपि पक्ष: षष्ठाध्यायशास्त्रदीपिकायामिश्रै: ॥ अस्मद्वंश्यास्त्रयावि

334

अतः कथं समीहितसाधनत्वस्यैव प्रवर्त्तनात्वेन अभिऽभिधेयत्वे भ्रमनिःशंकां निराकर्त्तुं साधनत्वस्य
वेतिभिन्नक्रम एवकारः स्वेतरस्यज्ञानयेत्यादिः यद्धि ज्ञातं सत् प्रवृत्तिहेतुत्वेन रूपेण समस्यैव प्रवर्त्त
नात्वेन रूपेण विधिज्ञापकत्वकल्पनमुचितं अन्यथाऽज्ञायाः साक्षात्प्रवृत्तिहेतुत्वेन रूपेणापास्त
त्वेन तदभिधेयत्वस्य दुर्निवारत्वात् तत्र प्रेरणास्वरूप एवाऽऽकूतशक्तिरूपाभिधानुस्यूतः सिद्धा
पि न प्रवृत्तिहेतुत्वेन सिद्धा शब्दज्ञोनात्मिकाभिधाभिविशिष्टभावनाभिधानं वा प्रवृत्तिहेतुत्वे
न सिद्धमपि न ज्ञातं सत् तथाकूतं विशिष्टहेतुत्वं ज्ञातं सत् प्रवृत्तिहेतुरित्याशयः ननु यजेतेत्यादि
रूपानुपूर्वीज्ञानासत्ती प्रवृत्तिहेतुत्वेन रूपा कथं स्वर्गकामस्येव न त्वनवाच्याऽनन्याहान्यमिति
स्वनिष्ठप्रवर्त्तनाभिधानेयानुपपत्तिस्तु कूच्यत्वादित्यर्थः न कलञ्जं भक्षयेदित्यादौ त्वाकर

३३८

विध्यर्थानुवादेन नञ्‌ निषेधतीति वचनव्यक्तिर्दर्शितास्माच्च प्रेरणाभिधाभावनात्प्रतिपा
दनानुपूर्वीणामन्यतरस्य स्वनिष्ठस्य लिङ्गप्रवर्तनात्वेनाभिधानेनोपपद्यते न हि भक्षयेद्
तिश्च त्व्यपगतशुक्रप्रकाराणामन्यतरदपि प्रवर्तनारूपमनुवदितुं योग्यं भ्रान्त्याविषयत्वाभा
वात् न हि निषेधान्तर्गतः प्रत्ययः प्रवर्तकस्तथा कस्य विरुद्धमसंभवः क्लेशेन तु तत्कथंचोपपादनमनुवा
येन यथोक्तानीनं पुरस्तात् शक्यते तु क्षणगतेष्टसाधनतायाः अनिष्टानुबंधित्वेनागृहीतायाः प्रवर्त
नात्वभ्रमे सति लिङ्गनामनूद्य निषेधोऽभ्युत्तरोऽनेवाबाधयितुं परं त्वभोजनादाविव कलञ्जभक्षणेपी
ष्टहेतुत्वं प्रवर्तकत्वेन ज्ञातं तन्न तथाकलञ्जभक्षणप्रापेष्टस्यानिष्टानुबंधित्वादिति न चैवम
निष्टानुबंधीष्टसाधनत्वस्य प्रवर्तकत्वात् सृजेनेत्यादि लिङ्गाभिधानापत्तिः परार्थभूतेष्टसाधनता

माहा०
३३५
335

गतस्य प्रवर्त्तनात्वान्यधर्मस्य लिङ्गप्रतीत्यसंभवेन वाच्यत्वस्यानिरूपत्वात् प्रवर्त्तनात्वसामर्थ्य
लक्ष्यत्वेनान्यलभ्यत्वाच्च इष्टहेतुतायास्तत्वेनैव लिङ्गाद्यत्वेपूरमेन ज्ञप्तेरेव स्यात् न च हि प्रवर्त्त
नात्वे हेतुः सत्वानिष्टाननुबन्धित्वविशिष्टायायामेव न स्यादिष्यते अनिष्टाननुबन्धीष्टहेतुत्व
निर्णयेनैव हि प्रवर्त्तमानादर्शनात् प्रेक्षावतः विशिष्टाया एव वाच्यत्वे निषेध्यत्वोपपत्तेश्चास्य
च यथा अनिष्टाननुबन्धितायाः शास्त्रार्थत्वेन न हि विरूपेष्टसाधनताया अपि प्रत्यक्षसिद्धत्वेन निषेध्य
त्वासंभवात् अतो यागगतेष्टसाहेतुताया एव प्रवर्त्तनात्वेनैव विध्यर्थत्वमित्याशयः ननु या
गगतं कृत्यर्हत्वमेव भवतु तदर्थः शक्यते हि तत्स्वश्योवस्यवृत्तिहेतुत्वेन निरूपयितुं इष्टहेतु
त्वानिष्टाननुबन्धित्वाभ्यां कृत्यर्हत्वमेव हि निर्णीयाप्रेक्षावतः संभवति च कृत्यर्हत्वमन्वये

३३४

निषेधः न च नरस्येष्टहेतुत्वस्यानिष्टहेतुत्वस्य वाऽप्रतिपत्तिश्च यथा पुत्रकामः सोऽयं न कुर्वीतेत्या
दौ कर्तव्यतावचनो भावनायां पुरुषं प्रवर्तयतीत्यादिराकरग्रंथश्चैवमनुमतो भवतीत्याशंक्य
निराकर्तुं हेतुं न रसमुच्चयाभिधायी चाऽइदं न वक्तव्यमिष्टमतः कुरु यद्यपि नैतत्कर्तव्यमिष्टं तथापि
कुर्वित्यादिप्रयोगापत्तेरिति न ह्येवं प्रयोगो भवति न वक्तव्यमिष्टमतः कर्तव्यमिष्टमिति न वा नैतत्कर्तव्य
मिष्टमतः कर्तव्यमिष्टमिति संभवति तु सर्वोऽपीदृशः प्रयोगः प्रवर्तनात्वेनेष्टहेतुताया लिङ्गाद्यर्थत्वे र
त्याशयः ननु प्रवर्तनाया मध्ययनविधिबोधिता लिङादयः प्रवर्तकतां प्रतिपद्यन्ते तेषां प्रव
र्तकत्वमहिम्ना च कर्मण इष्टहेतुतासिद्धिरित्याकररीतिः न च लिङादिव्यापारस्य प्रवर्तना
त्वे प्रवर्तनायां लिङादयः प्रत्ययितुं शक्याः स्वव्यापारे सर्वो नियुङ्क्ते इति व्याघातात् च नन्वेषां

प्रवर्त्तकत्वासिद्धेः कर्मणश्चेष्टहेतुत्वमपि न सिद्ध्येदित्याशंक्याह नचेति यथाऽव्यापारेऽपि गोदोहन
पंचमवर्षादेः पुंव्यापारभूतस्य प्रत्ययेनोपनयनादिव्यापाराविष्टपुरुषः प्रवर्त्त्यते तथाऽव्यापारभूताया
मपीष्टहेतुत्वमात्रसिसाधयिषायां तु शक्यते प्रकारांतरेणापि संभवत्येवशब्दस्य प्रवृत्त्यर्थत्वं यद्वह
रः नच यागभावनायाः पुंप्रवृत्तिव्याप्यत्वं प्रवर्त्तनारणात्मभावनायास्त्वपि शब्दनिष्पाद्यत्वमस्तीति येनान्याविषय
त्वाच्छब्दप्रवृत्तिविषयभावं गच्छेत् अतः प्रेरणामन्तरेऽपीत्थमेव समाधेयमित्याशयेन मतेऽपीत्यपि पु
योगः प्रवर्त्तकत्वमनुपपन्नं कर्मणश्चेष्टहेतुत्वमात्रसिसाधयिषायां तु शक्यते प्रकारांतरेणापि
साधयितुमित्याशयेनाह विध्यमिहितस्येति ननु इष्टहेतुतायाः प्रवर्त्तनात्वेन लिङोऽर्थत्वे कथ
मिष्टहेतुता लिङोऽर्थो यादित्येव स्तुपन्यस्तदोषानापत्तिः कथं वा शब्दनिष्ठायाः शब्दभावनात्वमपदेशः

कार्याभिधाभावनामाकुरितिवार्त्तिकस्पृशं वा नितिरिशङ्काः क्रमेण निरस्यति अन्वेत्यादिना नन्वे
वमपि नैषधयोगस्तत्रोपपद्यते यद्यपि न वैतन्नेष्टसाधनं तथापि त्वं कुर्विति स्वरूपतो निषिद्धस्य
रूपान्तरेणापि विधानप्रतिपादनासम्भवात् न हि घटो नास्तीति श्रमितं श्रुतिषेधस्य घटस्य द्रव्यमस्तीति
द्रव्यत्वाकारेण सत्त्वप्रमासम्भवतीति चेत् न परावगतेष्टविशेषसाधनत्वेन निषेधेऽपि द्रव्यां
तरसाधनत्वस्य श्रवणेनावेनप्रतिपादनसम्भवात् यद्यपि तत्र नेष्टसाधनं तथापीष्टसाधनमि
ति प्रयोगस्य सर्वथाप्युपहसनीयत्वात् उक्तेऽर्थे मण्डनसंमतिमाह यथेति अभावादिमन्नंतरं
प्रकृत्यर्थस्य भावनायाम् अप्रदस्य व्यापत्तेः करणत्वाद्यन्वयानापत्तेश्च न निरोधः अतो यागत्वेन प्र
कृत्यर्थस्यापि भावनात्वेन प्रत्ययार्थत्वे किं बाधकमिति शंका निरासः न्यायसुधाकृन्मतमाह

मु·
३२७
337

अत्रेति प्रयत्नो भावनेत्येवं रूपं यागस्य भावनायां कर्मत्वकरणत्वे उपपादयितुं यागविषयत्व
मुक्तं विषयत्वञ्च तीत्येव यथा कर्मत्वकरणत्वपर्यवसानं तथोक्तमधस्तात् स इति यत्नत्वविशि
ष्टपरामर्शः यत्नत्वविशिष्ट एवाख्यातेनाभियोगे यत्नत्वमवच्छेदकस्य शक्यतावच्छेदकेन च्यारत्वज्ञानित्वे
न यत्नत्वस्येव लघुभूतत्वमित्यादिति सूचनार्थ एवकारः पाकं यत्नवानेवेति संज्ञायनिवृत्तिस्त्वावस
वतीति श्रवणोज्ज्ञापने न च सा यत्ननिश्चयं विना संभवतीत्याख्यातेन यत्ननिश्चयस्यावश्यवा
च्यत्वात् स च तिपाकं यत्नवानिति विवरणदर्शनाच्चेति हेत्वन्तरसमुच्चयार्थश्चः न च यत्नाविना
भूतपाकेन यत्नानुमानात्तन्निश्चयोपपत्तिरिति शंक्यं न च चैत्रः पचतीत्यादौ प्रयत्नस्य
लडाद्यर्थवर्त्तमानत्वाद्यन्वयित्वेन चैत्रादिवृत्तित्वेन च प्रतीत्यभावापत्तेरिति जानातीत्या ३२७

जानातीत्यादौ हि वर्त्तमानत्वाद्यनन्वयो धात्वर्थे दृष्टः यजतीत्यादौ चाख्यातार्थव्यापारे नन्वनुमे
येऽर्थे क्वचिदपि सोऽनुभूतः न च वैवं दृष्टिरिति वर्त्तमानत्वाभ्यां विशेषितेन पाकानुकूलव्यापारेणैव तदु
मयविशेषितं तदनुकूलयत्नानुमानमित्यपि साम्प्रतं न हि तत्र वर्त्तमानताद्दशव्यापारस्यान्वयदर्श
नेन यत्नादपि जन्मसंभवेन हेतोर्व्यभिचारात् न चैताद्दशस्थले लक्षणया यत्नस्य शाब्दत्वं वर्तमानं हि
न तोरथो गच्छतीत्यादौ व्यापारे लक्षणाभ्युपगता प्रथमतः स्वीकार्यशक्यतावच्छेदकैकदेशलाघव
स्यानुसरणीयत्वात् पश्चात्स्वीकार्यशक्यतावच्छेदके गौरवस्य फलमुखत्वेनादोषत्वात् ज्ञाय
मानत्वादिति सिद्धवन्निर्देशेन ताद्दशप्रतीतिजन्मनश्चाकरसिद्धान्ततां दर्शयति उक्तं ह्याख्या
तार्थप्रयोजनावसरे भावप्रधानाधिकरणे भाष्यकृता तथा यतेन यथा किं विद्धवतीति गुणका

मा०३०
३२९
338

माधिकरणेऽपि जुहुयादिति शास्त्रस्यैव तस्यामर्थ्यं यद्धोमविशिष्टश्रयत्नमाहेति यदुक्तादृशानि
र्देशेन यजेतेत्यत्रान्तस्याश्रवश्यस्वीकार्यतां दर्शयति वेत्तत्त्व्यापारभूतयत्नाभिधाने हि विधेश्चे
तनत्वव्यवहारः संगच्छते कथमन्यथा काष्ठादिप्रवर्तकत्वव्यवहारः यथा कुन्ताय सुधाकृतः चे
तनप्रेरकत्वं हि विधेस्तद्विषयत्वतः काष्ठाद्यपि तथा कस्मान्न प्रेरयति वा पुत्रवत् विध्यर्थाज्ञान
तोऽप्रेर्यत्वे काष्ठादितः कथं सोधनन निषादेरप्रेर्यस्याधिकारिता विधिस्तां प्रेरयत्यत्रेत्यप्र
र्येऽतिप्रसक्ते कथं विहद्भिः शापनादेव प्रेर्यत्वेन्यान्यसंश्रयः इति करोतिपर्यायत्वेनादिवत्त्वनावि
त्वमाख्यातेऽध्यर्थं तु करोतेर्यत्नवाचितां साधयति यच्चेति करोतेर्यत्नवाचित्वे हेतुत्वमप्यु
चयार्थश्च व्यापारसाध्यत्वावगमेऽनुल्लेपि हि प्रयत्नसाक्षित्वात्साध्यत्वप्रतीतेरेवादनयोः छ

३२९

कृता कृतव्यपदेशो व्यवस्था दृश्यते दृश्यते च सर्वकारकाणां व्यापाराश्रयत्वे तुल्येपि पचत्याश्रयए
व कर्तृत्वव्यवहारः संभवति चेत्तदुभयमपि पचत्यस्य करोत्यर्थत्वे सविषयार्थधातूत्तरकर्मनिष्ठायां
विषयार्थत्वात् ओदनस्याप्युद्देश्यतया तद्विषयत्वात् सविषयार्थधातूत्तरत्वेनाश्रयार्थत्वादा
श्रयत्वस्य सर्वकारकेषु संभवादित्याशयः उक्तं च न्यायाचार्यैः कृतविभागेन कर्तृरूपव्यवस्थ
स्था यत्नएव कृतिः पूर्वापरस्मिन्सैव भावनेति विधेरन्यत्र व्याख्यातस्य करोतिसामानाधिकर
ण्येन यत्नवाचितां दर्शयितुमाह पचतीति रथो गच्छतीत्याद्यनुरोधेन गम्युत्तराख्यातस्यापि न
व्यापारवाचित्वं विनेत्याशयेनाह गच्छतीति वो द्वितीयस्यापि न्यायस्तु धात्वर्थतापक्षान्तरम
प्युक्तं स्त्रीत्वाभावेपि खरखत्कादोटावादिष्वत्ययो यथा उपयुज्यते तथाख्यातं यत्नाभावेपचेतन

मा
३३९
339

धातोरनुग्रहार्थं वा चांतरधियेवेति तथा व्यापारख्यातत्वांशस्याप्यर्थवित्त्वसंभवेनानार्थक्यमुचित
मित्याशयेनैवमेवोक्तं औपचारिकत्वमिति आश्रयत्वलक्षणे त्वाशयः किंत्रमतमाह त्रन्दीति
ति तत्र व्यापारमात्रस्याख्यातवाच्यतावकुं पत्तावमीमांसकानामाख्यातजन्यप्रतीतिविषयानि
रूपेण परं वृत्तः प्रागुक्तं तस्य सर्वव्यापारसाधारण्यं दर्शयति भवतु रिति स्पष्टतिव्यापारत्वविशि
ष्टः परामर्शः व्यापारत्वमेव शक्यतावच्छेदकं तथात्वं व्यापारस्याप्यखंडोपाधित्वेन जातितुल्य
त्वात् न च तस्याखंडोपाधित्वे मानाभावः कृत एवमक्षररसः स्वाश्रयं जनाभिलाषगोचरतां
नयतीति व्यवहारानुरोधेन तत्समाख्यतत्वादेरवश्यवक्तृत्वव्यापारस्यानजन्यत्वाद्यात्मताभा
वेनाखंडोपाधेरैवोचित्याद्यानत्वादिति स्पष्ट न सार्थ एवकारः शक्तावागुर्वेव व्यापारत्वं तथापि

नदेवावच्छेदकं पवनीत्यस्मान्नाकयज्ञस्येव्रीहिपत्तं निफलं रक्षादित्यादौ गुरुत्वस्यस्व वन्निजलं गिरे
रित्यादौ ऽद्रवत्वस्य ज्वलनि शरो दूरमित्यादौ वेगस्यैकं पंनेपत्राणि तरोरित्यादौ वायुसंयोगस्यापि
संबंधायनिरस्तानि श्रयोऽभ्युपेयः अन्यथा गुरुत्वादौ वर्त्तमानत्वाद्यन्वयस्य फलरक्षितत्वादेश्चाव
त्ययोग्य यतो नानुमानिकत्वेनापि तदन्यथासिद्धिः भवति च यतत्वं च गुरुत्वत्वादीनि विहायपत्न
त्वमेव शक्यतावच्छेदकत्वेन शक्यमवधारयितुं भवंतु सर्वाण्यपि शक्यतावच्छेदकानि आ
पारस्य तु न तथात्वासिद्धिरिति चेत् न परस्परानपेक्षानेकशक्यतावच्छेदकाभ्युपगमेनाने
कशक्यवाचकभावाभ्युपगममपेक्ष्य गुरुभूतेकशक्यतावच्छेदकाभ्युपगमेनैकस्यैव वाच्य
वाचकभावस्य स्वीकर्तुमुचितत्वात् अनेकपदार्थघटितोपाध्यात्मनो हि व्यापारत्वस्या

वच्छेदकत्वेन दाश्रयत्वमनेकेषां कल्पनमिति गौरवं वाच्यं आश्रयावच्छेदकत्वं तु सर्वेषु पर्याप्तमे
कमेव स्यान्न यत्नहाद्यनेकावच्छेदकाभ्युपगमे त्वाश्रयित्वमप्यनेकत्रैकस्य संबंधानेकत्वं वेत्य
तिगौरवमिति हेतुत्वेन रूपकथनार्थश्च: व्यापारत्वस्याख्यातशक्यतावच्छेदकत्वे वैदिकवाक्ययो
र्बोधप्रकारं दर्शयति कुठारेणेत्यादिना आख्यातानां सामान्यत एवेति त्वेवो भिन्नक्रमो सामा
न्यमेवाहान्येति सामान्यतो भानस्य विशेषाकांक्षा हि कथमिति व्यपदिश्यते संभवति चैषा
व्यापारत्वेनाख्यातात् भाव नावगमे व्यागविशेषविषयत्वेनान्तरवगमे तु दुरुपपादाख्यादित्या
शयः व्यापारस्याख्यातशक्यतावच्छेदकत्वे विनैव लक्षणामचेतनक्रियावाचिषु सर्वाख्यातेषु
प्रतीतिनिर्वाहं दर्शयति रथइति चेतनकर्तृकक्रियावाचिष्वपि यतनादृत्यादिषु परमतए

वलक्षणाश्रमक्तिनास्मन्मन इत्याह एवमिति अप्रसिद्धकर्तृकक्रियाबोधिनो भवतीत्यादे
संग्रहार्थमुक्तं सर्वत्रेति उपपादितो हि भवतीत्यादावव्ययवभेदो न प्रयोज्यप्रयोजकभेदसंगी
कृत्यभावनाप्रतीतिर्वार्त्तिककृद्भिर्भावार्थाधिकरणे गस्कृतस्कयथैव भवतीत्यत्र भावना
प्रतीत्युपपादनं वार्त्तिककारीयमतिशयार्थं नथैव ह्यपिरयोगछतीत्यादिषु तदुपपादनम
तिशयार्थमेव न हि रथो गमनं करोति पुरुषो यत्नं करोति घटो भवनं करोतीति कस्याप्यनु
भवोऽस्ति अतो नोत्पादानुकूलत्वांशानादरेण व्यापारसामान्यमेव सर्वत्राख्यातार्थ इत्येताव
त्यर्थे ग्रंथतात्पर्यं यथा चेह शोदाहरणे पुरथाश्रितो गमनव्यापारः पुरुषाश्रितो यत्नव्यापा
रो घटाश्रितो भवनव्यापार इति लक्षणां विनैव बोधोपपत्तिस्तथोपपादितमधस्तात् न चा

कैरेयज्ञेनेत्याख्यानार्थविवरणोऽन्ववनुप्रघनतस्त्यादावाख्यानस्यौपरिकत्वमनन्त्राह नत्वा
त्रेति व्याकरेहियज्ञेनेत्याख्यापदस्याख्यानार्थत्वमुक्तं नच व्यापारस्याशक्यतावच्छेदकत्वे
तद्बाधः तस्याप्याख्यानार्थेऽनुप्रवेशसत्वात् तादृशाख्यानार्थसत्त्वेपि व्यापारान्तरानुप्रवेशेन
स्यानियतत्वाद्यत्नस्यैवनियतत्वात्पर्यत्नस्याख्यानार्थत्वकथनं नच पूरणापियत्नेनेति विवर
णानुरोधेन यत्नेनेत्याख्यानस्य च सर्वात्मनानुत्पार्थत्वं शक्यं वक्तुं पतनेऽरिवाख्यानस्यापिक
र्मानपेक्षक्रियाभिधायित्वापत्तेः भवतु वाकरविरोधः प्रतिपाद्याख्यानानां सर्वेषां सामञ्ज
स्यानुरोधेन तत्रैव सामञ्जस्यं वक्तुमुचितं न तु दत्तुरोधेनात्र प्रतिपाद्याख्यातेषु सामञ्जस्य
मित्याशयेनात्रेति नच वेतनप्रवर्त्तकित्वनियमानुपपत्तिः नद्दत्तुछेयधात्वर्थानुरक्तत्वया

व्यापाराभिधायित्वेन तन्नियमोपपत्तिः ॥ अहमत्र चैत्र इति साक्षात्परंपरया वा प्रयुक्त इतीति
मात्र एव चैत्रत्वनियमाच्च न च यत्नवत्त्वं करोतेः शक्यतावच्छेदकं न फलत्वमित्येतावता वनितान्य
र्थ ॥ यत्नोत्पत्त्यनुकूलत्वस्य तु शक्यतावच्छेदकत्वं न भावेन प्रतीतिराक्षेपादेतन्न्यूदेतन् ॥ अन
एवाह करोतेरिति तत्कर्तृकव्यापाराभिधायित्वेनाख्यातस्य तत्कर्तृकत्वं यथैव चैत्रः पच
तीत्यत्र पाकं करोतीति विवरणं दृश्यते तथा स्थाली विभक्तिस्थापि धारणं करोतीति वि
वरणं दृश्यते न च तत्करोतेर्यत्नवाचित्वे संगच्छत इत्याशङ्क्य ॥ एतेन कृताकृतविभागकर्तृ
मवस्थेऽपि निरस्तं दृश्यते चोपलज्ञानेपि कृतव्यवहारोपलाभावनि च कर्तृव्यवहारः
॥ अग्निनाद्य पाकः कृतोऽग्निः पाचक कर्तेति परकृपलसाध्यत्वासाध्यत्वाभ्यां कवि कृतो

स्तृत्वव्यपदेशः सपत्नसाध्ययोरेव द्वयोर्मध्येऽन्यपसाध्येऽकर्तृत्वव्यपदेशाव व्यापारसाध्यत्वावि
शेषेपि कुविघटनसूनुत्वेनेव स्वव्यापारसाध्यत्वादकर्तृव्यवहारोपपत्तेर्नासंभवी । यत्तात्र
यत्वे तु त्वेपि चैत्राश्वयोः स्वातन्त्र्यपारतन्त्र्याभ्यां यथाकर्तृकरणव्यपदेशव्यवस्था भवति चैत्रो
श्वेन गच्छतीति न तु कदाचिदश्वश्चैत्रेण गच्छतीति तथाकरोतेर्व्यापाराभिधायित्वेपि सर्व
कारकाणां व्यापाराश्रयत्वे त्वेपि ताभ्यामेव संभवति सा व्यवस्था । यथा च सत्यपि तदनुकूलयत्ने
स्वातन्त्र्याभावेन कर्तृत्वनिषेधव्यवहारो यथा परवचो वदति हन्ते नापमस्य वक्तापर एवास्य
वक्तेति तथा सति तदनुकूलव्यापाराश्रयत्वे तदभावविवक्षयैव संभवति कर्तृत्वनिषेधव्य
वहारो वा नानादिनास्पन्दमाने स्वातन्त्र्याविवक्षयात्तु भवति नास्मिन्नपि कर्तृत्वव्यवहारः यथा

तदीयस्पंदेन भग्ने केनेदं भग्नमनेनैव नान्येनेति ॥ प्रतीतेनव्यापारस्याख्यातवाच्यत्वे किंविद्धाध
कं प्रत्युत पाकानुकूलयत्नवत्त्वस्य चैत्रेश्वरयोस्तुल्यत्वाच्चैत्रः पचतीतिवदीश्वरः पचतीत्यपिप्र
योगापत्तिर्यत्तु स्वव्याप्यत्वे बाधकं स्यथेश्वराजन्यतावच्छेदको यत्नत्वव्याप्यो जातिविशेष एवाख्या
तवाच्यतावच्छेदकः यद्वा धात्वर्थस्य पाकादेराख्यातार्थयत्ने चेष्टादिद्वारकमवजनकत्वं संस
र्गः ॥ आख्यातार्थयत्नस्य वा प्रथमान्तपदार्थे चैत्रादाववच्छेदकत्वं संसर्गइति निरुक्तौ कृते नेश्वरः पच
तीति प्रयोगवारणम् ॥ नहीश्वरो जन्यकृतिमान् नापि तत्कृतेश्चेष्टाद्वारकजनकत्वं नापि
कृतिजन्यमिति चैत्रस्येवेश्वरस्यावच्छेदकत्वमिति चेन्न तथासतीश्वरकर्तृकक्रियावाचिनां वे
दपुराणेतिहासगतानामाख्यातपदानामनुपपत्तेः ॥ तत्रागत्याव्युत्पत्तित्यागइति चेन्न न

343

शाब्दस्यावान्तरविभिन्नत्वादित्यत्रोक्तेनुविरुद्धवर्णभ्यवाक्यादिन्यायेन तादृशपदानुसारिण्या एव
शुम्भेनुरगीकार्यत्वात् किंच यथा वृत्तः पाकजनकाधत्ताख्येप्रत्येकमाख्याता वाच्याः किं वा यावन्
तोद्युत्वसमुदायस्य फलोपधाननियमस्या वान्सु समुदायो वाच्यः आद्ये तादृशयत्नवृंतकं वि
त्परं च तादृशसमुदायवृंतमुद्दिश्य नेदृशं च चः प्रयोगः स्यात् नायमपाक्षीत् किंतु पर एवेति पा
कजनकयत्नस्य द्वयोरपि सत्त्वाविशेषात् द्वितीये यत्नत्वेन नस्य शक्यतावच्छेदकं तस्य प्र
त्येकसमाप्तत्वेन समुदायवृत्तित्वात् असम्भनेतु व्यापारत्वस्य शक्यतावच्छेदकत्वेपि फलो
पहितत्वसंबंधेन भावनिष्ठस्यैव तस्याख्यातेन प्रत्याय्यत्वात् फलोपहितत्वस्य व्यापार
निष्ठवृत्तित्वाद्व्यापारत्वस्य वा घपरिस्पंदश्चन्याफलत्वाभावादिति तन्न भावने निष्ठवह्नुरा

त्कोसो व्यापार इत्याकांक्षायामन्वाधानादिब्राह्मणतर्पणान्तपदार्थनिवहस्यायमसौ व्यापा
र इत्यन्वयकथनाद्ये समुदायेऽपि व्यवहारोपपत्तेः संभवति व्यापारनिश्चयव्याख्यानप्रयोग
नियमःस्थलेऽवकुना अर्थभावनानिरूपणमुपसंहरति तत्सिद्धमिति तद्वारकं यागादेर्विध्य
न्वयं दर्शयितुं तस्य आख्याताभिधेयरूपप्रदर्शनपूर्वकमंशत्रयान्वयेन पूर्णत्वया विध्यन्वयमा
पादयति सैवचेत्यादिना विशिष्टभावनाविषयीकुर्वता विधिना तद्वारा विशेषणीभूतस्य
यागस्यापि विषयीकरणाल्लिङ्गसाधिकरणन्यायेन वा विषयीकृतस्य यागादेरुद्देश्यतयैव
स्वीकरणात् ऽथारंभोक्तधर्मलक्षणाक्रान्तत्वेन यागादेर्धर्मत्वसिद्धिरिति ग्रंथार्थमुपसंह
रति एवं चेति अंशत्रयपूर्णतया भावनाया विध्यन्वये समतीत्यर्थः अत्र केचित्तु पिलगो

344

नमादिप्रणीतशास्त्राणां मोक्षार्थतत्त्वज्ञानजनकत्वात्परमपुरुषार्थपर्यवसायित्वं ननु जैमि
मिनिप्रणीतशास्त्रतत्त्वतिपाद्यकर्मणां मोक्षाजनकत्वात् तदजनकत्वमेव कुत इति चेत्
स्वर्गादिफलानां तदुद्देशेनैव कर्मणां विधिदर्शनात् न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृत
त्वमानशुरिति मोक्षे कर्मजन्यत्वप्रतीतिनिदर्शनात् तमेव विदित्वातिमृत्युमेति नान्यः पंथा वि
द्यतेऽयनायेति मोक्षे ज्ञानैकसाध्यत्वश्रवणाच्च न च भगवदर्पणबुध्याऽनुष्ठितानामपि तेषां
मोक्षहेतुत्वं कर्मशुद्धिमर्दर्पणमित्यादिशास्त्रवशेन भगवदर्पणस्य कर्मवैगुण्यपरिहारा
र्थत्वेन कर्मांगत्वात् परार्थतावगमेन फलश्रुतेरर्थवादत्वादित्याहुः तन्निराकरणेच्छया
जैनस्मृतिप्रामाण्ये दर्शयितुमाह सोयमिति नु शाश्वतफलोद्देश्यककर्मनिष्ठत्वं चेदार्थः

एषतुवाऽतिवादीत्यादेस्तुशास्त्रस्यातथाशक्यवधारणात् यद्यपितत्तत्फलोद्देश्यकानुष्ठाने
र्पणबुद्धिवैगुण्यपरिहारमात्रार्था तथापिफलांतरोद्देमंतरेणभगवत्प्रीत्युद्देशात्मकार्पणेनतुष्या
नुष्ठीयमानकर्मणांमुक्त्यर्थतावश्यमभ्युपेय वेदोदितानिकर्माणिकुर्यादीश्वरतुष्टये यथा
श्रमंत्यक्तकामः प्राप्नोतिपरमंपदं शुभाशुभफलैरेवंमोक्ष्यसेकर्मबंधनैरित्यादिभिः पुराणे
तिहासवचोभिः संयोगपृथक्त्वन्यायेनतत्तत्फलार्थानामपिमुक्त्यर्थत्वसंभवात् विध्युक्त
वाक्येनामंतरेणार्थवादतायाद्दुर्वचत्वात् नियोगशून्यानांनित्यमिति कानामेवैषमोक्षेवि
नियोगइत्यपिशंक्यं तेषामपिशास्त्रिकविधिभिः पापक्षयेविनियोगात् त्यक्तकामः शुभफ
लैर्मोक्ष्यसेइतिपदानांवैयर्थ्यापत्तेश्च कामंविषयभोगार्थमिहामुत्रचमुज्ञाने मोक्षायस्तु

345

कृतत्वंनहिब्रह्मार्पणधियाकृतमितिस्फुटेनवचोंतरेणकाम्यानामपिमोक्षार्थत्वप्रतीतेश्च
नचवनमणित्यादिश्रुतिविरोधः सामान्यप्रवृत्तायास्तस्यास्माद्ब्रह्मार्पणबुद्धिश्चस्यकर्मविषयतो
पपत्तेः नापितमेवविदित्वेतिश्रुतिविरोधः कर्मानुष्ठानसहितस्यात्मज्ञानस्यापस्माभिर्मोक्षज
नकत्वाभ्युपगमात् यथोक्तंबृहद्दीपिकायां ननुनिश्रेयससंज्ञानाद्वंधहेतोर्नकर्मणः नैकस्माद
पि किंतुज्ञानकर्मसमुच्चयादिति नाप्येवकारश्रुतिविरोधः तस्यामोक्षजनकीभूतज्ञानेतरव्य
पायात्मभिन्नविषयनिरासार्थत्वात् नापिनान्यपंथाविद्यतेऽयनायेतिश्रुतिविरोधः तस्याएव
कारबोधितनिरासानुवादत्वात् एवसमभिव्याहृतनिषेधस्यसर्वत्रतथात्वदर्शनात् -च्चतथा
वाक्यभेदात् नन्वेवमपिश्रौतेनज्ञानस्यमुक्तिसाधनत्वेनकर्मणांमुक्तिसाधनत्वस्यस्मार्तस्यवा

३४५

धः स्यादिति चेन्न मोक्षविरोधिपापनिवृत्त्यनुत्पत्तिकारणं मोक्षविरोधिकर्तृत्वाद्यभिमाननि
वृत्त्यर्थं नित्यं प्रकाशनकारित्वं ज्ञानस्याभिमतं नान्तरकार्यत्वेन बाधविकल्पयोरनाशंक्यत्वात्
अतएवोक्तं हृद्दीपिकायां नित्यमित्तिकैरेव कुर्वाणो दुरितक्षयं ज्ञानं च विमलीकुर्वन्नभ्यासेन
च पाचयेत् वैराग्यात्पक्वविज्ञानः कैवल्यं भजते नर इति यजेत स्वर्गकाम इतिवज्ज्ञानस्य मोक्ष
साधनताविधेः स्पष्टस्यादर्शनाच्च मानान्तरसंवादसहितेन तरति शोकमात्मविदिती दर्शनेन च
विधिश्रुत्येनापि च वसानस्यासिद्धिरिति चेत् न प्रयाजोनुयाजाद्यङ्गेभ्यान्तर्यस्याभिमत्त्वा
दिति च वसाद्य्याज्ञानुयाजानां प्रानन्तर्याभिमतार्थत्वापत्त्याफलवदफलन्यायेनागत्यासंभवा
पत्तेः प्रकरणसहायेन सर्वमुनाशा सार्वकामा शास्त्रावगतदार्शिकफलभूतत्वान्तर्याभिमतवं प्रत्येव

ऋत्वपकारशणाङ्किकयासाधनत्वापत्तेः नचतरतिशोकमित्यादौ विधिकल्पनेनापिज्ञानमोक्ष
योः साध्यसाधनत्वोपपत्तिः औपनिषदैर्ज्ञाननिविधस्यानंगीकारात् परैरपिमिथ्याज्ञाननिवृत्त्यधीन
जन्मनिर्मोक्षेनत्वज्ञानाधीनतायालोकसिद्धत्वाभ्युपगमेनविधिकल्पनायाः कर्तुमनुचितत्वा
त् अतएवलोकसिद्धसाधनत्वानुवादितीश्रुतिनैरात्म्यस्यकर्मसाधनत्वस्यबाधायालं नहि
कर्मणांमोक्षसाधनत्वेज्ञानस्येवलोकसिद्धत्वेनश्रुतेरप्यनुवादत्वंशंक्येत अस्मन्मतेतुसंत
दिविधाश्रयणोभिन्नावांतरकार्यत्वेनैवोक्तत्वात्तद्बाधपरिहारात्तदाश्रयणफलत्वंतत्रम
वक्ष्यामः तर्हिपरमतेनलोकसिद्धज्ञानस्यमोक्षहेतुत्वंशास्त्रीयेणकर्मणांहेतुत्वेनबाध्य
तेतिकर्मणैवमोक्षसिद्धिरितिकर्कैःकिंसाधितिचेन्न अपूर्वाधिकरणन्यायेनलोकसि

द्वयस्कस्य मानतिक्रमेणैव शास्त्रप्रवृत्तेः लोके च मिथ्याज्ञाननिवृत्तेस्तत्त्वज्ञानाधीनत्वावग
मात् तं विना मोक्षासंभवात् अतो यथैव पश्वादिप्राप्तिहेतुत्वेन विहितं चित्रादि लोकावग
मतहेतुभावशरीरादिसहितमेव स्वफलायालमित्यंगीक्रियते तथैव मोक्षहेतुत्वेन विहितानि
कर्माणि ज्ञानसापेक्षाण्येव तत्प्रापकाणीत्यभ्युपेयं अत एव ज्ञानकर्मणोः स्थानत्रयव्यतिरेके
णापि मोक्षाभावं दर्शयति श्रुतिः अंधं तमः प्रविशंति येऽविद्यामुपासते ततो भूय इव ते त
मो य उ विद्यायां रताः इति अत्रोपासनेरताः इति विवेकत्वनिष्ठा क्रियापरव्यतिरेकः कथ्यते ते
नोभयनिष्ठा एव समस्तरं नीमुक्तौ समुच्चितोभयमेव मुक्तिहेतुरित्युक्तं भवति न च कर्म
णां प्रतिबंधकदुरितनिरासेनान्यथासिद्धत्वान्न फलहेतुत्वमिति सांप्रतं ज्ञानस्यापि प्रति

बंधकमिथ्याज्ञाननिवर्तकतायास्तुल्यत्वात् प्रतिबंधकनिरासस्य व्यापारत्वकल्पनायाश्च
पिसमत्वात् नच मुमुक्षुं प्रतिवेदान्तिमं च लोकममुं च परित्यज्यात्मानमन्विच्छेदिति वेदोक्तेः क
र्मत्यागश्रवणान्न कर्मणां मोक्षहेतुत्वमिति साम्प्रतं ज्ञानात्पूर्वं तत्समकाले वानुष्ठितानां ज्ञा
नेन सह मुक्तिहेतुत्वस्य ज्ञानपरिपाककालीनत्यागेन सह विरोधाभावात् यथा रोगिणो
प्रति कश्चिद्ब्रूयात् अथ ममयं क्वाथो ऽनुपयुक्तस्तं परित्यज्य वेदं चूर्णं सेव्यमेवं स्वास्थ्यं भविष्यती स्वा
ति नचैवं चूर्णमेव स्वास्थ्यहेतुर्न क्वाथ इति शक्यं वक्तुं तथा ज्ञानपरिपाककाले कर्मणां
त्यागश्रवणेपि न मोक्षहेतुत्वानुपपत्तिः उक्तं हि व्यापस्तुधायां परिपाके तज्ज्ञानेनात्मन
कर्मसंबंधाभावार्यत इति श्रक्रवानतन्फलकामनया कर्मानुष्ठानत्यागाभिप्रायत्व

त्मण एव वस्तां स्मृत एवोक्तं काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुरिति एवमपि ज्ञा
नादेव तु कैवल्यमिति श्रुतिविरोधोपरिहार्य इति चेन्न यदर्थं तरसामासोमस्यादित्य
त्र रथं तरेण स्वर्गनिष्पत्तिर्गृहत्या हन्निवर्तते तत्त्वज्ञानं वा विज्ञानपदोत्तरैवकारेण तत्त्वनिष्प
त्तिर्नान्तत्त्वज्ञानस्यैव निरासो विवक्षितः स्यात् नन्वेवमपि ज्ञानस्य मोक्षहेतुत्वे प्रामाणिके विविदिषावा
क्याद्ब्रह्मकर्मणां ज्ञानहेतुत्वेऽवगते स्वर्गाद्यर्थं विहितेभ्यो नैरपूर्वस्य वेदमोक्षाय विहितेभ्यो ज्ञानस्य या
पारत्वाश्रयणान्नाग्नेयोग्नीषोमीयवत्कर्मज्ञानयोर्मोक्षे समुच्चयसिद्धिरिति चेन्न तयोर्नान्तरम
पनुद्धयानां नित्यादिकर्मणां मोक्षप्रतिबंधकदुरितनिरासार्थत्वेन मोक्षोपयोगिनां ज्ञान
व्यापारत्वासंभवात् करणत्वावच्छेदकरूपावच्छिन्नं यज्ज्ञानं यत्वेव फलं जनयति तस्यैव व्यापा

348

रत्वनियमात् ननु देहादिभिन्नजीवात्मज्ञानस्योपनिषद्रूपस्यापि यदेव श्रद्धया करोति विद्ययो
पनिषदेति वचने उपनिषच्छब्दोक्तस्यानेनैव वाक्येन लिङ्गेन वाक्यत्वेऽर्थज्ञानावगाहकत्वे संबधवा
न्निकादौ कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते इत्यादिनोक्ता अपहतपाप्मत्वादिसत्यकाम
त्वाद्यष्टगुणवदात्मगोचरस्यासौ वेदितव्यः स विजिज्ञासितव्यो मंतव्यो वा द्रष्टव्य इत्यादिशास्त्रविहितस्य
तु विज्ञानस्य स सर्वांश्च लोकानाप्नोति सर्वांश्च कामानाप्नोति संकल्पादेवास्य पितरः समुत्तिष्ठं
तीत्याद्यर्थवादोक्ताभ्युदयफलार्थत्वं व्याकरणाधिकरणे निर्दिष्टं आत्मानमेवोपासीतेति श्रुति
विहितस्य निर्गुणात्मतत्त्वज्ञानस्य तु स खल्वेवं यावदायुषं वर्त्तयन् यावदायुषं ब्रह्मलोकमभिसं
पद्यते न स पुनरावर्त्तते इत्यपुनरावृत्त्याख्यपरमात्मप्राप्त्यवस्थाफलसंकीर्त्तनान्निःश्रेयसार्थं

त्वमिति नन्वेवोक्तं परमशब्दोऽनौपाधिकत्वभ्रमः ‑ अनौपाधिक एवात्मा ब्रह्मशब्दवाच्यः परमा
नंदोपभोगहेतुत्वाल्लोकशब्दवाच्यश्चेत्यनन्तो ब्रह्मलोकमिति कर्मधारयेण विवक्षितत्वादिति
स्वव्यधितुमौपाधिकरूपपरित्यागेनासंसारिरूपप्राप्तिर्जीवस्यात्मकत्वेन तत्प्राप्तेरक्षयत्वं वस्तु
वधितुं शक्यतेति निर्दिष्टा ब्रह्मलोकप्राप्तिः परमात्मप्राप्तिशब्देन व्याख्याता तत्प्राप्तौ बंधककर्माभावा
त्प्राप्तायाश्च पुनरावृत्तेरनुवादमात्रं न स पुनरावर्तत इति न तु इष्टं यत्फलमेतदिति वक्तुं तस्या एवा
पुनरावृत्त्यात्मकत्वोक्तेरित्याशयस्तु धायां व्याख्यातं ‑ अस्माच्च ग्रंथादकर्तृत्वभोक्तृत्वाद्यात्मकासं
सारिरूपात्मतत्त्वज्ञानस्यानवच्छिन्नानंदात्मकमोक्षज्ञापकत्वप्रतीतेस्तादृशात्मज्ञानानंतरं च कर्मा
नुष्ठानासंभवात्कथं ज्ञानानंतरं कर्मानुष्ठानस्य मोक्षोपयोगवार्तापि गच्छते ननु मोक्षे कथमा

३४९

349

नंदोपभोगः न तावदुत्पत्तिमत्सुखं प्रकाशानन्द इति वक्तुं शक्यं सुखोपभोगरूपश्च यदि मोक्षः प्रक
ल्प्यते स्वर्ग एव भवेदेषपर्यायेण क्षयी च सः न हि कारणवत्किंचिदक्षयित्वेन गम्यत इति संबंध
वार्त्तिके निरस्तात् नापि स्वरूपसुखं स्वप्रकाशानन्दः प्रकाशानन्द इति शक्यं वक्तुं संसारावस्थायामपि
प्रकाशापत्तेः श्रोमित्युक्तेरनुभवविरुद्धायाः साहसमात्रत्वात् तत्र सोऽभिभूत इति चेत् न प्रकाश
मानेप्रकाशनिवारणात्मकाभिभवस्य दुर्निरूपत्वात् यत्तु केचिदाहुः मुक्तो वाह्येन्द्रियनिवृत्तावपि
मनसोऽवस्थितेः स्वरूपसुखं मानसप्रत्यक्षेणानुभवन्नेवात्मावतिष्ठत इति तन्तुच्छं शरीरं विना मान
सप्रत्यक्षासंभवात् च मनो वागिति मनसोऽपि तत्राभावप्रतीतेश्च व्यापकस्य मनोपाधिकं
मनोमुक्तं शाप्यत्वमेकीर्त्तिने न मनोरूपोपाध्यवस्थिते तत्र तदसंमतत्वाश्चेति वेत्त्र वायुवि

३४९

च्छिन्नदेशास्थितनदीप्रवाहवत्सांसारिकदुःखसंवलितस्य स्वरूपसुखप्रकाशस्यासतोप्यसत्वव्य
वहारोपपत्तेः निर्वासुदेशास्थापितनतत्स्वभाववत्त्वमुक्तोनन्त्याप्तिश्च व्यवहारोपपन्नेरिति उक्तंवनि
जंयत्वात्मचैतन्यंमानंश्रोष्यतिचयः यच्चनित्यविमुक्तवादिनैनैवमुच्यते इति न्यायसुधानुसारि
णोपंथाः आत्मवादग्रंथेमिश्रास्सूत्राकृः देहव्यतिरिक्तस्याविनाशिनात्मनः श्रोपनिषदंज्ञान
मध्ययनविधिसिद्धार्थज्ञानवल्लिंगात्पारलौकिकफलकर्तृत्वंगरत्याह नास्तिक्यनिराकरि
ष्णुरात्मास्तितांभाष्यकृदत्रयुक्त्या दृढत्वमतद्विषयः प्रबोधः श्रयातिवेदांतनिर्णवर्णितकात्तिकी
कैः प्रदेशविशेषचिंतनाद्यात्मकेतिकर्तव्यताविशिष्टोपासनानांअभ्युदयार्थत्वं शांत्यादी
तिकर्तव्यतोपेतोपासनानांकाम्यनिषिद्धवर्जनसहितनित्यनैमित्तिकानुष्ठानसहितानांमु

कार्यत्वं मुक्तिश्च भोगायतनभोगसाधनत्वभोग्यात्मकत्रिविधबंधस्यात्यंतिको विलयः ननु सुख
प्रकाशः । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति मुक्तौ प्रियस्पर्शस्यापि निषेधात् विज्ञानात्म
रेकेन विजानीयादिति मुक्तावात्मप्रकाशानिवारणाच्च । आनंदप्राप्तिश्च नतयोः दुःखाभावे एवोपचा
रेण गमयितव्याः द्रष्टुर्दृष्टेर्विपरिलोपो न विद्यत इति च प्रकाशस्यात्मनो विलोपाभिप्रायेण न च वाप्रि
यास्पर्शवचनं वैषयिकनिषेधाभिप्रायं यतः अनयोर्विरोधे मानांतरेण निर्णयः कर्तुमुचितः
बाधितं च स्वरूपसुखं नेदानीमहं किमपि सुखमनुभवामीति इत्यन्वयेन सौषुप्तिकेन सुखा
ननुभवेनैव बाधितं च दृष्टिश्रुतिस्मृतिविज्ञातीनां नियतत्वश्रोत्रादीन्द्रियजन्यत्वनियत
गंधादिविषयत्वानात्मकानामस्मृतौ मुक्तावात्मनि केऽपि संबंधयंथे नस्मात्कर्मक्षयादेव हेतवो

वेनमुच्यते नह्यभावात्मकंमुक्तामोक्षनित्यत्वकारणात् नचक्रियायाः फल्याश्चिदभावः फ
लमिष्यते नत्रैज्ञानात्मतत्त्वानांभोगात्पूर्वंक्रियाक्षये गन्तरप्रवयासंभावाद्देहानोत्पद्यते पुन
रितिसोपपत्तिकाभावात्मकमोक्षप्रतिपादनादानंदप्राप्तिश्चवनमुपपद्यासमासमिति ॥ ऽस्मि
न्नपिमतेउपासनाद्यापारभूतदेहभिन्नात्मतत्त्वसाक्षात्कारानंतरंनकर्मप्रवृत्तिः संभवति देह
संबंधोपाधिकेन ब्राह्मणोहमित्याद्यभिमानेन ब्राह्मणत्वादिव्यपदेशभाजएववसताधि
धानेधिकारव्यवस्थायाःपूर्वाधिकरणाकरग्रंथेऽभिधानात् ॥ ३ ॥ अतत्त्वसाक्षात्कारानंतरं
वृत्तादेहाभिमाननिवृत्तेरवश्यंभावात् नचकर्मेतन्मतं ॥ औपनिषदस्यदेहव्यतिरिक्तात्म
ज्ञानस्यलिंगात्परलोकफलविहितकर्मांगत्वेनाहफलनिषिद्धकर्मांगत्वमपिप्रसज्यत

नादृशात्मज्ञानशून्यस्य तादृक्फले कर्मणि प्रवृत्तेरिव तादृक्फलान्निषिद्धान्निवृत्तेरप्यसंभवात्
न वेदापत्तिः अनात्मज्ञेन कृतं ब्रह्महत्यादेर्वैगुण्येन स्वत्यजनकत्वान् अत एवात्मज्ञा
नस्य क्रत्वर्थतायां नास्तिकोपन्यस्तस्यानेन विना परलोकफलेषु कर्मसु प्रवृत्तिनिवृत्त्यसंभवा
दिति हेतोर्व्याख्यावसरे आकरणाधिकरणन्यायसुधायामुक्तं उपकारकत्वमात्राभिप्रायः
क्रत्वर्थश्चायं इति न च गंधनिवृत्तिर्मोक्षः स्यपि साधकदुःखनिवृत्त्यात्मस्यपुरुषार्थत्ववत्सुखनि
वृत्तिवद्वेशानापुरुषार्थत्वापत्तेः अनिष्टनिवृत्तेर्लोके काम्यत्ववदिष्टनिवृत्तेर्द्वेष्यत्वस्यापि दर्श
नात् सुखाभिव्यक्त्यर्थं तथा दुःखनिवृत्तेः कामनादर्शनेन स्वतः पुरुषार्थभावादिति चेन्न आ
त्मज्ञानरीत्याध्ययनसिद्धार्थज्ञानस्यापि क्रत्वङ्गत्वापत्तेः अथोच्यते विहितप्रवृत्तेरिव नि

षिद्धनिवृत्तेरपूर्वसाधनत्वाभावेनांगत्वं हुक्तं निषेधस्यसत्यपि पापापूर्वसाधनत्वे रागतो
ऽप्याप्तत्वात्तादृशस्यैव नञस्यानिष्टहेतुत्वज्ञापनान्नांगाकांक्षानुत्पत्तेनरतेनग्राहकत्वं विहितेपूर्वसा
धकाभावात्संभवत्यध्ययनसिद्धार्थज्ञानस्यांगत्वमिति नहि तुल्यन्यायतया ऽत्रज्ञानस्यापि
विहितकर्मांगत्वं स्वीकुरु यथा वनिषेधाध्ययननियमो निषेधेष्वनुपयुज्यमानोपि प्रायश्चि
त्ताधिकारहेतुभूतामनुतापहेतुकां निवृत्तिं संपादयन्सापवृत्तेऽपूर्वयुज्यतेऽन्यामित्रत्य
वार्त्तिकेनेन विनानिवृत्त्यसंभवोऽर्थत्वमित्युपन्यासः संगच्छते दुःखवज्झामासारिकसुखे
विवेकिनां द्वेष्यत्वदर्शनात्ततन्निवृत्त्यामोक्षस्यापुरुषार्थत्वापत्तिः अत एव सुखानुबंध
मंतरेणदुःखनिवृत्तेः कामनादर्शनाद्दुःखनिवृत्तेः पुरुषार्थत्वोपपत्तिः यथाकुमित्राः सु

स्वड्गः स्वोपभोगो हि संसार इति शङ्क्यते नयोरनुपभोगं तु मोक्षं मोक्षविदो विदुः ॥ निरपेवमे
वाहमेदं संसारमोक्षयोः न ह वै सशरीरस्य प्रियाप्रियविहतिनस्त्य अशरीरं वाव सन्तं स्पृशतो न
प्रियाप्रिये आनन्दात्मकमात्मानं ये वदन्ति स्वयंप्रभं तन्मतेपि च संसारान्मुक्तेरेतावतापि चेति
मिश्रानुसारिणां पन्थाः द्वयोरपि च पथोस्तत्त्वज्ञानोत्तरं नित्यादिकर्मानुष्ठानेष्वर्थं ज्ञानाग्निः
सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेति स्मृतेस्तत्त्वज्ञानेनैव सर्वदुरितनिवृत्तेरिति चेन्न ॥
ज्ञानपक्षं कामात्स्कंदितानन्तत्त्वज्ञानपरिपाकात्तस्यापि भ्रमस्यानिवृत्त्यसंभवेन कर्माधिकारोप
पत्तेः संबंधग्रन्थवार्त्तिकवार्त्तिकाद्यैर्ज्ञानाग्निरित्यादिस्मृतेरौपचारिकत्वाश्रयणेन ज्ञानस्य कर्मनाश
कत्वनिषेधाद्वैराग्यादिवत्तथाप्येषां ज्ञानेन निराक्रियया कर्मक्षयो हि विज्ञानादित्येन निःप्रमाणकं

फलस्याल्पस्य वा दानं राजपुत्रापराधवदिति तस्माद्युक्तमुक्तं ज्ञानोत्तरमनुष्ठेयानां कर्मणामव
गम्यते किंच ज्ञानस्य व्यापारत्वेप्यागस्यापूर्वं प्रतीतकर्मणां ज्ञानं प्रत्यंगत्वं वा ह्यनवतत्संभवति
एकाधिकारिकयोरेकविहितयोरंगांगित्वसंभवात् कर्मणां जीवनादिनिमित्तवदधिकारिभान्
ज्ञानस्य मुमुक्षुमात्राधिकारिकत्वात् विविदिषावाक्यं तु मोक्षार्थत्वेनाविविदिषार्थत्वेन वा
कर्मणां विधायकं तस्मात्समप्राधान्येनैव ज्ञानकर्मणोर्मुक्तिहेतुत्वं यदि वा ज्ञानद्वारा कर्मणां
मुक्तिहेतुत्वं सर्वथापि कर्मणां मुक्तिफलत्वात्कर्मविचारार्थमिदं शास्त्रस्य संभवति मुक्तौ पर्य
वसानमित्याशयः ननु ईश्वरार्पणबुद्ध्यानुष्ठीयमानानां वेदोक्तसमस्तकर्मणां परस्परस्पर
सहितानां मुक्त्यर्थत्वेन विधानेऽशक्यार्थविधिः स्यात् न हि समस्तकर्माणि केनापि कर्तुं शक्यं

ते ऽतो वेदोदितानीत्याद्युदाहृतशास्त्रं न मुक्त्यर्थत्वेन कर्मानुष्ठाने प्रमाणमित्यत आह न
चेति यथा हि यत्करोषि यदश्नासीति येऽक्रिये स्वभावतः कर्तव्यतया प्राप्ते तयोरेवेश्वरार्पण
बुद्ध्यानुष्ठानं विधीयते न त्वपूर्वक्रिये विधीयेते तथैव होमदानतपांसि विद्याश्च वयस्थपुंसः
स्ववर्णाश्रमानुसारेण कर्तव्यतया प्राप्तानि तत्र शास्त्रेण स्वर्गादिवन्नादरबुद्ध्या कर्तव्यतया विधी
यंते न त्वपूर्वाणि कर्माणि यच्छब्दोपबंधानुपपत्त्यापातात् यथाश्रमं त्यक्ता कामद इति शास्त्रात्
रात्र न चैवमपुनरथोद्यापितोपासनानामपि वृक्षाप्तकर्तव्यतानां कर्माङ्गिनां यास्तादरबुद्धे
रेवमुक्तिफलत्वेन विधिरस्त्विति न कर्मणामिति वाच्यं तथासत्याश्रयभूतेष्वसत्स्वपि फलांत
रारंभापत्तेः न च शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैरिति वाक्यशेषानुपपत्तेः नचैवं स्वभा

वज्ञानस्यागमनादेरपि भगवदर्पणांगीकारे निषिद्धस्यापि वा कृतस्य न दोषापत्तिः देवतानां
गुरूणां च मातापित्रोस्तथैव च पुण्यं देयं प्रयत्नेन नापुण्यं चोदितं क्वचिदिति माधवोदा
हृतांगिरोवचनात् अपुण्यशब्दस्याधर्मस्याशब्दपर्यायत्वात् अर्पणशब्दस्य दानवा
चितायाः प्रसिद्धत्वात् ननु स्मृतिशब्देन यदि ज्ञाने विशेषस्तन्मूलकं वचो वा विवक्ष्यते
उभयथापि न तस्य प्रामाण्यं संभवति अनधिगतार्थगन्तृताया अभावात् पौरुषेय
वाक्यस्यापि धर्मप्रामाण्यसंभवे वेदापौरुषेयत्वसमर्थनस्य वैयर्थ्यापातात् अथ स्व
तंत्रप्रामाण्यप्रसिध्येन त्वत्कृतं स्मृतीनां तु प्रमाणानां नरमूलत्वेन पराधीनप्रामाण्यमस्
त्विति चेन्न प्रत्यक्षसूत्रे निरस्तधर्मप्रामाण्यानां प्रत्यक्षादिलौकिकप्रमाणानां मूल

त्वासंभवात् । नापि स्मृतिरपि मूलत्वेनोत्प्रेक्ष्यमाणा नित्यानुमेया स्यात् । उत्सन्ना वा इदानीं न च प्रत्य
क्षा वा नाद्यः । अंधपरंपराप्रसंगात् । द्वितीयेपि स्मार्तधर्मनिबंधनरूपायाः कस्याश्चिच्छा
खायाः एवमानवतोत्सादो वक्तुं शक्यः । इति वेदशाखानां नियतसंख्यत्वात् । नापि नानाशा
खाविप्रकीर्णाः स्मृतिमूलभूताः श्रुतय उत्सन्ना इति शक्यं कल्पयितुं । सर्वासां तावद्धि ताध्ये
तृकाणामध्येतृमात्रस्याप्युच्छेदासंभवात् । न तृतीयः । अनुपलब्ध्या बाधितत्वात् । शाखां
तरीयत्वेन पूर्वपक्षायामप्युपलंभकाभावेन परानुपलब्धिः संभवत्येवेति चेन्न । प्रमाणाभि
रूप्यानुपलंभेन कुसुमविज्ञानमेवं न वस्तुप्रत्यक्षतयानुपलभ्यमानानामपि परप्रत्यक्षतायाः
स्मृतेः सत्वे प्रमाणमस्ति । न तावदनुमानं पौरुषेयवचसो वेदमूलकस्यापि न च धर्मशास्त्रप्रवर्तक

नेनपरिगणितमन्वादिवाक्यस्य वेदमूलकत्वाविनाभावः विरोधाधिकरणभाष्योक्तन्यायेन श्रु
तिविरुद्धस्मृतिषु स्फुटव्यभिचारप्रतीतेः वेदोखिलोधर्ममूलंस्मृतिशीलेचतद्विदां आचार
श्चैवसाधूनामात्मनस्तुष्टिरेवचेत्यादिषु स्मृतिषु क्रमगमकवचःस्वेव व्यभिचाराच्च नह्येषां वेदमू
लत्वसंभवः चोदनासूत्रादौ स्मृतिपादेच युक्त्यादिनन्यायमूलत्वात् एतेनप्रामाण्यानुपपत्तिप्रसू
तार्थापत्तिरेववेदमूलत्वेप्रमाणमितिनिरस्तं उक्तविरुद्धस्मृतिवदुदाहृतस्मृतिवद्बुद्धस्मृ
तित्वहेतुनासर्वस्मृतीनांवेदमूलत्वाभावनिश्चये धर्मप्रामाण्यस्यैव बाधात् नचवेदमूलक
त्वाभावेनाष्टकादिस्मृतीनांधर्मप्रामाण्यासंभवात् नचतद्विदामित्यनेनैवयुक्तस्मृतिवद

र्थान्तरेऽपि प्रामाण्यं वक्तुं शक्यं अश्रुतत्वयोगात् नच तद्विदामित्यनेनान्तद्विस्मृतेर्धर्ममूलत्वा
भावः शाक्याद्योधयितृ चतुर्दशविद्यास्थानसंवादिन्याः शाक्यबुद्धादिगोचरायाश्च तद्विद्वात्स्मृ
तेरपि प्रामाण्योपपत्तेः नच चतुर्दशविद्यास्थानानामेव धर्मे प्रामाण्ये नियमान्न बाह्यस्मृतेः प्रा
माण्यं अनधिगतयथार्थबोधकेव वसि प्रामाण्याभावस्य दुर्निरूपत्वात् प्रवर्त्तनाविषयत्वेने
न बोधिनस्सत्यवदनस्य श्रेयःसाधनत्वाभावान्न यथार्थबोधकत्वमस्येति चेत् न सत्यवद
नं श्रेयःसाधनमित्येवार्थः ननु स्वबोधितं न साधनमिति न च सत्यवदनं श्रेयःसाधनत्वं
येनायथार्थत्वं स्यात् तथापि स्वबोधिनस्सत्यवदनात्मकस्यार्थैकदेशे स्यादप्रामाण्यमिति

वेत्र वाघस्मृत्यनुष्ठापितमत्यवदनात्मकैदेशे मन्वादिस्मृतिप्रामाण्यस्यापि वक्तुमशक्यत्वा
त् न च शीलस्य हृ पृथगुपन्यासः संगच्छते न तावत्तद्विदां च स्मृतिशीले इत्यत्र शीलपदस्याचा
रपरतया व्याख्यानादिहापि शीलपदमाचारपरमिति शंक्यं आचारस्यैव साधूनामित्यनेन
पौनरुक्त्यात् न च शीलं रागद्वेषपरिहाणं तच्च न ज्ञापकं तथा धर्ममूलं किंतु निर्वर्तकं तयोरप्यस्पा
र्थ इति गोविंदराजोक्तं साधु एकस्य धर्ममूलत्वशास्त्रस्य वेदादिविषये शीलविषये च भिन्नार्थ
कल्पनायोगात् मनोजयविधानप्रकिमवचः पौनरुक्त्याच्च एतेन ब्रह्मण्यं वेदपितृभक्ति
तासौम्यता परोपतापितानसूयुतामृदुता पारुष्यं मैत्रता प्रियवादित्वं कृतज्ञता शरण्य
ता प्रशांतिश्चेति त्रयोदशविधं शीलमिति हारीतोपदिष्टमिह शीलपदार्थ इति कुल्लूक

356

महोक्तं निरस्तं ॥ अस्यापि धर्मनिर्वर्तकत्वोपदेशे पूर्वोक्तदोषानपायात् यत्तु वेदविदां बहूनां
चित्तप्रसादः शीलं धर्मे प्रमाणं स्मृतेर्दुर्बलमाचारस्य च बलं निर्निबंधनत्वान्मिथ्याज्ञसिद्धिमू
लत्वेनाशंकनीयत्वाच्च ॥ आत्मतुष्टिश्च वेदविदः न्यास्य चित्तप्रसादरूपमानां नरेभ्योदुर्बलतरमिति
सर्वज्ञनारायणीयं व्याख्यानं तदयुक्तं एकपुरुषीयप्रसादस्य प्रामाण्योक्तौ के स्मृतिक
न्यायेन बहुपुरुषीयप्रसादस्य प्रामाण्ये विधाने शीलोपन्यासस्य वैयर्थ्यापत्तेः स्वादेन तु
अन्यविषयस्याक्षेपपरिहारेण शास्त्रार्थनिरूपणप्रवणतारूपो मनोधर्मः समाधिः शील
मुच्यते शीलसमाधावृत्तिनिधानुपायात् स्मृतिशीले इति द्वंद्वेन वोक्तशीलसापेक्षा स्मृतिर्ध
र्मे प्रमाणमिति कथ्यते तेन वेदार्थविचारप्रयुक्तसमाधिरूपत्यानां स्मृतिर्न प्रमाणमिति मेधा

२५६

निद्यास्यास्यास्त्री कार्येति यदिह्यस्माभिस्मृतिकर्तृणांमन्वादीनांमध्येकेसमाधिभृत्याः के
वलं ह्यंतरंगनिविवेकः कर्तुंशक्येत दोके समाधिशून्यवेदविस्मृत्यनादरसिद्धेफलवानेष
उपदेशोस्मास्वपि स्यात् नचविरानीनेषुमन्वादिविषयविवेकः शक्योस्माभिरिति विवेकः श्री
गारश्चैवसाधूनामित्यस्यापि किमीगूपमर्वाचारसाधारणकृत्यंगीकारेणनिर्वाहः उत सम
निवस्तत्येकं मूलकृतिकल्पनया नाद्यः विशेषरूपगोचरमूलस्मृतिस्वयंनयानिर्लिप्ति
स्यापि साधाचारस्यानुसरणीयत्वापत्तेः नद्वितीयः प्रतिदेशं प्रतिकुलमनंताचारेषु श्रु
तीनांसंभावनायोगात् श्वात्मतुष्टेरपि धर्ममूलत्वं कारकहेतुत्वेन गम्याज्ञापकहेतुत्वं नवा
आद्येपि नकुलदंष्ट्रो नौषधेर्विषनिर्हरणशक्तिवच्छिष्टात्मतुष्टिर्धर्मविषयाणांश्रेयः

357

साधनशक्तिजननाद्धर्मत्वं घ्नतिकारकत्वं यथा यद्वा सिद्धश्रेयःसाधनशक्तिके धर्मेऽधिका
रसंपादनेन साक्षाच्छेषत्वेन वा कारकत्वं यथा स्यात् सर्वथाऽपि वेदार्थस्य ज्ञापकहेतुत्वं वदतो
धर्ममूलत्वं शब्दस्यानन्यथापत्तिः अथ संदिग्धार्थनिर्णायकत्वेन ज्ञापकहेतुत्वमेवास्तु तथा
च श्रुतिः यदेव किंच नानूचानोभ्यूहत्यार्षं तद्भवतीति कविवस्था सतां हि संदेहपदेषु व
स्तुषु प्रमाणमंतःकरणप्रवृत्तय इति मेवं आत्मतुष्टेरनियतविषयत्वेन धर्माधर्मयोरव्यवस्था
पत्तेः अथ वैकल्पिकानां मध्ये यत्रात्मतुष्टिस्तत्सोऽव श्रेयःसाधनत्वनिर्णयं कुर्वती भवतु ध
र्ममूलं तथा च स्वस्य च प्रियमात्मन इति याज्ञवल्क्यस्मरणेरन समार्थीयाव्याख्यानं कृतं

विज्ञानेश्वरेण अनुसृतं चेहापि मेधातिथिना आह च गर्गव्यासः वैकल्पिके आत्मनस्तु
ष्टिप्रमाणमिति न च न वैकल्पिकानामन्यतरस्यामेतुष्टिर्व्यवस्थापकतयालोकदृष्टत्वेनोप
न्यासवैयर्थ्यात् दृष्टोद्धमर्थिनः तृणारणिमणीनामन्यतरत्रस्वतुष्टेर्व्यवस्थितेर्नियमः ए
नेन श्रुतिस्मृतिः सदाचारः स्वस्य च प्रियमात्मनः सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृ
तंमिति याज्ञवल्क्यस्मृतेर्व्याख्यावृसरे यदपरार्केणोक्तं प्रियमनस्तुष्टि यत्कर्म द्वयोरुस्त्वाद
मनस्तुष्टिपरिच्छिन्नतया विधीयते यथा यस्मिन्कर्मण्यकृते मे मनसः स्यादल्लाघवं तस्मिन्सा
वत्तु न कुर्याद्यावत्तुष्टिकरं भवेदिति तस्य निश्चये मनस्तुष्टिमूलं अनेन साधयामीति मनः
कर्मसंकल्पः तज्जः कामः धर्मचिकीर्षा सापि धर्मनिश्चयमूलं यदेवैर्न अर्थापनमेदथार

तस्याद्वंद्वप्रतिरूपविशेषैवेत्यादावपि निरस्तं यथारीत्याम्नस्तु एष संकल्पजः कामः यो धर्ममूल
त्वमिह विवक्षितं तथारीत्योदाहृतशास्त्रिकविधिभिरेव धर्ममूलत्वं तथा तस्योसिद्धाव
स्योपदेशस्य वैयर्थ्यात् अतः स्मृतिप्रक्रमगतवाक्यानामप्रामाण्येन दृष्टान्तेन दृष्टस्मृतीनाम
प्रामाण्यं अथ यत्किंचिन्मनुरवदत्तद्भेषजमिति श्रुत्यैव मनुस्मृतेः प्रामाण्यं कथं नाप्रामा
ण्यशंकेति चेन्न सोमारुद्रयागप्रकरणपठितस्य मानवी ऋचौ धाय्ये कुर्यादित्यस्य विधेः
समीपाम्नातस्य यद्वैकिंच स्तुतिपरत्वेन स्वार्थतात्पर्याभावात् वस्त्वर्थोच्चारणकर्मणः
शास्त्रादृष्टार्थश्च लयज्ञादिद्वारा दोषनिवर्तकत्वेन प्रामाण्यस्याप्युपपत्तेश्च ववरश्च मंदां गं
शादिशास्त्रवन्मनुशास्त्रस्य श्रुतिसामान्यमात्रत्वेन पुंविशेषपरत्वासिद्धेश्च एतेन सहो

वाचव्यासः पाराशार्यइतिस्मृतौपराशरमुपजीव्यव्यासस्यकृतत्वादचिंत्यमहिमापराश
रइतिमाधवोक्तंपरास्तं नतःकथंव्यासप्रणीतेतिहासांतर्गस्यपट्करोशीत्यादेःप्रामाण्य
मतस्त्राह अस्यार्थइति अपध्यपीत्यर्थे पौरुषेयत्वाभ्युपगमार्थः यद्यप्यस्याःपौरुषेयत्वंत
थाप्यष्टकादिस्मृतिवत्संभवन्मूलप्रामाण्यमितिदृष्टांतव्याजेनस्मृतिप्रामाण्यंव्यवस्थाप्य
ते ननुतावद्वेदमूलत्वंवदतांधर्मत्वेनस्मरणंनाहशानापारंपर्येणतथात्वीकरणंचाष्टका
दिषुवेदमूलत्वंविनासंभवति नन्वननित्यानुमेयवेदमूलत्वासंभवेपिएकत्रएवनाना
शाखाविप्रकीर्णप्रत्यक्षवेदवचोमूलत्वंनिरूपयितुं स्मृतिमूलविज्ञानात्मककार्यलिं

भा॰दी॰

३५९

359

गकात्कारणसामान्यानुमानाल्लाघवतर्कसहकृतात्सिद्धस्य मूलस्य भूतत्वाद्दृष्टा वेदस्या
नुपलंभेन निरासायोगात् नहि मन्त्रमविछलंभोऽत्र क्यानुमानो विरमनेकपुरुषस्य मन्त्रमानुप्र
त्रिकल्पनायां गौरवातिशयात् नच श्रुत्यश्रुतिविरोधान्यायमूलत्वं तथा वाऽष्टकादिस्मृतिश्च
स्तियेनोक्तानुमानवाधोऽर्थान्तरतावासंभावितास्यात् उत्सन्नश्रुतिमूलकत्वेपिश्रुतेस्त
त्सादस्य वकल्पनायां गौरवात् यदिपरंस्मृतिकर्त्रोऽपलंभेनतेषामुत्सन्नाः पाठश्च योगा
दनुमीयंतरस्तुकैः स्मृतिव्याख्यात्राव हरदत्ते नस्मृतीनामुत्सन्नवेदमूलत्वाभिधानात्त
च्छारवीयत्वेन मुनिद्वयवद्वृत्तस्यापि विधेकस्यचित्तच्छारवायां नथापिमंत्रार्थवादानुमेयश्रु

मनुपलंभोयोत्सन्नवेदमूलत्वंस्मृतिकृयपेते

३५९

श्रुतिमूलकानांकासांचिन्नयादिस्मृतीनांदर्शनाद्यकारेपिकल्पसूत्राधिकरणेस्मृ
तीनामौत्सर्गिकंतथाभूतंश्रुतिमूलकात्वंनिरूपणात्ताद्दृशानित्यानुमेयश्रुतिमू
लकत्वमंगीक्रियते स्वीक्रियतेचनियमेनतच्च नत्वीहृदृश्यश्रुतिमूलत्वमेवेतिनियमः
श्रकयनिर्वचनः प्रतिसंवत्सरंसोमः पशुप्रत्ययनंतथेत्यादीनांप्रत्यक्षश्रुतिमूली
नामपिस्मृतीनांभूयसीनामनुपलंभात् अतएवन्यायमूलकत्वेनविर्णीतस्मृतिद
र्शनेनस्मृतित्वादवेदमूलत्वानुमानंनिरस्तं यत्तुवेदोखिलोधर्मइत्यादेर्नवेदमूल
त्वमिति नत्र पुराणन्यायमीमांसेत्यादिवदस्यापिवचनस्यैतावंतोवधर्ममूलानी

नीतिनियमपरत्वात् नियमस्य चालौकिकत्वेन वेदमूलत्वावश्यंभावात् न चैतच्छाक्यार्थ
स्यन्यायतः सिद्धो नियमपरत्वमस्यात्तदुर्निरूपत्वेन न्यायेनेति वाच्यं तथाहि धर्ममूलत्व
स्याविदिहसाक्षात्पारंपर्येण वा धर्मप्रतिकारकहेतुमेव वदति पारंपर्येण चैतत्संभवति
ज्ञापकाज्ञापयोः न च ज्ञापकस्येन्द्रियादेरिव कथं कारकत्वमिति शंक्यं श्रवणादेरिव ज्ञा
पकानामपि केषांचिद्धर्मप्रति नियमविधिना तादर्थ्यावगमात् तावता च श्रुतत्वहेतुना
निर्वाहात् एवं च नाखिलवेदस्य धर्ममूलत्वासंभवः धर्ममबोधयतामपि श्येनादिवाक्या
नां निषेधानां च पारायणाद्युपलक्ष्यज्ञादिविवर्तनद्वारा धर्मप्रतिकारकत्वात् ज्ञापकत्वेनवि

विध्यपेक्षितनिमित्तसमर्पकत्वेन विद्ध्वद्वाक्यवत्परं फलस्याधर्मत्वमोपप्रयोगाद्धसंभवन्निर्वना
नाशाखाविच्छिन्नमूलत्वश्रुतिविदामपिमन्वादीनांतादृशाश्रुत्यन्वेषणाशक्तत्वेननिर्णी
तपुरुषेषु तु कंपया स्मृतिस्मृतिप्रणयनप्रवृत्तिः नास्तिकश्रेयसाधनत्वाधिकारायाश्रुपिवा
द्यस्मृतेस्ताहशाबोधद्वाराधर्मप्रत्ययकारकत्वाच्छक्तनएवोक्तविधधर्मत्वाभावोपिबोधयन्तु
धर्ममूलत्वशास्त्रस्यज्ञापकाज्ञापकसाधारणकारकहेतुत्वादेवंचरागद्वेषग्रहणान्मनो
ब्रह्मण्यत्वाधात्मनोवाशीलस्यधर्मविवर्त्तकतयाधर्ममूलत्वमितिशास्त्रार्थसंभवः नच
मनोरूपविधायिवचसापौनरुक्त्यंचनेनरागद्वेषग्रहणस्यसर्वधर्ममूलतायाअसिद्धेः

न च वेदानां वक्तॄणां चित्तप्रसादः शीलमिति व्याख्यायां कैमुतिकन्यायेन शीलोपन्यासवैयर्थ्य
र्हात्मपदात्तुष्ट्युपात्तविशेषमात्मन इत्यत्र स्वपदाद्धैकपुरुषप्रसादस्य स्वचित्तप्रसादत्वेनैव
प्रामाण्यावगमे पुरुषान्तरीयप्रसादस्य प्रामाण्यासिद्धेः नापि शीलं समाधिरिति व्याख्या
यां तदापत्तिः इत्यनेनैव वेदार्थविदामपि मध्ये यदेवोक्तं विधेयसमाधिमतं तत्स्मृतिः प्रमा
णमन्यस्मृतिस्तु प्रमाणमिति विवेकप्रयोजनत्वात् न चाचारश्चैव साधूनामित्यपि वरूपाचारे
वसर्वाचारसाधारण्यकेनेऽङ्गीकारेणाचारप्रामाण्ये विशेषरूपविषयमूलक्षिप्रत्वे शून्या
चारस्यानुसरणीयत्वापत्तिः लोभादिदृष्टमूलत्वनिर्णयाभावे श्रुतिमूलत्वाभावनिर्ण
याऽसंभवात् लोभादिमूलत्वनिर्णये वा साध्वाचारत्वस्यैवाभावात् वेदविदां धर्मप्रध्यावरण

स्येवसाध्याचारत्वेनविवक्षितत्वात् केषुचिदाचारेषुशास्त्रिकमूलश्रुतिदर्शनात्परंत्वेष
पक्षआश्रीयते नन्वेवमनंताचारेष्वामौल्यनिर्वाहायानंतश्रुतिकल्पनापत्तिरितिचेत्
श्रुनंतचरणाधारशाखाम्नानात्स्वनार्थवादानुमितानांवामूलत्वेनस्वीक्रियमाणानामानं नं सं
संभवत्येवेतिकानुपपत्तिः नच केषुचिदाचारेषुविशेषतोमूलश्रुतिदर्शनेपिसर्वत्रता
दृशश्रुतिमूलत्वमेवेत्यवधारणसंभवः आत्मतुष्टेर्नकुलदेशावतश्श्रेयःसाधनशक्ति
शक्तिप्रतिकारकत्वे तु तथा मेधातिथिनोक्तत्वाद्धार्मिकाचारेणाधिकरणेतस्यास्तद्द
ष्टांतेनाचाराणांवत्तस्याउपपादनात्सम्यक्संकल्पजः कामस्तत्र विज्ञानेश्वरेणशास्त्र
बोधितस्यापिशास्त्राविरुद्धस्यभोजनदानजलंनपानव्रतनिसंकल्पजे

मिथ्यानाद्विशेषरूपेण श्रेयःसाधनत्वावबोधकत्वाभावेऽपि शिष्टानामनुष्ठाचारान्यतरवि
षयत्वेन यत्पुरुषीयतादृशासंकल्पजकामेन वा श्रेयःसाधनतानिर्णय इति संभवात्
इदानीमपीदृशाकुलधर्मप्रवृत्त्युपलंभात् नवात्रान्यधर्ममूलशास्त्रप्रकारकहेतुप्रतिपा
दकत्वासंभवदनुपपादितं नवशिष्टानामनुष्ठानं संदिग्धार्थनिर्णायकत्वेऽव्यवस्थापत्तिः
वेदविद्विष्टपुंविशेषानामनुष्ठेधर्मविषयत्वनियमसंभवात् अतएवाहुः यथाहमायां
त्वकरेषु मेरोर्यथा वोज्वलरूपमभूमौ यज्ञायते तन्मायमेव न तत्स्यात्तथाभवेद्वेदविदा
मनुष्ठितिरिति न च वैकल्पिकाचमनादावधारणहेतुत्वेनानुमानुहितक्रामात्यापन्यासवैयर्थ्या
त् परस्तुष्ठाप्यवधारणशाङ्गोस्वारसिकानुष्ठेरवधारणोपायत्वसंभवात् नापिकृतिः

श्रुतिरित्यादेरपरार्कव्याख्यायामुपदेशवैयर्थ्यं सिद्धधर्ममूलत्वानामपि पूर्वस्मात्परं दुर्वल
मिति बलाबलोपन्यासासंभवात् श्रुतिस्मृत्योस्स्वानिरपेक्षत्वरूपत्वाभ्यामेव बलाबलेऽदृष्टं
स्मृतिसदाचारयोरपि सनिबंधनत्वानिबंधनत्वाभ्यां विशिष्टनदन्यपुंगनत्वाभ्यांच इत्यभ्युपा
देर्मनस्तुष्टिपरिच्छिन्नतया विधावपि यदि कश्चित्सदाचारेणतदियत्तापरिच्छेदः शक्यतेन
दामेव मनःसंतोषत्य न तु स्वमनस्तुष्टेयत्तांतरपरिच्छेदः कार्यः सदाचारसिद्धयत्तायाः श्रु
तिमूलत्वस्योत्सर्गिकत्वात् श्रुतिविरुद्धत्वेन संभाविता याश्चपि मनस्तुष्टेश्शामान्यायोग
दितिज्ञापयितुं सदाचाराननंतरं स्वस्य च प्रियमात्मन इत्युक्तं सम्यपि देवेनं श्रद्धोपनमेदिति

भाट्टा
२६२

363

ग्गत्वेनश्रद्धामूलकमनःसंकल्पजकामविहितोप्यविहितत्वमर्त्तुनक्षत्राधाने यदि मनस्तु-
ष्टिस्तदा नियतेवसंताद्युतौ कृत्तिकादिनक्षत्रे वाधानं कार्यं न तु कालांतरे सफलकर्मांगत्वे
मनस्तुष्टिविधिपरत्वेनापि मेधातिथिना मनस्तुष्टिरेव चेति चवोधाख्यानात् मनस्तुष्टिमंतरे-
ण कर्मवैगुण्यादिति ज्ञापयितुं स्वस्य च प्रियमात्मनइत्यनंतरं सम्यक्संकल्पजइत्याद्युक्तं
एवं स्मृतिशब्दमवाक्याप्रामाण्ये पूर्वोक्तविधयोपपन्नस्यास्मृतिप्रामाण्यस्यासंभव त्वेव यद्वै
किंचेति महोवाचेति लिंगं वदतः शाष्टकर्मत्ववदर्थकर्मकत्वस्यापि वक्तुं लब्धपलब्धेः स्मृत्या-
प्रसिद्धार्थप्रतिपादकत्वेपि मन्वादिशास्त्रोपपन्नाप्रसिद्धयोगाश्रयणेनार्थांतरकल्पनानुपप-
त्तेश्च प्रतिमगं समानन्नाम्नां श्रुंसां जन्मोपश्रयणे नाप्याकरे वेदसिन्यत्तोपपादश्च [illegible]वंवयदा

२६२

पुण्यविशेषज्ञानातिशयलब्धमन्वादिवचःप्रामाण्यं सिद्धं तदावापरायणोक्तन्यायानुगृहीत
श्रुत्याद्यनेकमानसिद्धस्वाभाविकसार्वज्ञस्य चतुर्वेदनिश्वसितस्य भट्टपादैः स्मृतिपादे सर्वलो
कश्रमाणत्वेन कीर्तितस्य श्रीवासुदेवस्य वचसि यत्करोषीत्यादावितिहासांतर्गते नापि का
प्रामाण्यकथेत्याशयेनाहेत्यन्यत्र विस्तर इति दध्नो नवनीतमंथनेन सकेलनेयदितं किं
त्वयादेयमेन नवनीतं वशिरमित्याकर्ण्य त्याहरेः गोपालेघटितं स्मितियथ करनेजेऽपि
तं स्मादरं दृष्ट्वासंग्रहस नन्ददावसनुमश्चिनेयशोदाशिशुः इति श्रीमदगणितगुणसीम
निःसीमनिखिलविद्याविद्योतमानश्रीमद्रापदेवसूरिवरसूनोरनंतदेवस्य कृतौ व्या
यप्रकाशटीकायां भावालंकाराख्यायां द्वितीयः परिच्छेदः समाप्तोयं ग्रंथः जयरघुवीर